शरीरे स्थितिः । अत उभयोर्वैषम्यम् ॥

॥ सू ॥ प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥

यथा 'सत्यं ज्ञानमनन्तं ब्रह्म' इति वाक्यावैयर्थ्यात् स्वप्रकाशरूपतया ज्ञानरूपं ब्रह्म तथा 'निष्कलं निष्क्रियं शान्तम्' 'अपहतपाप्मा' 'सत्यात्म प्राणारामं मनआनन्दम्' 'यः सर्वज्ञः सर्ववित्' 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' 'परास्य शक्तिर्विविधैव श्रूयते' 'अथ कस्मादुच्यते महादेवो यः सर्वान् भावान् परित्यज्यात्मज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महादेवः' इत्यादीनां परश्शतानां वाक्यानामवैयर्थ्यात् निरवद्यं कल्याणगुणास्पदं च ब्रह्म इत्युभयलिङ्गमेव ॥

॥ सू ॥ आह च तन्मात्रम् ॥ १६ ॥

'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतिरनवच्छिन्नज्ञानरूपतामात्रं ब्रह्मण आह । नान्यं निवारयति, विशेषाभावादविरोधाच्च । यथा स्वर्णरूपं किरीटमित्येतत् स्वर्णरूपतामात्रकथनपरं, न तत्खचितरत्नादिनिषेधपरं, तद्वदिति । अत्र हि

---

न कारागृहप्रविष्टाधिकारिपुरुषन्यायेन दुःखादिकं प्रसज्यत इति भावः । यत्तु परमेश्वरस्य सर्वशरीरकत्वे विधिनिषेधवाक्यगतब्राह्मणादिशब्दानां तत्पर्यंतत्वेन तस्यापि विधिनिषेधोल्लंघनप्रयुक्तपापावश्यंभावेन तत्प्रयुक्तदुःखादिभाक्त्वं स्यादिति तत्तुच्छम् । तेषु ब्राह्मणादिशब्दानां 'त्रिः प्रथमामन्वाह त्रिरुत्तमा' मित्यत्र प्रथमोत्तमशब्दयोः प्रथमोपस्थितस्थानातिक्रमेण प्रवोवाजीयादिऋक्पर्यन्तत्ववत्प्रथमोपस्थितजीवपरित्यागेन परमेश्वरपर्यंतत्वस्य कल्पनायोगात् तथा कल्पने जीवानां विधिनिषेधविषयत्वं कुतोऽपि प्रमाणान्न सिध्येदिति तेषां कर्माधीनैहिकामुष्मिकदेहविशेषसम्बन्धबन्धमोक्षादिप्रतिपादकसकलशास्त्रार्थविप्लवप्रसंगाच्च । तस्मादस्थूलादिवाक्यानां सर्वशरीरत्ववाक्यानां च श्रुतित्वाविशेषेण प्रामाण्यस्याभ्युपगन्तव्यत्वात् पदाहवनीयशास्त्रन्यायेन व्यवस्था कल्पयितुमुचितेति अस्थूलादिवाक्यानि कर्माधीनशरीरनिषेधपराणि 'यस्य पृथिवी शरीर'मित्यादीनि नियन्तृत्वेन सर्वशरीरकत्वप्रतिपादकानीति व्यवस्थापनान्न परस्परविरोध इति भावः । सत्यज्ञानादिवाक्यैरपि ब्रह्मणो न ज्ञानमात्रत्वसिद्धिरिति प्रतिपादनार्थं सूत्रम्—प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥ प्रकाशः स्वप्रकाशं ज्ञानम् । सत्यज्ञानादिश्रुतिप्राप्तं ज्ञानरूपत्वमिव 'यस्सर्वज्ञः सर्ववित्सर्वेश्वर' इत्यादिश्रुतिप्राप्तं सार्वज्ञ्यैश्वर्यादिकमप्यंगीकरणीयम् । उभयोः प्रामाण्याविशेषात् । 'तुल्यं च साम्प्रदायिक'मिति न्यायात् विरोधाभावेनात्र व्यवस्थापकन्यायस्याप्यनपेक्षितत्वादिति भावः । यदि ब्रूयात्सत्यज्ञानादिश्रुतेर्ज्ञानमात्रे तात्पर्यमित्यस्ति विरोध इति तत्परिहारार्थं सूत्रम्—आह च तन्मात्रम् ॥ १६ ॥ न हीयं श्रुतिर्ज्ञानमात्रं ब्रह्मेत्याह किं तु ज्ञानं ब्रह्मेत्येतावन्मात्रमाह । तत्तु गुणवत्त्वेऽपि न विरुध्यत इति भावः । ननु ज्ञानस्य सतो ज्ञातृत्वादिकं विरुद्धमस्मदादीनां घटादिज्ञानेष्वदर्शनादि त्यर्थात् ज्ञानस्वरूपत्वोक्त्या ज्ञातृत्वादिधर्मव्यतिरेकोऽवसीयत इत्याशंक्याह—अत्र हीति । परमेश्वरस्य प्रकाशतया ज्ञानरूपत्वं न तु घटादिज्ञानवद्दृश्यविषयतया । न च तद्ज्ञातृत्वा-

(१) 'स्थानातिक्रमे कारणाभावेन प्रवोवाजीयादि' इति ख. ग. पाठः । (२) 'स्यावश्यसमर्थनीयत्वात्' इति ख. पाठः ।

'सत्यं ज्ञानमनन्तम्' इति स्वत एव महाप्रकाशरूपतया परब्रह्मणः परमज्ञानाकारमात्रमभिदधती श्रुतिरनन्तरमुच्यमानं ब्रह्मणो विपश्चित्त्वं सर्वज्ञत्वं निवारयितुं कथं क्षमते। विविधं वस्तुजातं पश्यन्ती विमृशन्ती चिद्यस्य स विपश्चित्। अतो न विरोधः ॥

## ॥ सू ॥ दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥

हेयगुणराहित्येन कल्याणगुणसाहित्येन चोभयलिङ्गं ब्रह्म दर्शयति सर्वत्र श्रुतिरेव भगवती। 'आकाशशरीरं ब्रह्म। सत्यात्म प्राणारामं मनआनन्दम्। शान्तिसमृद्धममृतम्। इति प्राचीनयोग्योपास्स्व' इति। आ काशत इत्याकाशः प्रकाशस्तद्रूपं चिदम्बररूपम्। सत्यात्म सत्तारूपम्। प्राणारामं प्राणे आत्मन्येवारामो न बहिरस्येति। मनस्येवानन्दोऽस्य न बाह्यकरणेष्विति मनआनन्दम्। मन इति ज्ञानमन्तःकरणमुच्यते, येनानपेक्षितबाह्यकरणेनापरोक्षितसकलबाह्यवस्तुविलासेन नित्यनिष्कलङ्केन प्रमाविशेषेण सर्वज्ञं ब्रह्मोच्यते। तेनापरिमितस्वरूपानन्दमनुभवतीति मनआनन्दम्। शान्तिसमृद्धं रागद्वेषादीनां हेयगुणानामत्यन्तराहित्यं शान्तिः तत्समृद्धं निरवशेषनिर्धूतनिखिलदोषकलङ्कम्। अमृतमनादिमुक्तमिति सत्यज्ञानरूपं सर्वज्ञं निरतिशयात्मानन्दशक्तिविलासं निरस्तसमस्तदोषं परं ब्रह्मेत्युभयलिङ्गमिति दर्शयति। तथा 'निष्कलं निष्क्रियं शान्तम्' 'धर्मावहं पापनुदं भगेशम्' 'तमीश्वराणां परमं महेश्वरम्' इत्यादिश्रुतिश्चोभयलिङ्गं ब्रह्माह—

'अनादिमलसंश्लेषप्रागभावाद्विशेषतः।
अत्यन्तपरिशुद्धात्मा शिव इत्युच्यते विभुः॥

---

दिविरुद्धम्। तथाभूतस्यैव जीवस्य ज्ञातृत्वादिदर्शनात्। किं च ज्ञानत्वोक्तिसामर्थ्यात्पुरुषबुद्ध्या हि ज्ञातृत्वाद्यभावः कल्पनीयः। तत्कल्पनां शीघ्रप्रवृत्तिकं श्रुत्यंतरं वारयतीत्येतदास्ताम्। 'विपश्चिते'ति तदनन्तरश्रवणमपि वारयति। शर्कराञ्जनविधिसामर्थ्यात् पुरुषबुद्ध्या तत्साधनत्वेन द्रव्यसामान्यकल्पनामिव वाक्यशेषे घृतश्रवणमिति भावः। विपश्चित्पदं भाष्यदर्शितेऽर्थे पृषोदरादित्वात्साधुः। एवं सत्यज्ञानादिश्रुत्यवलम्बनेन निर्विशेषज्ञानरूपं ब्रह्मेत्यभ्युपगम्य परमेश्वरस्य सर्वशरीरत्वश्रवणस्य तदुपपादकत्वेनोपन्यस्तस्य सर्वेषु वेदान्तेषूभयलिंगत्वश्रवणस्य चान्यथासिद्धिः कर्तुं न शक्यत इत्युपपादितम्। अथ सर्वोऽपि वेदान्तगणः तदीयोभयलिंगत्वपर्यवसायीत्यतोऽपि हेतोस्तदन्यथासिद्धिः कर्तुं न शक्यत इति प्रतिपादनार्थं सूत्रम्—दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥ अथो इति निपातो वेदान्तवाक्यकात्स्न्र्यपरः। 'मंगलानंतरारंभप्रश्नकात्स्न्र्येष्वथो अथ' इति तस्य कात्स्न्र्यार्थानुशासनात्। 'ओ'दिति सूत्रेण प्रगृह्यसंज्ञया प्रकृतिभावः। न तादृशः कश्चिद्वेदान्तेषु ब्रह्मणि प्रवृत्तः शब्दोऽस्ति यः प्रवृत्तिनिमित्ततया कस्यचिद्दोषस्याभावं कंचन कल्याणगुणं वा नापेक्षेत। अतस्सर्वोऽपि वेदान्ततदुपबृंहणगणगतब्रह्मपरशब्दराशिस्तस्योभयलिंगत्वं समर्पयतीत्यर्थः। अत्रोदाहृतानि श्रुतितदुपबृंहणान्यधस्तात्तत्रतत्र व्याख्यातानि।

अनन्तानन्दकल्याणगुणैकघन ईश्वरः ।
शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः ॥'

इति स्मर्यते च शिवशब्दवाच्यं ब्रह्मोभयलिङ्गमिति । परमविशुद्धिमङ्गलगुणवाचकेन शिवशब्देन निरस्तनिखिलदोषकलङ्कं निरतिशयपुरुषार्थं गुणपरिपूर्णं ब्रह्माभिधीयत इति ब्रह्मणः शिवशब्दवाच्यतया चोभयलिङ्गसिद्धिः ॥

॥ सू ॥ अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥

यतः पृथिव्यादिषु सर्वत्र स्थितस्यापि परमेश्वरस्य निर्दोषत्वं कल्याणगुणाकरत्वं च अत एव शास्त्रेषु जलसूर्यादिवदित्यस्योपमा क्रियते ।

'आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।
तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् ॥'

इति । अत्र वस्तुतः स्थितमाकाशं वस्तुतोऽनवस्थितं च सूर्यमुपमानमुपादत्ते अनेनाभिप्रायेण-यथैकमेवाकाशं घटादिषु पृथक्पृथगेव वस्तुतः स्थितं, तथैक एव परमेश्वरः पृथिव्यादिषु पृथक्पृथगात्मतया वस्तुत एव तिष्ठतीति परमेश्वरस्यैकस्यापि बहुषु वस्तुतः स्थितिरुपपद्यते इत्याकाशोपमानम् । जलाधारेषु वस्तुतोऽनवस्थितस्य सूर्यस्य यथा न तद्विकारादिदोषस्पर्शः तथा पृथिव्यादिषु वस्तुतः स्थितस्यापि परमेश्वरस्य न तद्विकारादिदोषस्पर्श इति सर्वान्तर्यामिणः परमेश्वरस्य निर्दोषत्वं स्वरूपगुणाहानिश्चेति सूर्योपमानम् । अत आकाशाद्यु-

एवमुभयलिंगत्वसमर्थनपूर्वकं पृथिव्यादिस्थितावपि तत्प्रयुक्तदोषाप्रसंगस्समर्थितः । अथ श्रुत्युदाहृतदृष्टान्तसामर्थ्येन तं समर्थयितुं सूत्रम्---अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥ 'आकाशमेकं हि यथे' त्यादिश्रुतौ प्रथमदृष्टान्तेन 'यः पृथिव्यां तिष्ठ'न्नित्यादिश्रुतिसिद्धा 'न स्थानतोऽपी'ति ( ब्र० ३-२-११ ) सूत्रेऽनूदिता सर्वत्र स्थितिरुपपादिता । तेन कथमेकस्यामूर्तस्य बहुषु स्थितिः कृत्स्नैकदेशविकल्पपराहतत्वादिति शंका निरवकाशीकृता । द्वितीयदृष्टान्तेन तेषु स्थितस्यापि तेषु वस्तुतो स्थितस्येव तत्प्रयुक्तदोषास्पर्शः 'ते यदन्तरे' त्यादिश्रुतिसिद्धः सूत्रेऽ'प्यरूपवदेव ही' त्यनूदित उपपादितः । तेन तच्छरीरकः कथं तत्प्रयुक्तदोषभाक् न भवेदिति शंका निरवकाशीकृता । कर्मवश्यत्वतदभावाभ्यां जीवेश्वरयोर्विशेष इति श्रुतेरभिप्रायः । सू ॥ अंबुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥ अत्रेयमाशंका-अंबुवत् अंबुनीवाग्रहणाद्यथाम्बुनि सूर्यः तत्रानवस्थित एव भ्रान्त्या तत्र स्थित इव गृह्यते तथा परमात्मा पृथिव्यादावस्थित एव तत्र स्थित इव गृह्यत इत्यनभ्युपगमात् तत्र वस्तुतः स्थित एव गृह्यत इत्युपगमाच्च तथात्वं न सूर्यस्येवोपाधिप्रयुक्तदोषाप्रसंगः । अतः श्रुतिरित्थं व्याख्येया । पृथिव्यादिषु स्थितौ कथं तत्प्रयुक्तदोषाप्रसङ्ग इत्याशंकायामाकाशदृष्टान्तः । प्रसिद्धो ह्याकाशस्य तत्र तत्र स्थितस्यापि दोषाप्रसंगः । 'जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः । आकाश इव पंकेन न स पापेन लिप्यते' ॥ इत्यादौ निर्विशेषज्ञानमात्ररूपस्य ब्रह्मणः पृथिव्यादिनियन्तृतया तत्र तत्रावस्थितिरयुक्तेत्याशंकायां द्वितीयदृष्टान्तः । तेन वस्तुतो न तिष्ठत्येव पृथिव्यादिषु ब्रह्म जल इव सूर्यः । 'सन्घट' इत्यादिप्रतिभासमात्रावलम्बनेन तत्र तत्र स्थितिरुपन्यस्ता ।

पमयापि सर्वात्मनः परमेश्वरस्य सिद्धमुभयलिङ्गत्वम् ॥

अत्राशङ्कते—

॥ सू ॥ अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥

अम्बुनि यथा सूर्योऽपरमार्थो गृह्यते, न तथा परमेश्वरः पृथिव्यादौ । किंतु परमार्थतस्तत्र स्थित एव गृह्यते । अतः कथमस्य निर्दोषत्वम् ? ॥

इति शङ्कायाः परिहार उच्यते—

॥ सू ॥ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च ॥ २० ॥

नेत्यनुवर्तते । वस्तुतः पृथिव्यादिष्वन्तर्भावादपि परमेश्वरस्य तद्गतवृद्धिह्रासभाक्त्वं न संभवति । पूर्वोक्तोभयदृष्टान्तग्रहणसामञ्जस्यादेवमवगम्यते । उक्तं हि वस्तुतोऽनवस्थितस्य सूर्यस्य स्थितस्य चाकाशस्योपमानत्वेन ग्रहणं सर्वत्रावस्थितस्यापि परमेश्वरस्यानवस्थितस्येव न तद्दोषस्पर्श इति ज्ञापयितुमिति । तथा हि दृश्यते विवक्षितधर्मसाम्यज्ञापनमात्रेण चन्द्रवन्मुखमिति दृष्टान्तः । तस्मादुभयलिङ्गसिद्धिरीश्वरस्य पारमार्थ्यात् पृथिव्यादिषु स्थितस्यापि । अथवा—श्रुतावपि दृश्यते विवक्षितधर्मसाम्येन दृष्टान्तः 'अश्व इव रोमाणि विधूय पापम्' इत्यादौ । अतो विवक्षितधर्मसाम्येनोभयदृष्टान्तसामञ्जस्यादुभयलिङ्गमेव ब्रह्मेति सिद्धम् ॥ इत्युभयलिङ्गाधिकरणम् ॥ ५ ॥

---

अतः प्रतिसूर्यस्य चलनादिकमिव तत्स्थित्यवभासप्रयुक्तं दोषवत्त्वं गुणवत्त्वं वा भासतां नाम न तत्पारमार्थिकमिति । तस्मादस्याः श्रुतेर्विवक्षितार्थविरुद्धाया उदाहरणमयुक्तमिति । सू ॥ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च ॥ २० ॥ अयं हि परिहाराभिप्रायः । यथा जलसूर्यस्य जलोपाधिप्रयुक्तवृद्धिह्रासादिभाक्त्वं वस्तुतो न भवति एवं ब्रह्मणः पृथिव्याद्यन्तरवस्थितिप्रयुक्तं गुणदोषभाक्त्वं न भवतीति तत्प्रयुक्तगुणदोषभाक्त्वाभावमात्रे द्वितीयदृष्टान्तः । तथा सत्येव दृष्टान्तद्वयीसामञ्जस्यात् । प्रतिसूर्यवदुपाध्यनवस्थितिपर्यन्तविवक्षायां प्रथमश्रुतदृष्टान्तोपमर्दापत्तेः । तथा सत्येव सत्यज्ञानादिश्रुत्युभयलिङ्गत्वश्रुतिरूपोभयसामञ्जस्याच्च । अन्यथा सर्वशरीरत्वसर्वनियंतृत्वादिप्रतिपादकानेकश्रुतिविरोधापत्तेः । न हि सर्वात्मना दृष्टान्तदार्ष्टान्तिकयोस्साम्येन भाव्यमित्यस्ति नियमः । लोकवेदयोर्विवक्षितांशसाम्यमात्रेण दृष्टान्तोपादानदर्शनादिति ।

इत्युभयलिङ्गाधिकरणम् ॥ ५ ॥

---

नयमणिमालायाम्

अथोभयलिंगाधिकरणम् ॥ ५ ॥

सू ॥ न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि ॥ ११ ॥ भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥ अपि चैवमेके ॥ १३ ॥ अरूपवदेव तत्प्रधानत्वात् ॥ १४ ॥ प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥ आह च तन्मात्रम् ॥ १६ ॥ दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥ अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥ अंबुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामंजस्यादेवं दर्शनाच्च ॥ २० ॥

यद्यपि निर्दोषत्वं स्वतस्समाम्नातमविकारमणे । दोषवति वस्तुनि स्थितिरथापि दोषं समावहेदेव ॥ १८७ ॥

नैवमतिरोहितोभयलिंगस्य विभोर्मृगांकचूडस्य । दुष्टे स्थित्या न भवेत्परतंत्रस्येव तदनिष्टम् ॥ १८८ ॥

इति उभयलिंगाधिकरणम् ॥ ५ ॥

## सूत्रार्थचन्द्रिकायाम्

### अथोभयलिंगाधिकरणम् ॥ ५ ॥

**सू ॥ न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि ॥ ११ ॥ न भेदादितिचेन्न प्रत्येकमतद्वचनात् ॥१२॥ अपि चैवमेके ॥ १३ ॥ अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥ प्रकाशवच्चावैयर्थ्यम् ॥ १५ ॥ आह च तन्मात्रम् ॥ १६ ॥ दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥ अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥ अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २० ॥ दर्शनाच्च ॥ २१ ॥**

**भगवत्पादमते,** अत्र 'सर्वकामः सर्वगन्धः सर्वरसः' इत्यादिना, ब्रह्मणः सविशेषत्वं श्रूयते 'अस्थूलमनणु' इत्यादिना निर्विशेषत्वम् । तत्र किमुभयश्रुत्यनुरोधादुभयरूपं ब्रह्म, उतैकरूपम् । एकरूपमित्यत्रापि, सविशेषं, निर्विशेषं वेति **संदेहः । द्विरूपमिति पूर्वपक्षः । सिद्धान्तस्तु,** न तावत्परस्य ब्रह्मण उभयलिंगमुभयरूपत्वं संभवति । सत्यस्य वस्तुनो द्वैरूप्यायोगात् । न ह्येकमेव वस्तु एकदा तद्वत्तदभाववच्च दृष्टम् । नापि स्थानत उपाधित उभयरूपत्वं तात्त्विकं युक्तम् । अग्निसंयोगमात्रेण जलस्यौष्ण्यस्य तत्स्वभावत्वादर्शनात् । अत एकरूपत्वमेव ब्रह्मणः । **हि**=यस्मात् । **सर्वत्र**=सर्वेषु वेदान्तेषु 'अशब्दमस्पर्शमरूप' मित्यादिब्रह्मपरेषु सविशेषत्वनिरासेन निर्विशेषमेवैकरूपं ब्रह्मोपदिश्यत इत्यर्थः ॥

**सू ॥ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥** ननु **न** निर्विशेषमेव ब्रह्म । कुतः । **भेदात्**=प्रतिविद्यं ब्रह्मण आकारभेदेन भेदात् । कस्यां चिद्विद्यायां चतुष्पाद्ब्रह्मोपदिश्यते । कस्यांचित् षोडशकलम् । कस्यांचित्त्रैलोक्यशरीरं वैश्वानराख्यम् । तस्मात्सविशेषमपि श्रुतिसामर्थ्यादङ्गीकर्तव्यमिति चेत् । **न** । **प्रत्येकं**=प्रत्युपाधि । **अतद्वचनात्** अभेदवचनात् । 'यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुष' इत्यादिश्रुतौ ब्रह्मणः सर्वोपाधिषु पृथिव्यबादिषु अभेदश्रवणादित्यर्थः ॥ **सू ॥ अपि चैवमेके ॥ १३ ॥** अपिचैके शाखिनः 'मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति' 'नेह नानास्ति किंचन' इत्येवं भेदनिन्दापूर्वकमभेदमेव ब्रह्मणः समामनन्ति इत्यर्थः ॥

ननु सगुणनिर्गुणपरे श्रुतिद्वये सति कथं निर्गुणे ब्रह्मणि पक्षपातः तत्राह—**सू ॥ अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥ अरूपवदेव**=रूपादिहीनं निर्विशेषमेव ब्रह्मावधारयितव्यम् । न सविशेषम् । कुतः । **तत्प्रधानत्वात्**='अस्थूल' मित्यादिनिषेधशास्त्रस्य निर्गुणब्रह्मप्रधानत्वादित्यर्थः । उपासनावाक्यानां सविशेषत्वे तात्पर्याभावात्तत्तात्पर्याङ्गीकारे वाक्यभेदापत्तेः इतरेषां सविशेषवाक्यानां प्रत्यक्षादिसिद्धप्रपञ्चानुवादकत्वेन निर्विशेषपरत्वात् 'तदनन्यत्वम्' इत्यादिना प्रपञ्चमिथ्यात्वसाधनाच्च न सविशेषत्वं ब्रह्मणः प्रामाणिकमिति भावः ॥

ननु तर्हि सविशेषश्रुतीनां का गतिरित्यत आह—**सू ॥ प्रकाशवच्चावैयर्थ्यम् ॥ १६ ॥** यथा सूर्यादिप्रकाशो वक्रवंशाद्युपाधिना वक्र इव ऋजुरिव भवति तद्वत् ब्रह्मापि पृथिव्याद्युपाधिवशात्तत्तदाकारमिव भवति । तादृशौपाधिकाकारः सविशेषश्रुतीनां गतिरिति तासा**मवैयर्थ्यम्**=निरर्थकत्वाभाव इत्यर्थः ॥

ननु कीदृशं निर्विशेषं ब्रह्मेत्यत आह—**सू ॥ आह च तन्मात्रम् ॥ १६ ॥** 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' इति श्रुतिः **तन्मात्रम्**=चैतन्यमात्रं स्वप्रकाशं चिदेकरसं निर्विशेषमाहेत्यर्थः ॥

किंच । प्रपञ्चप्रत्याख्यानमुखेन ब्रह्मण उपदेशादपि ब्रह्म निर्विशेषमेव । सविशेषत्वे तद्वाक्यैरेव तत्सिद्धेः प्रत्याख्यानोपदेशानर्थक्यं स्यादित्याह—**सू ॥ दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥** 'अथात आदेशो नेति नेति' इत्यादिश्रुतिः प्रपञ्चनिषेधमुखेनैव ब्रह्म **दर्शयति** । सौत्राथोशब्दस्तथार्थः । तथा **स्मर्यते च** भगवद्गीतासु निषेधमुखेनैव ब्रह्म 'अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते' इति ।

किंच । विशिष्टदृष्टान्तोक्तिरपि निर्विशेषत्वमस्य गमयतीत्याह—**सू ॥ अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥** यत एवायमात्मा चैतन्यैकरसः परप्रतिषेधोपदेश्यो निर्विशेषः अत एवौपाधिकत्वं सविशेषमादाय सूर्यकादिवत् जलगतसूर्यप्रतिबिंबादिवत् इत्युपमोपादीयते मोक्षशास्त्रेषु 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा' इत्यादिषु । एवं चैतद्दृष्टान्तबलादपि ब्रह्मणो निर्विशेषत्वमिति सूत्राभिप्रायः ॥

दृष्टान्तवैषम्यं शंकते—**सू ॥ अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥** यथा अंबु सूर्यान्मूर्तान्भिन्नं दूरस्थं मूर्तं गृह्यते तद्वदमूर्तात्सर्वात्मकादात्मनो भिन्नदूरस्थोपाधेर**ग्रहणान्न तथात्वं** न सूर्यतुल्यत्वमिति शंकार्थः ।

अत्रोत्तरमाह—**सू ॥ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २० ॥** यथा सूर्यप्रतिबिंबस्य जलान्तर्भूतस्य जलगतवृद्धिह्रासभाक्त्वं न वास्तवम् एवं निर्विशेषस्य परमात्मनो देहाद्युपाध्यन्तर्भावाद्देहादिगतवृद्धिह्रासभाक्त्वं न स्वाभाविकम् इत्येतावतांशेनोभयोर्दृष्टान्तदार्ष्टान्तिकयोस्सामञ्जस्याद्भवति सूर्यादिदृष्टान्तः । न हि दृष्टांतदार्ष्टान्ति-

कयोस्सर्वांशेन समत्वं शक्यते केनापि वक्तुम् । तस्मै तदुच्छेदमिति भावः ।

किंच । आगमैकसमधिगम्येऽर्थे न पर्यनुयोग इत्याह—सू ॥ **दर्शनाच्च** ॥ २१ ॥ परस्य ब्रह्मणो देहान्तरानुप्रवेशस्य प्रतिबिंबभावरूपस्य 'पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्' इत्यादिश्रुतौ दर्शनात् । अतो निर्विशेषमेव चैतन्यैकरसं ब्रह्मेति सिद्धम् ॥

**श्रीकण्ठमते** तथा **रामानुजमते** च पूर्वेष्वधिकरणेषु त्वंपदार्थस्य जीवस्य स्वरूपधर्मवस्थागत्यवस्थाविशेषनिरूपणं कृतम् । अतः परं तत्पदार्थस्य परमेश्वरस्य स्वरूपधर्मादिकं निरूप्यते–सू ॥ **न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि** ॥ ११ ॥ अत्र किं जीवस्येव तदन्तर्यामिणः परस्य ब्रह्मणोऽपि जागरादिप्रयुक्तदोषास्संभवन्ति उत नेति **संशयः** । 'यः पृथिव्यां तिष्ठन्' इत्यादिना सर्वास्ववस्थास्ववस्थितिवचनात्तत्तद्दोषकलङ्काः प्रसज्यन्त एवेति **पूर्वपक्षः** । **सिद्धान्तस्तु, न स्थानतोऽपि परस्य**=पृथिव्यादिष्वन्तर्यामितयावस्थितस्यापि परस्य ब्रह्मणस्तत्रतत्रावस्थानेन जीवस्येव ये दोषा उक्तास्ते न संभवन्तीत्यर्थः । कुतः । **उभयलिंगं सर्वत्र हि**=हिर्हेतौ । यतस्सर्वत्र श्रुतिस्मृतिषु निरस्तनिखिलदोषत्व-समस्तकल्याणगुणात्मकत्वरूपोभयलिंगमुभयलक्षणं परं ब्रह्मावगतम् ॥ **सू० ॥ भेदादिति चेन्न प्रत्येकमतद्वचनात्** ॥ १२ ॥ यथा जीवस्य स्वतोऽपहतपाप्मत्वादिगुणकस्यापि देवादिशरीरसंबन्धितयावस्थानभेदादुक्तदोषसंबन्धित्वमेवं परस्यापि 'यस्य पृथिवी शरीर' मिति शरीरसंबन्धित्वावस्थाभेदात्ते दोषाः स्युरिति चेन्न । **प्रत्येकं**=प्रतिपर्यायम् । **अतद्वचनात्**=दोषासंबन्धित्ववचनात् । 'यस्य पृथिवी शरीर' मित्यादिषु 'स त आत्मान्तर्याम्यमृत' इत्यन्तर्यामिणो निर्दोषत्वमुच्यते । जीवस्य तु पराभिध्यानात्स्वरूपं तिरोहितमित्युक्तम् । अतश्शरीरसंबन्धित्वेऽपि परस्यैते न दोषाः ॥

**सू० ॥ अपि चैवमेके** ॥ १३ ॥ अपिच यदिदं जीवपरयोरेकस्मिन्शरीरे शरीरित्वेनावस्थितयोर्दोषसंबन्धित्वं तद्विपरीतत्वं चोक्तमेवमेके शाखिनः 'द्वा सुपर्णा सयुजा सखाया' वित्यादिना स्वशब्देनाधीयते । अतो न जीववदीश्वरे दोषप्रसंगः ॥

जीवेश्वरयोश्शरीरस्थितिसाम्येऽपि स्थितिवैषम्यमाह—**सू० ॥ अरूपवदेव हि तत्प्रधानत्वात्** ॥ १४ ॥ मनुष्यादिशरीरेषु शरीरित्वेऽप्यरूपवदेव हि तत्परं ब्रह्म वर्तते । कुतः । **प्रधानत्वात्**=नामरूपनिर्वाहकत्वात् । जीवस्य नामरूपभाक्त्वेन कर्मफलाशनं निर्वोढुं परस्य तत्तच्छरीरे शरीरित्वेनावस्थानम् । जीवस्य तु कर्मफलभोगार्थं हि शरीरे स्थितिः । अत उभयोर्वैषम्यं सिद्धम् ॥

ननु 'सत्यं ज्ञानमनन्तं ब्रह्मे' ति प्रकाशैकस्वरूपता ब्रह्मण उच्यते कथमुभयलिंगमित्यत आह—**सू० ॥ प्रकाशवच्चावैयर्थ्यात्** ॥ १५ ॥ यथा 'सत्यं ज्ञान' मिति वाक्यावैयर्थ्यात्प्रकाशो ब्रह्मणः स्वरूपमित्यवगम्यते तथा 'यस्सर्वज्ञस्सर्ववित्' 'परास्य शक्तिर्विविधैव श्रूयते' इत्यादिवाक्यावैयर्थ्यात्कल्याणगुणाकरत्वं च ब्रह्मणः स्वरूपमित्यवगम्यते । अत उभयलिंगमेव ॥

**सू० ॥ आह च तन्मात्रम्** ॥ १६ ॥ 'सत्यं ज्ञान' मिति वाक्यं ब्रह्मज्ञानस्वरूपमित्येतावन्मात्रमाह न पुनः कल्याणगुणाकरत्वं निषेधति ॥

**सू० ॥ दर्शयति चाथो अपि स्मर्यते** ॥ १७ ॥ **दर्शयति च** श्रुतिर्भगवती हेयगुणराहित्येन कल्याणगुणसाहित्येन चोभयलिंगं ब्रह्मेति इत्येवं रीत्या ब्रह्मण उभयलिंगत्वे श्रुतिस्मृतिप्रमाणोपन्यासकत्वेन सूत्रार्थवर्णनमविशिष्टमेवानयोर्मतयोः । श्रुतिस्मृत्युदाहरणप्रक्रिया परं भिद्यते । **श्रीकण्ठमते** 'आकाशशरीरं ब्रह्म सत्यात्म प्राणारामं मनआनन्दम्' इत्यादिकं श्रुतिवाक्यं 'अनादिमलसंश्लेषप्रागभावाद्विशेषतः' इत्यादिस्मृतिवाक्यं चोदाहृत्य शिवशब्दवाच्यं ब्रह्मोभयलिंगमिति निरूपितम् । **रामानुजमते** तु 'निष्कलं निष्क्रियं शान्त' मित्यादिश्रुतिवाक्यं 'यो मामजमनादिं च वेत्ति लोकमहेश्वर' मितिस्मृतिवचनं चोदाहृतमिति च परस्परं विशेषः ॥ **सू० ॥ अत एव चोपमा सूर्यकादिवत्** ॥ १८ ॥ **अत एव च**=यतो ब्रह्मणो निरस्तनिखिलदोषत्वेन कल्याणगुणाकरत्वेन चोभयलिंगत्वात्पृथिव्यादिस्थानतोऽपि नास्ति तत्प्रयुक्तदोषगन्धः । अत एव शास्त्रेषु जलसूर्यकाद्युपमा स्वीक्रियते 'आकाशमेकं हि यदा घटादिषु पृथग्भवेत् । तथात्मैकोऽप्यनेकस्थो जलाधारेष्विवांशुमा' नित्यादिषु ॥

अत्राशंकते—**सू० ॥ अंबुवदग्रहणात्तु न तथात्वम्** ॥ १९ ॥ तुशब्दश्चोद्यं द्योतयति । **अंबुवदग्रहणात्**=अंबुनीवाग्रहणादित्यर्थः । यथा अंबुनि सूर्यस्तत्रानवस्थित एव भ्रान्त्या तत्र स्थित इव गृह्यते न तथा परमात्मा पृथिव्यादौ गृह्यते । 'यः पृथिव्यां तिष्ठन्पृथिव्या अन्तर' इति परमार्थतः स्थितो गृह्यते । अतो **न तथात्वम्**=न सूर्यस्येव तत्प्रयुक्तदोषगन्धाभावः परमात्मनः परमार्थतः स्थितत्वादिति ॥

परिहरति—**सू० ॥ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च** ॥ २० ॥ पृथिव्यादिषु विषमेषु स्थानेषु स्थितस्यापि परमात्मनस्त**दन्तर्भावात्**=तत्रावस्थानतः तत्प्रयुक्तवृद्धिह्रासभाक्त्वं 'जलाधारेष्विवांशुमा' निति दृष्टान्तेन निवर्त्यते । कुतोऽवगतमिति चेत् **उभयसामञ्जस्यादेवम्**=उभयदृष्टान्तोपादानसामर्थ्यादेवमवगम्यत इत्यर्थः । 'आकाशमेकं हि यथा घटादिषु पृथग्भवे' दिति घटादिषु विषमेष्ववस्थितमाकाशं 'जलाधारेष्विवांशुमा' निति

चांशुमंतं परमार्थतोऽनवस्थितं चोभयं दृष्टान्ततयोपादाय 'तथात्मैकोऽप्यनेकस्थ' इति नियमनाशतत्स्थानप्रयुक्तवृद्धिह्रास-भाक्त्वनिवर्तनमात्रं विवक्षितमित्यवगम्यते । अन्यत्रापि दृष्टान्तदार्ष्टान्तिकयोस्सर्वसाम्याभावेऽपि 'सिंह इव माणवक' इत्यादिषु दृष्टान्तोपादानदर्शनादेवमवगम्यते ॥

**श्रीकण्ठमते** नेत्यनुवर्त्य वृद्धिह्रासभाक्त्वं न भवतीति व्याख्यातम् । अश्वेत्युपक्रम्य दर्शनाच्चेत्यस्य 'अश्व इव रोमाणि विधूय पाप' मिति श्रुतौ विवक्षितधर्मसाम्येन दृष्टान्तदर्शनाच्चेत्यर्थपरत्वमप्युपन्यस्तमिति च विशेषः । अतो विवक्षितधर्मसाम्येनोभयदृष्टान्तसामञ्जस्यादुभयलिंगं ब्रह्मेति सिद्धम् ॥

**आनन्दतीर्थमते,** इयमेकादशसूत्री अधिकरणपञ्चकात्मतया विभक्ता । तत्राद्ये **न स्थानतोऽप्यधिकरणे** सर्वशरीरेषु प्रतिशरीरं दक्षिणाक्ष्यादिस्थानेषु च जाग्रदाद्यवस्थाप्रेरकतया स्थितस्य विश्वतैजसप्राज्ञादिरूपस्य परमेश्वरस्य भिन्नस्थानत्वे बहुकुंभसंभृतांभोवद्भेदावश्यंभावात् सर्वावस्थाप्रेरकः परमेश्वर एक एवेति यदुक्तं तदयुक्तम् । एवं च भिन्नानां गुणादितारतम्यानुग्राह्यानुग्राहकभावदर्शनात्तस्यापि तत्प्रसक्तौ न परमेश्वरस्य निर्दोषाशेषगुणत्वसिद्धिरिति **पूर्वपक्षः । सिद्धान्तस्तु,** स्थानभेदेऽपि न परस्य भिन्नं रूपम् । 'सर्वेषु भूतेष्वेकमेव ब्रह्मेत्याचक्षते' इति सर्वभूतेष्वेकस्यैव निर्दोषपरिपूर्णगुणत्वश्रवणात् 'अयं वै हरय' इत्यादिना भगवद्रूपाणां प्रत्येकं मूलरूपेण चाभेदवचनात् ब्रह्मतर्कोक्तरीत्या बद्धाद्युक्तेनैतव्यत्वाच्च । तस्मात्स्थानभेदेऽप्यभेदाम्नानान्नास्ति ब्रह्मणो रूपभेद इति । **सूत्रार्थस्तु सू० ॥ न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि ॥ ११ ॥ परस्य**=परमात्मनः । **स्थानतोऽपि**=अक्ष्यादिस्थानभेदादपि । **उभयलिंगं**=भिन्नरूपं नास्ति । **किं तु सर्वत्र**=सर्वस्थानेषु स्थितं रूपमेकमेव । **हि**=यस्मात् । 'सर्वेष्वि' ति श्रुतिरत्रास्ति अत इत्यर्थः ॥

**सू० ॥ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥ भेदात्**='कार्यकारणबद्धा' विति स्वप्नजाग्रदनुभवजनकत्वरूपभेदकत्वश्रवणात् । विश्वादिरूपाणां नाभेद इति चेन्न । कुतः । **प्रत्येकं**=परस्परं तेषां रूपाणाम् । **अतद्वचनात्**='एष त आत्मे' त्यभेदश्रुतेरित्यर्थः ॥

**सू० ॥ अपि चैवमेके ॥ १३ ॥** यतः एवमभेदं चशब्दार्थानन्तरूपत्वं चैके शाखिनः 'अमात्र' इति श्रुतौ पठन्ति । **अपि**=अभेदेऽपि भेदव्यपदेशः स्थानभेदाद्युज्यत इत्यर्थः ॥ **इति नस्थानतोऽप्यधिकरणम् ॥ ८ ॥**

## अथारूपाधिकरणम् ॥ ९ ॥

**सू० ॥ अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥** अत्र पूर्वाधिकरणोक्तरीत्या वर्णितमहिम्नः परमेश्वरस्य रूपवत्त्वमस्ति वा न वेति **संदेहः** । रूपवत्त्वाभ्युपगमे शरीरस्यानित्यत्वनियमान्नीरूपत्वश्रुतिविरोधाच्च अरूपित्वे रुक्मवर्णत्वादिश्रुतिविरोधात्सौन्दर्यादिशून्यत्वे भक्तेर्निरालंबनतापाताच्च तदेवमुभयथापि तत्र भक्तेरयोगाद्व्यर्थं तस्य स्वप्रवर्तकत्वादिमहिमवर्णनमिति **पूर्वपक्षः । सिद्धान्तस्तु,** तस्य प्रकृत्यादिप्रवर्तकत्वेन तत्प्रधानत्वात् ज्ञानानन्दस्वभावविलक्षणनित्यरूपसत्त्वेऽपि प्रसिद्धप्राकृतरूपाभावाभिप्रायेण नीरूपत्वश्रुत्युपपत्तेः प्रसिद्धप्राकृतरूपरहित एव परमेश्वर इति । **सूत्रार्थस्तु,** ब्रह्म **अरूपवदेव**=प्राकृतरूपरहितमेव । कुतः । **तत्प्रधानत्वात्**=प्रकृत्याद्युत्तमत्वात् हिशब्दसूचितास्थूलमितिश्रुतेश्चेत्यर्थः ॥

**सू० ॥ प्रकाशवच्चावैयर्थ्यम् ॥ १६ ॥** चो हेतुसूचकः । **प्रकाशवत्**=लोकविलक्षणचक्षुरादिप्रकाशो नास्ति प्रकाश इति व्यवहारस्येव । **अवैयर्थ्यम्**=न ब्रह्मणो रूपित्वश्रुतीनामप्रामाण्यम् । कुतः । तस्यारूपित्वेऽपि विलक्षणरूपित्वाभ्युपगमादित्यर्थः ॥

**सू ॥ आह च तन्मात्रम् ॥ १६ ॥** यतः 'ऐकात्म्य' मिति श्रुतिः ब्रह्मण**स्तन्मात्रम्**=विज्ञानानन्दैकस्वरूपं रूप**माह**=वक्तीत्यर्थः । अतो न वैलक्षण्यानिरुक्तिरिति चशब्दार्थः ॥

**सू ॥ दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥** चो यतः । अपिस्समुच्चये । न केवलं ब्रह्मणः आनन्दात्मकत्वं दर्शयति किं तु 'तद्विज्ञानेने' तिश्रुतिर्ज्ञानस्य ब्रह्मात्मकत्वमपि **दर्शयति**=प्रतिपादयति । 'अथो' इति पदं ज्ञानरूपार्थान्तरवाचि । **अथो**=विज्ञानस्यापि ब्रह्मरूपत्वम् । **स्मर्यते**=व्यासादिभिः 'शुद्धस्फटिकसंकाश' मित्यादिना । अतो न ज्ञानानन्दयोर्ब्रह्मस्वरूपत्वमप्रामाणिकमित्यर्थः ॥ **इत्यरूपाधिकरणम् ॥ ९ ॥**

## अथोपमाधिकरणम् ॥ १० ॥

**सू ॥ अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥** अत्र जीवः परमात्माभिन्नश्चेतनत्वाद्विश्वादिवदित्यनुमानेन जीवस्य ब्रह्माभेदसिद्धेर्न तावदात्यन्तिकी भक्तिः परमात्मनि युक्तेति **पूर्वपक्षः । सिद्धान्तस्तु,** जीवः परमात्माभिन्नो न भवति तत्प्रतिबिंबत्वात् यथा सूर्यप्रतिबिंबो न सूर्याभिन्न इत्यत्यन्तभेदप्रतिपादकप्रबलानेकश्रुतिसहकृतानुमानविरोधात् । अतो जीवस्य परमात्मप्रतिबिंबत्वेन तदभेदायोगाद्भक्तिरुपपन्नैवेति । **सूत्रार्थस्तु, अत एव च**=भिन्नत्वतदधीनत्वतत्सादृश्यैरेव **सूर्यकाद्युपमा**नोपाध्यधीनत्वादिनेति भावः ॥ **इत्युपमाधिकरणम् ॥ १० ॥**

## अथांबुवदधिकरणम् ॥ ११ ॥

**सू ॥ अंबुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥** नित्यानन्दज्ञानादेस्सादृश्यस्य नित्यसिद्धत्वान्न भक्तिज्ञानादिना प्रयोजनमित्यतो भक्तिः कर्तव्येति **पूर्वपक्षः । सिद्धान्तस्तु,** अंबुवत् स्नेहेन ग्रहणं ज्ञानं हि भक्तिः । तां विना भगवत्सादृश्यरूपं स्वरूपज्ञानादिकं न सम्यगभिव्यज्यते । अतस्तत्सम्यगभिव्यक्तये भक्त्याद्यपेक्षावश्यकीति । **सूत्रार्थस्तु,**

## अथ प्रकृतैतावत्त्वाधिकरणम् ॥ ६ ॥

उभयलिङ्गासंभवमाशंक्याह—

**सू ॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २१ ॥**

पूर्वत्र ब्रह्मण उभयलिङ्गत्वं साधितम् । तद्बाधोऽस्ति न वेति संदिह्यते ॥

'द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च' इति पृथिव्यप्तेजोवाय्वाकाशात्मक-मूर्तामूर्तप्रपञ्चरूपत्वं ब्रह्मण उक्त्वा, 'अथात आदेशो नेतिनेति' इति श्रूयते । अत्रेतिशब्दस्य पूर्वप्रकृतपरामर्शित्वात् ब्रह्मणः पूर्वप्रतिपादितं मूर्तामूर्तप्रपञ्च-रूपत्वं निषिध्यते ॥

## अथ प्रकृतैतावत्त्वाधिकरणम् ॥ ६ ॥

एतदधिकरणसिद्धार्थविषयाक्षेपसमाधानत्वेनोत्तराधिकरणमवतारयति—उभयलिंगेति । सू ॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २१ ॥ पूर्वत्रेति । 'अथात आदेशो नेति नेती' ति निषेधस्य पूर्वप्रकृतमूर्तामूर्तप्रपञ्चात्मकब्रह्मरूपविषयता-यामुभयलिंगत्वबाधः प्रकृतेयत्ताविषयतायां न तद्बाध इति तद्विषयानवधारणात्संशयः । अत्रेति । 'नेति नेती' त्यत्रेतिशब्दपरामृष्टस्य नञा निषेध इति तावन्निर्विवादम् । इतिशब्दः प्रकारवाची पूर्वप्रकृतं प्रकारं परामृशेत् । पूर्वञ्च 'द्वे वाव ब्रह्मणो रूपे' इ-त्यादौ मूर्तामूर्तप्रपंचात्मकं ब्रह्मणः प्रकारद्वयं प्रकृतम् । अतस्तन्निषिध्यत इति युक्तम् । 'नेति नेती' ति वीप्सायां द्विरुक्तिः पूर्वप्रकृतस्य रूपद्वयस्य साकल्येन निषेधप्रत्याय-नार्था । अथवैकेन मूर्तप्रपञ्चस्य निषेधोऽपरेणामूर्तप्रपंचस्येति द्विर्वचनसाफल्यम् । प्रकृते-यत्ता निषिध्यत इति तु न युक्तम् । रूपद्वयवत्तस्याः प्रकृतत्वाभावाद्रूपद्वयनिषेध इव तन्निषेधे द्विर्वचनस्य साफल्याभावाच्च । न च वाक्यशेषे अधिकगुणजातविधानं प्रकृते-यत्तानिषेधानुगुणं दृश्यत इति वाच्यम् । तदसिद्धेः । 'न ह्येतस्मा' दिति वाक्ये प्रकृतब्रह्मा-पेक्षयोत्कृष्टं निषिध्यत इति ब्रह्मणस्सर्वोत्तरत्वगुणप्रतिपादकवाक्यशेष इति चेन्न । तस्य पूर्ववाक्यार्थानुगुण्येन ब्रह्मान्यसर्वनिषेधकत्वोपपत्तेः । तथा स 'त्यन्यत्पर' मिति च पद-

---

सादृश्यार्थो वतिः । सादृश्यं स्नेहाख्यविशेषणेन विवक्षितम् । तथा च यतः **अंबुवदग्रहणात्**=स्नेहसहितमाहात्म्य-ज्ञानाभावात् । भक्तिं विनेति यावत् । **तथात्वम्**=सुखाद्यात्मकत्वरूपेश्वरसादृश्यं **न तु** सम्यग्व्यज्यते । अतो भक्तिरेव सम्यक्स्वरूपाभिव्यक्तिजनिकेति तदर्थं सा कर्तव्येत्यर्थः ॥ **इत्यंबुवदधिकरणम्** ॥ ११ ॥

### अथ वृद्धिह्रासाधिकरणम् ॥ १२ ॥

**सू ॥ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्** ॥ २० ॥ अत्र सा भक्तिः पुरुषेषु किं तारतम्येन वर्तते उतैकप्रकारेति **संशये** एकप्रकारेति **पूर्वपक्षः** । **सिद्धान्तस्तु** अस्याश्च भक्तेरधिकारिषु तारतम्यमस्ति । ब्रह्मादी-नामुत्तमफलानामस्मदादीनामल्पफलानां चाधिकारान्तर्भावात् । एवं सत्येवोभयान्प्रति विषमफलदातुरीश्वरस्य सामञ्जस्यं स्यादिति । **सूत्रार्थस्तु,** वृद्धिह्रासभाक्त्वम्=भक्त्यादेस्साधकेष्वाधिक्यन्यूनता । नेत्यनुवर्तते । न तावदत्राङ्गीकर्तव्यम् । कुतः । अन्तर्भावात्=महदल्पफलवतां ब्रह्मादीनामन्येषां च भक्तत्वेऽन्तर्भावात् । तथा पि कुतो वृद्धिह्रासभाक्त्वम् । **एवं** भक्तितारतम्ये सत्येवो**भयसामञ्जस्यात्**=उभयान्महदल्पफलान्ब्रह्मादिजीवान्प्रतिफलदातुरीश्वरस्य सामञ्जस्याद्वैषम्येण फल-दानस्य भक्तितारतम्येन युक्तत्वात् अन्यथा अयुक्तत्वात् । अतस्तदङ्गीकार्यमित्यर्थः ॥

**सू ॥ दर्शनाच्च** ॥ २१ ॥ 'अथात' इति श्रुतौ 'यथे' ति स्मृतौ च फलतारतम्यदर्शनादुक्तत्वाच्चोक्तं युक्तमित्यर्थः ॥ **इति वृद्धिह्रासाधिकरणम्** ॥ १२ ॥

**इति सूत्रार्थचन्द्रिकायामुभयलिंगाधिकरणम् ॥ ६ ॥**

**इति प्राप्ते ब्रूमः—'नेति नेति' इति पूर्वसिद्धं ब्रह्मणः प्रपञ्चरूपत्वं न निषिध्यते, अप्रज्ञातत्वेन विहितस्यास्य प्रतिषेधायोगात्। किंतु, प्रकृतैतावन्मात्रं ब्रह्म न भवतीति प्रकृतैयत्तामेव 'नेति नेति' इति प्रतिषेधतीति युक्तम्। यतश्च पश्चात् पूर्वमनुक्तं भूयो गुणजातं ब्रवीति। 'न ह्येतस्मादिति नेत्यन्यत् परमस्ति अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्' इत्यादिना। अत्र 'न ह्येतस्मात्' इति वाक्येन 'नेति नेति' इति निर्दिष्टात् ब्रह्मणोऽन्यन्नास्त्युत्कृष्टमित्युच्यते। अथ नामधेयमुच्यते—सत्यस्य सत्यमिति। तदर्थनिर्वचनं तु—"प्राणा वै सत्यं तेषामेष सत्यम्" इति। प्राणा जीवात्मानः सत्यं वियदादिवदुत्पत्त्यभावात्। तेभ्यः सत्येभ्यो ह्येष सत्यम्; तद्वत् ज्ञानसंकोचाद्यभावात्। अतः प्रकृतधर्मैयत्ताप्रतिषेधपरत्वात् 'नेति नेति' इति वाक्यस्य ब्रह्मणः पूर्वसिद्धमुभयलिङ्गत्वं न हीयत एव ॥**

---

द्वयं व्यर्थं स्यादिति चेन्न। तत्रापि तुल्यत्वात्। ब्रह्मापेक्षयोत्कृष्टं नास्तीत्युत्कृष्टनिषेधविविक्षायामपि ह्यन्यदिति व्यर्थमेव। ततोऽन्यस्यैव तदपेक्षयोत्कृष्टत्वप्रसक्त्या तन्निषेधस्यार्थवत्त्वात्। अतः परशब्दस्यापि व्यतिरिक्तार्थत्वमंगीकृत्य प्रतिभासतः केवलं ब्रह्मणः परमस्ति वस्तुतस्तु ततोऽन्यत्तु परं नास्तीत्येवमर्थतया तत्पदद्वयं संगमयितव्यम्। अत एव 'प्राणा वै सत्यं तेषामेष सत्य' मिति तदनन्तरं श्रूयते। तत्र प्राणशब्देनेन्द्रियवाचिना तद्विषया लक्ष्यंते। ते तावत् 'सन्घट' इत्याद्यनुभवदर्शनात्केवलं प्रतिभासतः सत्यभूताः। ब्रह्म तु वस्तुतोऽपि सत्यम्। तदपेक्षयोत्कृष्टं सत्यमिति। अथवा। सन्मृत्पिण्डः सन्घटः सत्कपालं सच्चूर्णमित्यादिप्रत्ययविषया मृत्पिण्डघटकपालादयो व्यावर्तमानसत्याः। ब्रह्म तु सर्वेष्वप्येतेषु प्रत्ययेषु सत्सदिति प्रत्ययवेद्यमनुगतं सत्यम्। व्यावर्तमानाश्चानुवर्तमाने कल्पिता दृष्टाः यथा रज्ज्वदमंशे स्रक्सर्पभूदलनादयः। अतो व्यावर्तमाना घटादयः केवलं प्रतिभासतस्सत्या इति तेषामुत्कृष्टं सत्यं पारमार्थिकं ब्रह्मेति। अतः प्रपञ्चनिषेधान्निर्विशेषं ब्रह्म नोभयलिंगमिति पूर्वः पक्षः। सिद्धान्तस्तु प्रमाणान्तराप्रतिपन्नतया पूर्ववाक्ये श्रुत्यैव विहितं ब्रह्मणो मूर्तामूर्तप्रपञ्चवैशिष्ट्यं तदनन्तरवाक्येन निषेद्धुं न शक्यते। पूर्वापरग्रन्थव्याहतिप्रसंगात्। षोडशिग्रहाग्रहवद्वस्तुनि विकल्पासम्भवात्। अतः पूर्वं मूर्तामूर्तप्रपञ्चवैशिष्ट्योक्त्या बुद्धिस्थः प्रकृतैयत्तारूपः प्रकारो निषिध्यत इति युक्तम्। मूर्तामूर्तप्रपञ्चविशिष्टं ब्रह्मेत्येतावन्मात्रं न भवति। किन्तु अधिकमपि गुणान्तरवत्त्वमस्तीति। वीप्सा त्वादरार्थत्वेन योजनीया। तदेव गुणान्तरं 'न ह्येतस्मा' दिति वाक्यशेषेण प्रतिपाद्यते। रूपतया विशेषणभूतान्मूर्तामूर्तादचेतनप्रपंचात्परमुत्कृष्टं ब्रह्मैव ततोऽन्यदस्मात्प्रपंचादुत्कृष्टं नास्तीति तस्यार्थः। तेन समनिषेधः फलितः। अतो नान्यपदवैयर्थ्यम्। ननु कथमयं समनिषेधः अस्त्येव हि भूतवशिनां योगसिद्धानां मुक्तानाञ्च ब्रह्मवदेव मूर्तामूर्तप्रपञ्चरूपत्वेन प्रपञ्चादुत्कृष्टत्वमित्याशंकानिराकरणार्थं नामधेयोक्तिपुरस्सरं तन्निर्वचनम्। तत्र प्राणशब्देन प्राणाधिष्ठातारो जीवा लक्ष्यन्ते। ते तावत्सत्यभूता अविकाराः। वियदादिवत्स्वरूपान्यथाभावरूपोत्पत्त्यभावात्। तेषामप्युत्कृष्टं सत्यमविकारात्मकं ब्रह्म। जीववज्ज्ञानसंकोचविकासात्मिकाया धर्मान्यथाभावरूपाया

ननु सन् घटः सन् पट इत्यादिष्वनुवृत्तं सद्रूपं ब्रह्म सत्यम् । अन्यत् व्यावर्तमानं घटादिकं 'नेति नेति' इति प्रतिषेधति श्रुतिरित्यत आह—

सू ॥ तदव्यक्तमाह हि ॥ २२ ॥

ब्रह्मस्वरूपं प्रत्यक्षादिना प्रमाणान्तरेण नाभिव्यज्यते । 'न संदृशे तिष्ठति रूपमस्य । न चक्षुषा पश्यति कश्चनैनम् । हृदा' इत्यादिना यतः श्रुतिराह अतः प्रत्यक्षादिना सिद्धा सत्ता न ब्रह्मेति ॥

ब्रह्मस्वरूपग्रहणे हेतुमाह–

सू ॥ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २३ ॥

अपि तु ध्यानरूपज्ञानेन सम्यगाराधने ब्रह्मस्वरूपं गृह्यते । ये ब्रह्मभाविता ब्रह्मोपासते, तेषां ब्रह्मस्वरूपं ग्रहणयोग्यं भवतीति श्रुतिस्मृतिभ्यामवगम्यते–

'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥' इति ।
'ततस्तु तं पश्यते निष्कलं ध्यायमानः' इत्यादिका श्रुतिः ।
स्मृतिरपि–'नासौ प्रत्यक्षविषयः' इत्यादिका ॥

सू ॥ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २४ ॥

अप्युत्पत्तेरभावात् । ततो योगिनां मुक्तानां च ज्ञानविकासानन्तरं मूर्तामूर्तप्रपञ्चरूपत्वसद्भावेऽपि प्राक् ज्ञानसंकोचकाले तन्नास्तीति सार्वदिकमूर्तामूर्तरूपत्वशालि ब्रह्म यथा प्रपञ्चादुत्कृष्टं न तथा जीवा इत्यभिप्रायः । एवमर्थवर्णन एव 'द्वे वाव ब्रह्मणो रूपे' इत्याद्युपक्रमानुगुण्यं 'नित्यो नित्यानां चेतनश्चेतनाना' मित्यादिश्रुत्यन्तरानुगुण्यं च लभ्यते इति । 'अथ प्राणा वै सत्य' मित्यादिवाक्यशेषस्य पूर्वपक्ष्यभिमतार्थनिराकरणार्थत्वेनोत्तरसूत्रमवतारयति–नन्विति । तदव्यक्तमाह हि ॥२२॥ न ब्रह्मेति । किंतु ब्रह्मशक्तिरूपा प्रपञ्चोपादानत्वेन तत्तादात्म्यापन्ना सत्तेत्यर्थः । सू० ॥ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २३ ॥ 'अपित्वि'ति शब्दो न चक्षुषा पश्यतीति व्यावर्तितात्साधनान्तरात्संराधनस्य विशेषप्रदर्शनार्थः । ध्यानयज्ञेनाराधनस्य सम्यक्त्वं परमेश्वरप्रसादलभ्यतद्विषयदृढभक्तिपूर्वकत्वम् । ब्रह्मभाविताः ब्रह्मणैव भाववन्तः स्वविषयदृढभक्तिमन्तः कृताः । ब्रह्मभाववच्छब्दा'त्तत्करोती'ति णिचि णाविष्ठवद्भावात् 'विन्मतोर्लुगि'ति मतुब्लोपे ण्यंतात्कर्मणि क्तप्रत्यये 'निष्ठायां सेटी' ति णिलोपे च सति ब्रह्मभाविता इति रूपम् । नायमात्मेति । प्रवचनं बहुवेदपरिश्रमः । मेधा बहुविद्याधारणसमर्था धीः । बहुश्रुतं तर्कमीमांसादिपरिश्रमः । एषः परमात्मा यं नित्यनैमित्तिकाद्यनुष्ठानेन मलपाकवशेन च शुद्धान्तःकरणं वृणुते स्वकीयत्वेन परिगृह्णाति मद्भक्त्या कृतार्थोऽयं भवत्विति कटाक्षयति । तेनैव लभ्यः दृढभक्तिविषयत्वेन प्राप्यः तस्यैव पुरुषधौरेयस्य स्वां तनुं सच्चिदानंदलक्षणां विवृणुते प्रकाशयतीत्यर्थः । ध्यायमान इति हेतौ शानच्प्रत्ययः । ध्यानेन पश्यतीत्यर्थः । सू ॥ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २४ ॥

(१) 'सर्वप्रपञ्चरूपत्व' इति ख० पाठः ।

**अविच्छिन्नानुध्यानसंराधनेन येषां ब्रह्म प्रकाशते तेषां तेन ब्रह्मदर्शनेन विषयीकरणे तज्ज्ञानानन्दादेर्जगदैश्वर्यस्य च वैशेष्यं नास्ति। तथा हि दृश्यते। 'अहं मनुरभवं सूर्यश्च' 'तं मामायुरमृतमित्युपास्स्व' इत्यादिषु ब्रह्मोपासकानां तेन भावनैक्येन तदसाधारणगुणप्राप्तिः। 'दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्' इत्यादिषु हि कृष्णादीनां तदैक्यभावनया तदैश्वर्यप्रकाशनं दृश्यते, ब्रह्मभावनाभ्यासेन च विश्वामित्रागस्त्यादीनां स्वर्गान्तरकरणजलधिकबलनादिसामर्थ्यम्। लोके च मन्त्रिणां गरुडभावनया गरुडासाधारणधर्मप्राप्तिः। तस्मात् ब्रह्माहन्तायाः प्रौढभावे सति ब्रह्मासाधारणधर्मांशवैशिष्ट्यमुपासकानामसाधारणमित्यनवद्यम्। अतो घटादिष्वनुवृत्तं सन्मात्रं प्रत्यक्षं ब्रह्मेति विरुद्धमेव। तस्मात् साक्षात्कारहेतूनां निदिध्यासनादीनां वैयर्थ्यप्रसङ्गात् अप्रत्यक्षेऽपि तादृशि तल्लिङ्गादर्शनाच्च, अतः सन्मात्रं प्रत्यक्षं ब्रह्म तद्-**

---

प्रकाशादिवत् ब्रह्मोपासनया साक्षात्कृतब्रह्मणां ज्ञानानन्दादेरिव जगदैश्वर्यस्याप्यवैशेष्यं भवति। यथा तेषां ज्ञानानन्दादेर्ब्रह्मज्ञानानन्दादादितो विशेषाभावः तथा तेषां जगदैश्वर्यस्यापि ब्रह्मणो जगदैश्वर्यात् विशेषाभावो भवति। अत एव भगवतः कृष्णस्योपासनाकर्मण्यभ्यासात् चिरनिरन्तरैकाग्र्यात् ब्रह्मसाक्षात्कारेण तद्वज्जगदैश्वर्यप्राप्त्यार्जुनाय तत्प्रकाशनं गीतासु दृश्यते। अगस्त्यविश्वामित्रादीनां च जलधिपानस्वर्गान्तरकरणादिसामर्थ्यप्रकाशनं पुराणेषु दृश्यते। न चैतदसंभावितम्। लोकेऽपि गारुडमन्त्रोपासकानां गरुडभावनया तदसाधारणधर्मस्य दर्शनमात्रेण विषसंहरणसामर्थ्यस्य प्राप्तिदर्शनात्। तस्माद्गरुडाहंभावनया गरुडासाधारणकियदर्थप्राप्तिवद्ब्रह्माहंभावेन ब्रह्मासाधारणकियद्धर्मप्राप्तिर्युक्तैवेति सूत्राभिप्रायमाह–अविच्छिन्नेत्यादिना। ननु पूर्वसूत्रे ब्रह्मसाक्षात्कारस्य कारणमुक्तमस्मिन्सूत्रे कार्यमुक्तं नानयोरुपयोगः प्रकृते दृश्यत इत्याशंक्याव्यक्तत्वहेतुना ब्रह्मणः 'सन्घट' इत्यादिप्रत्यक्षविषयत्वे निराकृते तत्र हेत्वंतरप्रदर्शनपरत्वेनोपयोगं दर्शयन्सूत्रद्वयार्थमुपसंहरति–अत इति। यतः पामराणामपि भवतः। 'सन्घट' इत्यादिप्रत्यक्षस्य ब्रह्मसाक्षात्कारे क्लृप्तमुपासनारूपं कारणं नास्ति। यतश्च सर्वज्ञानानन्दैश्वर्यविशेषाविर्भावरूपं तत्कार्यं नास्ति। अतोऽपि हेतोर्न ब्रह्मणस्तद्विषयत्वमित्यर्थः। नन्वस्य सूत्रस्य ब्रह्मसाक्षात्कारकार्योपन्यासमुखेनोक्तसाध्ये हेत्वन्तरप्रदर्शनपरत्वे ज्ञानानंदैश्वर्यविशेषाविर्भावस्य तत्कार्यत्वमात्रमुपन्यसनीयम्। किमर्थमाविर्भवतां तेषां ज्ञानादीनां ब्रह्मज्ञानाद्यवैशेष्यमप्युपन्यस्तम्? उच्यते। 'नेतिनेती' त्यत्र प्रकृतैतावत्त्वस्य निषेधो न रूपवत्त्वस्येति प्रधानसाध्येऽप्यानुषंगिकहेत्वन्तरलाभार्थं ब्रह्मसाक्षात्कारवतां यदैश्वर्यमाविर्भवति तद्ब्रह्मसाम्यरूपमिति वक्तव्यम्। 'निरञ्जनः परमं साम्यमुपैती' ति श्रुतेः। अतो यथा तेषामाविर्भवज्ज्ञानानन्दरूपत्वं ब्रह्मणः स्वीक्रियते एवं जगदैश्वर्यमपि तस्य स्वीकार्यमिति हेत्वन्तरं तेन प्रदर्श्यते। तदर्थमेव ज्ञानानन्दयोरप्यैश्वर्यवत् ब्रह्मसाक्षात्कारकार्यत्वे तुल्यवदुपन्यसनीयेऽपि प्रकाशादिवदिति तयोर्दृष्टान्ततयोपादानं साम्यमित्येतावति वक्तव्ये अवैशेष्यमित्यनृजुवचनमपि तदर्थमेव। अन्यथा ज्ञानानंदाभ्यामेव साम्यमस्तु माभूदैश्वर्यतोऽपि साम्यमिति शंका स्यात्। अनृजूक्तौ तु परमं साम्यमिति श्रुत्यर्थसूच-

न्यत् सर्वं निषेधति नेति नेतीति न युक्तमेव ॥

सू ॥ अतोऽनन्तेन तथा हि लिङ्गम् ॥ २५ ॥

यतो ब्रह्मोपासीनानामपि तदसाधारणज्ञानानन्दपरमैश्वर्यादिकं प्रकाशते, अतो 'द्वे वाव ब्रह्मणो रूपे' इत्यादिनाभिहितेनानन्तेन कल्याणगुणेन योगो ब्रह्मणः सिद्ध एव । तस्मादुभयलिङ्गं ब्रह्मेति ॥

ननु 'द्वे वाव ब्रह्मणो रूपे' इत्यादिनोक्तं प्रपञ्चस्य ब्रह्मरूपत्वं ब्रह्मप्रपञ्चयोराध्यासिकसंबन्धेनैव निर्वाह्यम्, विधान्तरेण तन्निर्वाहासंभवात् । ततश्च 'अथात आदेशो नेति नेति' इत्यस्य अध्यस्तप्रपञ्चनिषेधपरत्वमेव युक्तमित्याशङ्क्य विनाप्यध्याससंबन्धं स्वाभिमतेन प्रकारेण तन्निर्वाहं वक्ष्यन् प्रथमं पक्षान्तरमाह

सू ॥ उभयव्यपदेशात् त्वहिकुण्डलवत् ॥ २६ ॥

'सर्वो वै रुद्रः' 'द्यावापृथिवी जनयन् देव एकः' इत्येकत्वबहुत्वव्यपदेशादहेः कुण्डलभावर्जुभाववत् परमेश्वरस्यैव 'द्वे वाव ब्रह्मणो रूपे' इत्यादिनोक्तः पृथि-

---

नात्सा शङ्का निवर्तते । सर्वैरपि गुणैः किंचित्किञ्चित्साम्यं हि परमं साम्यं न तु येन केनचिद्गुणेन किञ्चित्साम्यम् । प्रकाशादिवच्चेति चकारोऽपि तदर्थः । न केवलं ज्ञानानन्दसाम्यमात्रेण परमसाम्यनिर्वाहः । अपि त्वैश्वर्यसाम्येनापीति समुच्चयस्तदर्थः । द्वितीयश्चकारस्त्वर्थः तदुपासनया तद्धर्मप्राप्त्यसंभवशंकानिराकरणार्थः । अमुमेवानुषंगिकं हेतुं परामृशन् अनेन प्रकृतसाध्यसिद्धिं दर्शयति सूत्रकारः—सू० ॥ अतोऽनन्तेन तथा हि लिंगम् ॥ २५ ॥ उपासीनानामपीत्यपिशब्देन उपास्यस्यापि परमसाम्यं श्रुतिप्राप्तं तत्क्रतुन्यायप्राप्तं च ज्ञानानन्दरूपत्वस्येवैश्वर्यस्याप्यभ्युपगन्तव्यत्वं द्योत्यते । 'इत्यादिने'त्यादिशब्देन ब्रह्मणः कल्याणगुणजातप्रतिपादकं सर्वं वचनजातं गृह्यते । 'अनन्तेने'त्यस्य कल्याणगुणेनेति विशेष्योपादानेन 'अथवानन्तकल्याणगुणैकघन ईश्वरः । शिव इत्युच्यते सद्भिश्शिवतत्वार्थवेदिभिः' । इति वचनार्थं मनसि निधाय सूत्रकृतानन्तशब्दः प्रयुक्त इति द्योतितम् । 'तथा हि लिंग' मिति सूत्रशेषं व्याचष्टे—तस्मादिति । अनेन 'तथा ही' त्यस्य तथासति हीत्यर्थो लिंगमित्यस्य 'पीता गावो भुक्ता ब्राह्मणा' इतिवदर्शआद्यच्प्रत्ययान्तत्वेनोभयलिंगमित्यर्थश्च दर्शितो भवति । निर्विशेषब्रह्मवादेऽपि निर्दोषत्वांशस्सम्प्रतिपन्न इति गुणवत्त्वप्रसाधनमुखेनोभयलिंगत्वोपसंहारः कृतः । उत्तरसूत्रमवतारयितुमाशङ्कते—नन्विति । यद्यपि 'अंशो नानाव्यपदेशा' दित्यधिकरणे चित्प्रपञ्चस्य ब्रह्मापृथक्सिद्धविशेषणतारूपांशत्वसमर्थनादचित्प्रपञ्चस्यापि तथात्वं तुल्यन्यायतया सिध्यति । 'सर्वो वै रुद्रः' 'सर्वं खल्विदं ब्रह्मे' त्यादिश्रुत्यन्तरेषु तुल्यवदुभयोरपि ब्रह्मविशेषणत्वेनोपादानात् । विशिष्यैवाचित्प्रपञ्चस्य ब्रह्मशक्तिपरिणामित्वेन तदपृथक्सिद्धविशेषणतालक्षणतासंबंधः प्रकृत्यधिकरणादिषु सिद्धः, तथापि मतान्तरोपन्यासपूर्वकं स्वमते विशेषप्रदर्शनेन स्वमतपरिशुद्धिसिद्ध्यर्थोऽयमारंभ इत्याशयः । सू० ॥ उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २६ ॥ अहेरिति । यथा ह्यहेरहित्वेनाभेदेऽपि कुण्डलभावऋजुभावरूपसंस्थानविशेषापत्त्या भेदः एवं ब्रह्मणः स्वरूपेणाभेदेपि कार्यप्रपञ्चरूपापत्त्या भेद इत्यर्थः । न चाहेर्विश्रान्तिसंचारादिप्रयुक्तभोगविशेषार्थं कुण्डलभावऋ-

व्यादिभावसंस्थानविशेषः ॥

## सू ॥ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २७ ॥

प्रकाशतदाश्रययोर्यथा स्वरूपभेदेऽपि तेजस्त्वयोगेनैक्यम्, एवमचिद्ब्रह्मणोरेकजातियोगेनेति वा तस्य पृथिव्यादिभावः ॥

## सू ॥ पूर्ववद्वा ॥ २८ ॥

वाशब्दः पक्षद्वयव्यावृत्त्यर्थः । यथा पूर्वत्र प्रकाशजातिगुणशरीरवद्विशेषणतैकस्वभावतया विशिष्टैकदेशत्वेनांशत्वमुक्तं चिद्वस्तुनः, एवमचिद्वस्तुनोऽपि । 'सर्वो वै रुद्रः' इति चिदचिद्वस्तुनोरेकेन शब्देनाभिधानं हि शक्यमेकरूपभूतयोः पूर्वोक्तसंबन्धे सत्येव । इतरपक्षद्वये ब्रह्मणः सदोषत्वं दुर्वारम् । 'यस्य पृथिवी शरीरं, यस्यात्मा शरीरम्' इत्यादिश्रुतेः,

'विद्येति चेतनां प्राहुस्तथाऽविद्यामचेतनाम् ।
विद्याविद्यात्मकं सर्वं विश्वं विश्वगुरोर्विभोः ।
रूपमेव न संदेहो विश्वं तस्य वशे यतः ॥'

इत्यादिपुराणवचनप्रामाण्याच्च चिदचिद्वस्तुनोरष्टमूर्तेर्ब्रह्मणः शरीरता च सिद्धा ।

## सू ॥ प्रतिषेधाच्च ॥ २९ ॥

'नास्य जरयैतज्जीर्यति' 'अस्थूलमनण्वह्रस्वम्' इत्यादिषु चिदचिदात्मत्वेऽपि ब्रह्मणस्तद्धर्मप्रतिषेधाच्च चिदचिद्विशिष्टमपि ब्रह्म निर्दोषं निखिलमङ्गलगुणास्पदं च । एतदुक्तं भवति—चिदचितोः कारणत्वेऽपि तद्विशिष्टत्वेऽपि ब्रह्मणः शिवस्य विकाराज्ञत्वाद्यपुरुषार्थधर्मरहितत्वं सर्वज्ञत्वनित्यतृप्तत्वानादिबोधत्वस्वतन्त्रत्वा-

---

ज्ञुभावापत्तिर्भवतीति युक्तं, ब्रह्मणस्तु सर्वज्ञस्य सर्वशक्तेर्ज्ञानानन्दरहिताचित्प्रपञ्चतापत्तिर्न युक्तेति वाच्यम् । न ह्यहिवत् ब्रह्म स्वप्रयोजनार्थं प्रवर्तते किन्तु प्राणिनामनुग्रहार्थम् । तदनुग्रहश्च भोगानुष्ठानाद्युपयुक्ताचित्प्रपञ्चात्मतापत्तावेव भवतीत्यभिसन्धाय तदात्मतामापद्यत इति भावः । सू० ॥ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २७ ॥ यथा प्रभाप्रभावतोर्भेदेऽपि एकजातियोगात् सर्वमिदं तेज इति व्यवहारः तथा सर्वं खल्विदं ब्रह्मेत्यादिव्यवहार इत्यर्थः । यद्यपि धान्यराशौ सर्वोऽयं व्रीहिरित्यादिव्यवहारोऽप्युदाहर्तुं शक्यते तथापि ब्रह्मप्रपञ्चयोराश्रयाश्रयिभावरूपविशेषसत्वात्तदनुगुणदृष्टान्तोपादानम् । सू ॥ पूर्ववद्वा ॥ २८ ॥ इतरपक्षद्वय इति । आद्यपक्षे ब्रह्मणः परिणामित्वं जडत्वं चेति दोषद्वयं द्वितीयपक्षे ब्रह्मत्वजात्याश्रयत्वेन प्रपञ्चोऽपि ब्रह्मेति तत्रापि तद्दोषद्वयं प्रादुःष्यात् । तथा च ब्रह्मनिर्दोषत्वप्रतिपादकसकलश्रुतिविरोध इत्यर्थः । शरीरशरीरिभावस्तु ब्रह्मप्रपञ्चयोस्सकलश्रुतिपुराणाद्यनुगुण इत्याह—यस्य पृथिवीति।सू०॥प्रतिषेधाच्च ॥ २९ ॥ प्रपञ्चशरीरकत्वे सत्येव हि ब्रह्मणस्तत्प्रयुक्तदोषप्रसक्तौ तत्प्रतिषेधश्रवणमुपपद्यते । अतस्तत्प्रतिषेधश्रवणात् सर्वप्रपञ्चशरीरकं ब्रह्म तत्प्रयुक्तदोषरहितञ्च गुणविरोधिदोषराहित्यात् सकलमंगलगुणास्पदं चेति सूत्राभिप्रायमाह—नास्येति ॥ इति प्रकृतै-

( १ )'त्युपयुक्तप्रपञ्चात्मता' इति. ख० पाठ.० ।

**लुप्तशक्तित्वानन्तशक्तित्वादिपरमपुरुषार्थधर्मवत्त्वं च नित्यसिद्धमेवेति ॥**

**इति प्रकृतैतावत्त्वाधिकरणम् ॥ ६ ॥**

**तावत्त्वाधिकरणम् ॥ ६ ॥**

## नयमणिमालायाम्

### अथ प्रकृतैतावत्त्वाधिकरणम् ॥ ६ ॥

**सू० ॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २१ ॥ तदव्यक्तमाह हि ॥ २२ ॥ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २३ ॥ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २४ ॥ अतोऽनन्तेन तथाहि लिंगम् ॥ २५ ॥ उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २६ ॥ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २७ ॥ पूर्ववद्वा ॥ २८ ॥ प्रतिषेधाच्च ॥ २९ ॥**

न ब्रह्मोभयलिंगं तद्धि मितं निर्विशेषसन्मात्रम् । तद्रूपस्य निषेधात्सर्वस्य च नेति नेतीति ॥ १८९ ॥
न च तच्छ्रुत्या ब्रह्मणि विहितं येनानिषेध्यं स्यात् । सन्घट इत्यादिधिया सति तस्य ब्रह्मणि प्रसक्तत्वात् ॥ १९० ॥
एवमनुवर्तमाने सद्रूपे ब्रह्मणि प्रतीतमिदम् । व्यावर्तमानमखिलं कल्पितमिति तस्य सद्रूपम् ॥ १९१ ॥
आध्यासिकसंबन्धं विना च तद्रूपतास्तु किं तस्य । अहिकुण्डलतादिनये परिणामित्वादयो हि दोषाः स्युः ॥ १९२ ॥
मैवं प्रकृतेयत्ताप्रतिषेधो नेतिपदबोध्यः । प्रायो गुणोपदेशात् विहितप्रतिषेधनस्य चायोगात् ॥ १९३ ॥
अव्यक्तं ब्रह्म तन्नः स्फुरति विषयधीष्वस्य संराधने स्यात् प्रत्यक्षं गाहते तत्त्वखिलमपि गुणं सच्चिदानन्दतुल्यम् ।
किंचैश्वर्यांशमस्य स्वयमपि दधते योगिनः कौशिकाद्याः प्रौढ्या तद्भावनायास्तदपि युततयैवास्य रूपं प्रपञ्चः॥१९४॥

### इति प्रकृतैतावत्त्वाधिकरणम् ॥ ६ ॥

## सूत्रार्थचन्द्रिकायाम्

### अथ प्रकृतैतावत्त्वाधिकरणम् ॥ ६ ॥

**सू ॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २१ ॥ तदव्यक्तमाह हि ॥ २२ ॥ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २३ ॥ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २४ ॥ अतोऽनन्तेन तथाहि लिंगम् ॥ २५ ॥ उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २६ ॥ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २७ ॥ पूर्ववद्वा ॥ २८॥ प्रतिषेधाच्च ॥ २९ ॥**

**भगवत्पादमते,** पूर्वं निषेधश्रुतिभिर्ब्रह्म निर्विशेषं सिध्यतीत्युक्तमयुक्तं ताभिर्ब्रह्मणोऽपि निषिद्धत्वादित्याक्षेपसंगत्येदमाह–**सू ॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २१ ॥** 'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च' इत्युपक्रम्य 'अथात आदेशो नेति नेति' इति श्रूयते । तत्र किं प्रपञ्चो ब्रह्म चेत्युभयमपि निषिध्यते उत **एकम्** । एकमित्यत्रापि प्रपञ्चो ब्रह्म वेति **संदेहः** । नियामकाभावादुभयमपीति **पूर्वपक्षः** । अथवा प्रपञ्चस्य प्रत्यक्षत्वेन निषेधासंभवान्निरवधिकनिषेधायोगादेकं ब्रह्मैव निषिध्यत इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** प्रकृतं प्रधानम् एतावत्त्वमियत्तापरिच्छिन्नं यद्ब्रह्मणो रूपद्वयं तत्प्रकृतैतावत्त्वम् । तदेव प्रतिषेधति 'नेति नेति' इत्यादिश्रुतिः । इतिशब्दस्य प्रधानत्वेन प्रकृतरूपद्वयपरामर्शित्वात् । ब्रह्म तु न प्रधानत्वेन प्रकृतम् । 'द्वे वाव ब्रह्मणो रूपे' इति रूपद्वयात्मकजगदुपसर्जनत्वेनैवाभिहितत्वात् । इतश्च ब्रह्मणो न निषेधः । **हि**=यस्मात् । **ततः**=प्रपञ्चनिषेधानन्तरं **भूयः** 'न ह्येतस्मादिति नेत्यन्यत्परमस्ति' इति एतस्मात्=नेतिनेतीत्यादिष्टाद्ब्रह्मणः अन्यत् व्यतिरिक्तं नास्ति ब्रह्मैव तु परमस्तीत्येतन्निर्वचनवाक्यं ब्रवीति । यद्वा । ततः प्रपञ्चनिषेधस्य परस्तात् 'अथ नामधेयम्' इत्यादिवाक्यं ब्रह्म ब्रवीतीत्यर्थः । न च प्रपञ्चनिषेधे प्रत्यक्षविरोधः । तस्य व्यावहारिकप्रामाण्यादित्यर्थः ॥

ननु यदि ब्रह्मास्ति तर्ह्युपलभ्येत तत्राह—**सू ॥ तदव्यक्तमाह हि ॥ २२ ॥ तत्**=ब्रह्म । अव्यक्तं न व्यज्यते इत्यव्यक्तं प्रत्यक्षाद्यगोचरम् । **हि**=यतः 'न चक्षुषा गृह्यते नापि वाचा' इत्यादिश्रुतिराहेत्यर्थः ।

तर्हि सर्वदा ब्रह्मग्रहणाभावे मोक्षो न स्यादित्याह—**सू ॥ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २३ ॥ अपि**चैनं परमात्मानम् । **संराधने**=समाध्यवस्थायाम् । कृतार्थाः पश्यन्ति इति **प्रत्यक्षानुमानाभ्याम्**=श्रुतिस्मृतिभ्याम् । 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्' इत्यादिका श्रुतिः 'यं विनिद्रा जितश्वासाः संतुष्टास्संयतेन्द्रियाः । ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ॥' इति स्मृतिः ताभ्यामवगम्यत इत्यर्थः ।

**ननु जीवब्रह्मणोर्ध्यातृध्येयभावाङ्गीकारे** भेदः स्यादित्याशंक्याह—**सू ॥ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २४ ॥** यथा सौरः प्रकाशोऽङ्गुल्याद्युपाधौ कर्मणि भिन्न इव प्रतिभाति वस्तुतस्त्वेकरूपः तद्वत्प्र-

काशः परमात्मापि ध्यानाद्युपाधौ कर्मणि भिन्न इव भाति । वस्तुतस्तु **अवैशेष्यम्**=एकरूपत्वमात्मनः । कुतः । **अभ्यासात्**='तत्त्वमसि' इत्याद्यभेदश्रुत्यभ्यासादित्यर्थः ।

किंच । **सू ॥ अतोऽनन्तेन तथा हि लिंगम्** ॥ २५ ॥ अतश्च भेदस्यौपाधिकत्वाद्विद्यया भेदं विधूय जीवोऽनन्तेन परमात्मना एकतां गच्छति । **तथा हि लिंगम्**='स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' इत्याद्यपूर्वार्थज्ञापकमित्यर्थः ॥

इत्थं जीवब्रह्मणोः पारमार्थिकाभेदमभिधाय स्वमतपरिशुद्धये भेदाभेदवादमुपन्यस्यति–सू ॥ **उभयव्यपदेशात्त्वहिकुण्डलवत्** ॥ २६ ॥ ध्यातृध्येयभावादिना भेदस्याभेदस्य च श्रुतौ व्यपदेशाज्जीवेश्वरयोर्भेदाभेदौ भवतः । तुशब्दस्सिद्धान्तवैषम्यद्योतनार्थः । **अहिकुण्डलवत्**=अहेः संस्थानविशेषोऽहिकुण्डलम् । तयोरहित्वेनाभेदः कुण्डलत्वेन भेदो यथा तद्वदित्यर्थः ।

धर्मभेदेन भेदाभेदाविति पक्षमभिधाय एकधर्मावच्छेदेनैव भेदाभेदाविति पक्षान्तरमाह–सू ॥ **प्रकाशाश्रयवद्वा तेजस्त्वात्** ॥ २७ ॥ यथा सावित्रः प्रकाशः तदाश्रयश्च सविता तयोर्नात्यन्तभेदः, तेजस्त्वाविशेषात्, तथापि भेदश्च प्रतीयते । एवं च एकतेजस्त्वावच्छेदेनैव प्रमाणबलाद्भेदाभेदौ । तद्वज्जीवेश्वरयोर्भेदाभेदावित्यर्थः ।

ननु भेदस्य पारमार्थिकत्वे ज्ञाननिवर्त्यत्वासंभवान्मोक्षो न स्यात् । एकधर्मावच्छेदेन भेदाभेदयोरेकत्राङ्गीकारे लोके विरोधकथैव न स्यादित्यादिदोषजातं परमते मत्वा निरवद्यं स्वसिद्धान्तमाह–**सू** ॥ **पूर्ववद्वा** ॥ २८ ॥ 'प्रकाशादिवच्चावैशेष्यम्' इत्यत्र पूर्वं भेदः काल्पनिकः अभेदः पारमार्थिक इति यदुक्तं स एव सिद्धान्तोऽभ्युपेयः ।

किंच **सू** ॥ **प्रतिषेधाच्च** ॥ २९ ॥ 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिना शास्त्रेण परमात्मव्यतिरिक्तस्य चेतनस्य 'नेति नेती' त्यादिना शास्त्रेण प्रपञ्चस्य च प्रतिषेधात् ब्रह्माद्वितीयमित्ययमेव **सिद्धान्तः** । तस्माच्छ्रुतिबलान्निर्विशेषमेकमेव ब्रह्मेती सिद्धम् ॥

**श्रीकण्ठमते,** तथा **रामानुजमते** च 'अथात आदेशो नेति नेति' इत्यादिना पूर्वप्रकृतस्य मूर्तामूर्तप्रपञ्चस्य ब्रह्मणो रूपत्वप्रतिषेधान्निष्प्रपञ्चं सन्मात्रमेव ब्रह्म न पुनरुक्तस्वरूपमुभयलिंगमित्याशंक्याह—**सू** ॥ **प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः** ॥ २१ ॥ अत्र 'द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च' इति पृथिव्यप्तेजोवाय्वाकाशात्मकमूर्तामूर्तप्रपञ्चरूपत्वं ब्रह्मण उक्त्वा 'अथात आदेशो नेति नेति' इति श्रूयते । अनेन ब्रह्मण उभयलिंगत्वं निषिध्यते न वेति **संदेहः** । अत्रेतिशब्दस्य पूर्वप्रकृतपरामर्शित्वाद्ब्रह्मणः पूर्वप्रतिपादितं मूर्तामूर्तप्रपंचरूपत्वं निषिध्यत इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** मूर्तामूर्तप्रपंचस्य ब्रह्मणो रूपतया प्रमाणान्तराप्रज्ञातस्यात्रैव रूपतयोपदिष्टस्य निषेधासंभवात्प्रकृतैतावत्त्वं हि ब्रह्मणः प्रतिषेधति 'अथात आदेशो नेतिनेती' ति श्रुतिः । पूर्वप्रकृतैतावन्मात्रं ब्रह्म न भवति इति तदर्थः । **ततो ब्रवीति च भूयः**'=ततः पूर्वोक्ताद्भूयस्त्वं ब्रवीति च वाक्यशेषः 'न ह्येतस्मादिति नेत्यन्यत्परमस्ति अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्य' मिति । अतः प्रकृतधर्मैयत्ताप्रतिषेधपरत्वा 'न्नेति नेती' ति वाक्यस्य ब्रह्मणः पूर्वसिद्धमुभयलिंगत्वं न हीयत एव ॥

ननु 'सन्घटस्सन्पट' इत्यादिष्वनुवृत्तं ब्रह्म सत्यं तदतिरिक्तं व्यावर्तमानं घटादिकं 'नेतिनेती' ति श्रुतिः प्रतिषेधतीत्यत आह–**सू** ॥ **तदव्यक्तमाह हि** ॥ २२ ॥ तद्ब्रह्म न केनापि प्रमाणेन व्यक्तम् । 'न संदृशे तिष्ठति रूपमस्ये' त्यादिका श्रुतिस्तथा प्रतिपादयति हि । अतः प्रत्यक्षादिना सिद्धा सत्ता न ब्रह्मेति ।

ब्रह्मस्वरूपग्रहणे हेतुमाह—**सू** ॥ **अपि संराधने प्रत्यक्षानुमानाभ्याम्** ॥२३॥ अपि तु ध्यानरूपज्ञानेन सम्यगाराधने ब्रह्मस्वरूपं गृह्यते । इति 'नायमात्मा प्रवचनेन लभ्यः' 'नाहं वेदैर्न तपसा' 'नासौ प्रत्यक्षविषयः' इत्यादिश्रुतिस्मृतिवाक्याभ्यामवगम्यते ॥

ज्ञानानन्दवज्जगदैश्वर्यमपि ब्रह्मणो रूपमित्याह—**सू** ॥ **प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्** ॥ २४ ॥ अविच्छिन्नानुध्यानसंराधनेन येषां ब्रह्म प्रकाशते तेषां तेन ब्रह्मदर्शनेन विषयीकरणे तज्ज्ञानानन्दादेर्जगदैश्वर्यस्य च वैशेष्यं नास्ति । तथा हि श्रूयते 'अहं मनुरभवं सूर्यश्चे' त्यादिः । तस्माद्ब्रह्माहन्तायाः प्रौढभावे सति ब्रह्मासाधारणधर्मांशवैशिष्ट्यमुपासकानामसाधारणमित्यनवद्यम् ॥

**सू** ॥ **अतोऽनन्तेन तथाहि लिंगम्** ॥ २५ ॥ अतो द्वे वाव ब्रह्मणो रूपे' इत्यादिनोपदिष्टेनानन्तेन कल्याणगुणगणेन योगो ब्रह्मणस्सिद्धः । तथा सत्युभयलिंगमेव ब्रह्म ॥ **इति रामानुजमते प्रकृतैतावत्त्वाधिकरणम्** ॥

**श्रीकण्ठमते,** त्विदमधिकरणमनुवर्तते । अतस्तत्समाप्त्यानन्तरं रामानुजमतक्रियामनुसृत्य अहिकुण्डलाधिकरणं निरूपयिष्यते ।

ननु द्वे वाव ब्रह्मणो रूपे' इत्यादिनोक्तं प्रपञ्चस्य ब्रह्मरूपत्वं ब्रह्मप्रपञ्चयोराध्यासिकसंबन्धेनैव निर्वाह्यम् । विधान्तरेण तन्निर्वाहासंभवात् । ततश्च 'अथात आदेशो नेति नेती' त्यस्य अध्यस्तप्रपञ्चनिषेधपरत्वमेव युक्तमित्याशंक्य विनाप्यध्यास-

संबन्धं स्वाभिमतेन प्रकारेण तन्निर्वाहं वक्ष्यन्पक्षान्तरं प्रथममाह—**सू ॥ उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २६ ॥** 'सर्वो वै रुद्रः' 'द्यावापृथिवी जनयन्देव एकः' इत्येकत्वबहुत्वव्यपदेशादहेः कुण्डलभावर्जुभाववत् परमेश्वरस्यैव 'द्वे वाव ब्रह्मणो रूपे' इत्यादिनोक्तः पृथिव्यादिभावसंस्थानविशेषः ।

**सू ॥ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २७ ॥** प्रकाशतदाश्रययोर्यथा स्वरूपभेदेऽपि तेजस्त्वयोगेनैक्यम् एवमचिद्ब्रह्मणोरेकजातियोगेनेति वा तस्य पृथिव्यादिभावः ॥

**सू ॥ पूर्ववद्वा ॥ २८ ॥** वाशब्दः पक्षद्वयव्यावृत्त्यर्थः । यथा पूर्वत्र प्रकाशजातिगुणशरीरवद्विशेषणत्वैकस्वभावतया विशिष्टैकदेशत्वेनांशत्वमुक्तं चिद्वस्तुनः एवमचिद्वस्तुनोऽपि । 'सर्वो वै रुद्रः' इति चिदचिद्वस्तुनोरेकेन शब्देनाभिधानं हि शक्यमेकरूपभूतयोः पूर्वोक्तसंबन्धे सत्येव । इतरपक्षद्वये ब्रह्मणस्सदोषत्वं दुर्निवारम् । 'यस्य पृथिवी शरीरम्' 'यस्यात्मा शरीरम्' इत्यादिश्रुतेः । 'विद्येति चेतनां प्राहुस्तथाविद्यामचेतनाम्' इत्यादिपुराणवचनप्रामाण्याच्च चिदचिद्वस्तुनोरष्टमूर्तेब्रह्मणश्शरीरता च सिद्धा ॥

**सू ॥ प्रतिषेधाच्च ॥ २९ ॥** 'नास्य जरयैतज्जीर्यति' 'अस्थूलमनण्वह्रस्वम्' इत्यादिषु चिदचिदात्मत्वेऽपि ब्रह्मणस्तद्धर्मप्रतिषेधाच्च चिदचिद्विशिष्टमपि ब्रह्म निर्दोषनिखिलमंगलगुणास्पदं च । एवं चिदचिद्विशिष्टस्यापि ब्रह्मणो विकारत्वाद्यपुरुषार्थधर्मरहितत्वं सर्वज्ञत्वादिपरमपुरुषार्थधर्मवत्त्वं च नित्यसिद्धमेवेति ॥ **इति श्रीकण्ठमते प्रकृतैतावत्त्वाधिकरणम् ॥**

**रामानुजमते, 'उभयव्यपदेशात्त्वहिकुण्डलवत्'** इत्यादिकमहिकुण्डलाधिकरणमिति व्यपदिश्यते । अत्राधिकरणे त्रेधा संशयमापाद्य श्रीकण्ठमतवदेव पक्षद्वये ब्रह्मणस्सदोषत्वापत्त्या जीवस्येव ब्रह्मशरीरतया ब्रह्मविशेषणत्वेनाचिद्वस्तुनो ब्रह्मांशत्वमिति **सिद्धान्तश्च** निरूपितः । सूत्रार्थवर्णनादिकमविशिष्टमेव प्रायः श्रीकण्ठमतादिति न तत्प्रतन्यते ।

**आनन्दतीर्थमते,** इदमधिकरणत्रितयात्मगतया विभक्तम् । तत्राद्यं सूत्रं **प्रकृताधिकरणमिति** व्यपदिश्यते । **सू ॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥** परमेश्वरभक्तिसिद्धये तस्य पालकत्वमहिमात्र वर्ण्यते । सृष्टिसंहारकर्तुः परमेश्वरस्य पालकत्वं नाम व्यापारान्तरमस्ति वा न वेति **संदेहः** । प्रयोजनाभावात्पालनं नाम व्यापारान्तरं नाङ्गीकरणीयमिति **पूर्वपक्षः** । **सिद्धान्तस्तु,** 'नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति' इति श्रुतिसिद्धं पालनं नाम व्यापारान्तरमङ्गीकरणीयमिति । **सूत्रार्थस्तु, हि**=यतः । 'नैताव'दिति श्रुतिः **प्रकृतैतावत्त्वम्**=प्रकृतस्य सृष्ट्यादिकर्तृत्वस्यैतावत्त्वं सृष्टिसंहारकर्तृत्वमात्रपर्यवसितत्वम् । **प्रतिषेधति**=निराचष्टे । **ततः**=सृष्ट्यादिकर्तृत्वात् । **भूयः**=अधिकं पालकत्वं च । **ब्रवीति**=अतः 'सृष्टिं चे' ति शब्दसूचितं पालकत्वं च महिमान्तरमस्तीति ज्ञापयतीत्यर्थः ॥ **इति प्रकृताधिकरणम् ॥ १३ ॥**

**अथाव्यक्ताधिकरणम् ॥ १४ ॥**

**सू ॥ तदव्यक्तमाह हि ॥ २३ ॥** अत्र परमेश्वरस्योपलब्धियोग्यत्वं वा तदयोग्यत्वं वेति **संदेहः** । ईश्वरस्योपलब्धियोग्यत्वे स्तंभादेरिव तदापरोक्ष्यं पुरुषप्रयत्नसाध्यं भवेत् । अव्यक्तत्वे साधनसहस्रैरपि न तत्संभवेददृष्टादेरिव । अतः उभयथापि ईश्वरापरोक्ष्याय भक्त्याद्यनपेक्षैवेति **पूर्वपक्षः** । **सिद्धान्तस्तु** अव्यक्तस्यैव परमेश्वरस्य भक्तिश्रद्धाश्रवणमननाद्यभ्यासात्प्रकाशो भवतीति । **सूत्रार्थस्तु, तत्**=ब्रह्म । **अव्यक्तम्**=पुरुषप्रयत्नेन द्रष्टुमशक्यस्वभावम् । कुतः । **हि**=यस्मात् । 'अव्यक्तं च निष्कल' मिति श्रुतिस्त**थाह** तस्मादित्यर्थः ॥

**सू ॥ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २४ ॥** **अपि**=भक्तिरहिताराधनेनापि न ब्रह्म व्यक्तीकर्तुं शक्यम् । कुतः **संराधनेऽपि**=संपूजनेऽपि । अव्यक्तत्वस्य **प्रत्यक्षानुमानाभ्यां**=ज्ञानिप्रत्यक्षत्वसूक्ष्मत्वहेतुकानुमानाभ्यां सिद्धत्वादित्यर्थः ॥

**सू ॥ प्रकाशवच्चावैशेष्यम् ॥ २५ ॥** चो नञर्थः । **प्रकाशवत्**=यथाग्नेः स्थूलसूक्ष्माभ्यां व्यक्ताव्यक्तत्वे तथा ब्रह्म न । किं तु स्वतो व्यक्तमेव । कुतः । यतो**ऽवैशेष्यम्**=ब्रह्मणि स्थूलसूक्ष्मत्वविशेषो नास्ति अत इत्यर्थः ॥

**सू ॥ प्रकाशश्च कर्मण्यभ्यासात् ॥ २६ ॥** प्रकाशश्चापरोक्षज्ञानं च कर्मणि विषयभूते ब्रह्मणि । **अभ्यासात्**=श्रवणादेरावर्तनाद्भवतीत्यर्थः ॥

**सू ॥ अतोऽनन्तेन तथा हि लिंगम् ॥ २७ ॥** **अतः**=अव्यक्तत्वे प्रत्यक्षत्वे च प्रमाणसद्भावात्तदन्यथानुपपत्त्या । **अनन्तेन**=अपरिच्छिन्नेन ब्रह्मणा तत्प्रसादेनाव्यक्तस्यापरोक्ष्यं भवतीति ज्ञायते । न केवलमनुपपत्तिमात्रात् । किं तर्हि । **हि**=यस्मात् **तथा लिंगं**='तस्याभिध्याना' दित्युक्तमीशप्रसादस्य बन्धनिवृत्तिहेतुत्वरूपं प्रसादस्य दर्शनहेतुत्वज्ञापकमस्ति तस्मादित्यर्थः ॥ **॥ इत्यव्यक्ताधिकरणम् ॥ १४ ॥**

**अथाहिकुण्डलाधिकरणम् ॥ १५ ॥**

**सू ॥ उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २८ ॥** अत्र परमेश्वरस्य गुणक्रियादयो यदि भिन्नास्तदा समवायस्य

## अथ पराधिकरणम् ॥ ७ ॥

तदिह सकलचिदचिदाकारपरमशक्तिविलाससमरसात्मनः सर्वदोषवासनाकलंकरहितात् सर्वज्ञतादिसकलमङ्गलगुणरत्नाकरात् परब्रह्मणो विरूपाक्षाच्छिवादेतस्मात् परं किंचिदपि वस्त्वन्तरं नास्तीति वक्तुं प्रथममाशङ्कते—

**सू ॥ परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ ३० ॥**

'जन्माद्यस्य यतः' इत्यादिना 'प्रतिषेधाच्च' इत्यन्तेन यः परमकारणतया प्रतिपादितः परमेश्वरः इतः परमपि वस्त्वस्ति न वा

## अथ पराधिकरणम् ॥ ७ ॥

उत्तराधिकरणं तत्प्रतिपाद्यप्रदर्शनपूर्वकमवतारयति—तदिहेति । 'न स्थानतोऽपी' ति सूत्रे परशब्देन ब्रह्म सर्वोत्कृष्टत्वेनानूदितं तदधिकरणप्रतिपाद्योभयलिंगत्वबाधाबाधविचारार्थत्वेनान्तरंगत्वात्तदनन्तरं प्रकृतैतावत्त्वाधिकरणं प्रवृत्तम् । तत्सूत्रेऽपि परस्येत्यनुवृत्तेस्तस्य सर्वोत्कृष्टत्वप्रसंगोऽनुवृत्तः । तेन समराहित्यमप्यर्थसिद्धम् । अन्यथा तस्य स्वव्यतिरिक्तसर्वोत्कृष्टत्वासिद्धेः । तद्विषयवाक्ये 'न ह्येतस्मा' दिति 'नेत्यन्यत्परमस्ती' ति तस्य समराहित्यं प्रतिपादितम् । ततः कैमुतिकन्यायादधिकराहित्यमर्थसिद्धम् । एवं प्रसक्तमुभयमपि संभावितसकलशंकापरिहारेण न्यायतः स्थिरीकर्तुमुत्तराधिकरणद्वयं तत्राप्यधिकराहित्ये निर्णीते माभूदधिकः समः कश्चिदस्त्विति शंका प्रवर्तितुमुचितेति प्रथममधिकराहित्यं निर्णीयत इति संगतिरिह विवक्षिता । सू० ॥ परमतस्सेतून्मानसंबंधभेदव्यपदेशेभ्यः ॥ ३० ॥ नन्वेतावत्पर्यंतेन सूत्रसंदर्भेण सकलजगत्कारणतया तदुपपादकसकलकल्याणगुणवत्तया मुक्तोपास्यतया मुक्तोपसृप्यतया च प्रतिपादितात्परमेश्वरात्परोऽस्तीति शंका नावकाशं लभत इत्याशंक्य सम्यगालोचयतां तथैव तथापि सेत्वादिव्यपदेशान्निरीक्षमाणानां मन्दधियां तथा शंका भवेदिति तदपाकरणाय तेषां गतिप्रदर्शनार्थोऽयमारंभः इत्यभिप्रेत्याह—जन्माद्यस्येति । सेत्वादिव्यपदेशानां गत्यन्तरासंभवसंभवाभ्यां संशये पूर्वपक्षः । भवतु जगत्कारणत्वादियुक्तं परं ब्रह्म मुक्तप्राप्यं तु

---

निराकृतत्वात्तद्वत्त्वमनुपपन्नम् । यद्यभिन्नास्तदा ज्ञानादिमत्त्वं स्रष्टृत्वसंहर्तृत्वादिकं चानुपपन्नमित्युभयथापि महिमरहिते तस्मिन्ननुपपन्ना भक्तिः इति **पूर्वपक्षः** । पारमेश्वरा गुणक्रियादयस्सर्वेऽपि तेनाभिन्ना एव तस्य धर्माश्च भवन्ति । अभेदेऽपि भेदप्रतिनिधेर्विशेषस्य बलाद्धर्मधर्मित्वगोचरा व्यवहाराः प्रवर्तन्ते । अतः श्रुतिषु धर्मधर्मिभावरूपोभयव्यपदेशसत्त्वादुपपन्नमहिमशालिनि तस्मिन्नुपपन्ना भक्तिरिति । **सूत्रार्थस्तु,** ब्रह्म आनन्दगुणं तद्रूपं च भवति । कुतः **उभयव्यपदेशात्**— 'आनन्दो ब्रह्म' 'आनन्दं ब्रह्मण' इत्यादिश्रुतिषु गुणात्मकत्वेन गुणित्वेन च ब्रह्मण उक्तत्वात् । तदपि कथम् । **अहिकुण्डलवत्**—यथा अहेस्सर्पस्य कुण्डलत्वं कुण्डलित्वं च विशेषात्तथेत्यर्थः ॥

**सू ॥ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २९ ॥** यथा प्रकाशाश्रयस्यादित्यस्य प्रकाशरूपत्वं तदाश्रयत्वं च तद्वद्ब्रह्मणोऽपि । अन्यपरित्यागेन आदित्यदृष्टान्ते को हेतुरित्यत उक्तं **तेजस्त्वादिति** । ब्रह्मादित्ययोरुभयोरपि तेजोरूपत्वात्तदभिप्रायेण तद्दृष्टान्तीकरणमित्यर्थः ॥

**सू ॥ पूर्ववद्वा ॥ ३० ॥** यथा कालः पूर्वेणाभिन्नोऽपि पूर्वकाल इति पूर्वपदेन विशेष्यते तथा ब्रह्म आनन्देन विशेष्यत इत्यर्थः । आदरार्थं स्थूलसूक्ष्मबुद्धिविवक्षया वा दृष्टान्तत्रयोक्तिः ।

**सू ॥ प्रतिषेधाच्च ॥ ३१ ॥** ब्रह्म गुणानां ब्रह्मणश्च 'नेह नाने' ति भेदस्य प्रतिषेधाच्च ब्रह्म गुणात्मकमित्यर्थः ॥

**इत्यहिकुण्डलाधिकरणम् ॥ १५ ॥**

**इति सूत्रार्थचन्द्रिकायां प्रकृतैतावत्त्वाधिकरणम् ॥ ६ ॥**

---

( १ )'मुक्तप्राप्यतया' इति. ख० पाठः ।

इति संशयेऽस्तीति पूर्वः पक्षः। तथा हि—'अथ य आत्मा स सेतुर्विधृतिः' 'एतं सेतुं तीर्त्वा अन्धः सन्ननन्धो भवति' इति 'चतुष्पाद्ब्रह्म' 'अमृतस्यैष सेतुः' इत्यादिभिरस्य परब्रह्मणः सेतुत्वतरितव्यत्वपरिमितत्वप्रापकत्वादीनि व्यपदिश्यन्ते। अतोऽस्मादपि परं किंचिद्वस्त्वस्तीति॥

सिद्धान्त उच्यते—

## सू॥ सामान्यात्तु ॥ ३१ ॥

वस्तु ततोऽन्यदेव तस्मादपि परमिति सेत्वादिव्यपदेशतोऽवगम्यते। तथा हि—सेतुव्यपदेशस्तावद्ब्रह्मणि सर्वेषु वेदान्तेषु दृश्यते। प्रसिद्धसेतुः[1] परपारप्रापकत्वेन प्रसिद्धः। अतस्सेतुव्यपदेशाद्ब्रह्मणोऽपि प्राप्तव्यान्तरप्रापकत्वमवसीयते। नन्वियं शंका द्युभ्वाद्यधिकरणे निराकृता। सत्यम्। तत्र 'यस्मिन्द्यौ' रिति मन्त्रगतं सेतुशब्दमवलम्ब्योत्थिता शंका तस्य 'तमेवैकं जानथे' ति प्रकृतज्ञानपरत्वसमर्थनेन निराकृता। इह तु 'अथ य आत्मा स सेतुर्विधृति' रित्यादौ ब्रह्मण्येव प्रयुज्यमानस्सेतुशब्दस्तथा योजयितुं न शक्यते। ननु प्रसिद्धसेतुवदसंकरकारित्वमात्रेणायं सेतुशब्दोऽस्तु, 'एषां लोकानामसंभेदाये' ति वाक्यशेषात्। मैवम्। 'एतं सेतुं तीर्त्वेति' वाक्यान्तरे प्रसिद्धसेतुवत्तरितव्यत्वस्यापि श्रवणात्। तथेयत्तापरिच्छेदरूपोन्मानस्यापि व्यपदेशो दृश्यते। 'तदेतद्ब्रह्म चतुष्पा' दिति चत्वारश्च पादा निरूपिताः। प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम पृथिवी कलान्तरिक्षं कला द्यौः कला समुद्रः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽनंतवान्नाम अग्निः कला सूर्यः कला चन्द्रः कला विद्युत्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम प्राणः कला चक्षुः कला श्रोत्रं कला मनः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मण आयतनवान्नामे' ति गवां पादेषु पुरतो द्वौ खुरौ पश्चात् द्वौ पार्ष्णी इत्येकैकस्मिन्पादे चत्वारश्चत्वारः शफास्सन्ति। ते कलाशब्देनोच्यन्ते। एवं परिमितं ब्रह्मेत्यपरिमितं यत्प्राप्यं मोक्षशास्त्रेषु प्रसिद्धं तद्ब्रह्मणोऽन्यत्तत्प्राप्यमित्यवसीयते। साक्षादेव मुक्तप्राप्यस्य ब्रह्मणश्च प्राप्यप्रापकभावसंबंधस्यापि व्यपदेशो दृश्यते। 'तस्यैष सोमः अमृतस्य परं सेतु' मिति। तथाच 'अमृतस्यैष सेतु' रित्यस्यापि तदैकार्थ्यं युक्तम्। साक्षाच्च वेदान्तेषु परशब्देन प्रसिद्धाद्ब्रह्मणः परं प्राप्तव्यमिति भेदस्यापि व्यपदेशो दृश्यते 'परात्परं पुरुषमुपैति दिव्य' मिति। न च ब्रह्मसाक्षात्काररूपसाधनाद्ब्रह्मण एव प्राप्तव्यत्वं युक्तमिति शंकनीयम्। मोक्षहेतुसाक्षात्कारस्यापि ब्रह्मान्यप्राप्तव्यविषयत्वव्यपदेशदर्शनात्। आथर्वणे हि 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीते' त्युपक्रम्य स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत' इति परब्रह्मध्यानपुण्येन ततोऽपि परस्येक्षणीयत्वं व्यपदिष्टम्। तस्मात्परं ब्रह्माप्यातिवाहिकविशेष इति। एवं प्राप्ते सिद्धान्तमाह—सू० ॥ सामान्यात्तु ॥ ३१ ॥ अत्रोक्तं परं ब्रह्म परमशिव एव सर्वोत्कृष्टं वस्तु न ततः परं वस्त्वस्ति स एव च मुक्तप्राप्य इति च सर्ववेदान्तानामुद्घोषस्सेत्वादिव्यपदेशमात्रेणान्यथाकर्तुं न शक्यते। अतः सेत्वादिव्यपदेशानां गतिमात्रं वक्तव्यमित्यभिप्रेत्य सेतुव्यपदेशस्य गतिरनेन सूत्रे-

(१) 'परपारप्राप्तिहेतुत्वेन प्रथितः' इति ख. पाठः।

तुशब्दः पूर्वपक्षनिवर्तकः। अतस्तस्मात् सर्वोत्तराच्छिवात् परमस्तीति वादो न युक्तः, 'विश्वाधिको रुद्रो महर्षिः' इत्यादिश्रुतिभिस्तस्य विश्वाधिकत्वसिद्धेः। अत्र च सेतुत्वादिव्यपदेशस्तत्सामान्यादेव सर्वलोकासंकरकरत्वेन 'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय' इति श्रूयते। 'सर्वं खल्विदं ब्रह्म' इति प्रतिपादितजगन्निमित्तोपादानभावस्य ब्रह्मण एव 'एतमितः प्रेत्याभिसंभवितास्मि' इति प्राप्यत्वमवगम्यते। अन्यत्र च—

'त्रिलोचनं नीलकण्ठं प्रशान्तम्। ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥'

इति तमसः परस्य सकलकारणस्य सर्वज्ञस्य त्रिलोचनत्वादिलक्षणस्य ब्रह्मण एव सर्वोत्तरतः प्राप्यत्वमुच्यते। तस्मादत्र तरतिः प्राप्तिवचनः। अन्यथा परमप्राप्याद्विश्वाधिकात् परमकारणादुपरि वस्तुसद्भावे तदुपर्यपि वस्तुसद्भावप्रसङ्गेनानवस्था वेदान्तवाक्यानां भवेत्। अतः सर्वातीतः परमशिव इति सर्वोत्कृष्टत्वं ब्रह्मण एव ॥

यदुक्तं परिमितत्वमपि तत्राह—

## सू ॥ बुद्ध्यर्थः पादवत् ॥ ३२ ॥

'चतुष्पात्' इत्युन्मानव्यपदेशो 'वाक्पादश्चतुष्पादः' इतिवदुपासनार्थः ॥

## सू ॥ स्थानविशेषात् प्रकाशादिवत् ॥ ३३ ॥

अपरिमित एव यद्यपि परमेश्वरः। तथाप्यस्य स्थानविशेषादवच्छिद्यानुसंधानं युज्यते, यथा वातायनादिस्थानसंबन्धात् प्रकाशादेः ॥

प्राप्यस्यापि प्रापकत्वं चास्तीत्याह—

## सू ॥ उपपत्तेश्च ॥ ३४ ॥

प्राप्यस्यैव परमेश्वरस्य प्रापकत्वं चोपपद्यते, यथाह 'यमेवैष वृणुते तेन

णोक्ता। सेतुशब्दो वाक्यशेषावगतासंकरकारित्वसामान्यनिबन्धनः। तरतिश्च प्राप्त्यर्थः। तरणस्य तरितव्यदेशप्राप्तिपूर्वकत्वेन देशान्तरप्राप्तिफलकत्वेन च तस्य तल्लक्षणत्वोपपत्तेरिति। यद्वा। पूर्वपक्षसूत्रात् 'परमत' इति 'अंबुवदग्रहणा'दिति पूर्वाधिकरणसूत्राच्चेति चानुवर्तनेन परमेश्वरात्परं नास्तीति प्रतिज्ञापूर्वकं सेतुव्यपदेशस्यानेन सूत्रेण गतिरुक्ता। सू ॥बुद्ध्यर्थः पादवत् ॥ ३२ ॥ उन्मानव्यपदेशः उपासनार्थः। 'य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मण उपास्त' इत्यादिवाक्यशेषात् अन्यत्रापि 'मनो ब्रह्मेत्युपासीते' त्युपक्रम्य 'तदेतच्चतुष्पाद्ब्रह्म वाक्पादः प्राणः पादः चक्षुः पादः श्रोत्रं पादः' इत्युपासनार्थं पादकल्पनादर्शनाच्च। सू० ॥ स्थानविशेषात्प्रकाशादिवत् ॥ ३३ ॥ ननु परिमितस्य मनसश्चतुष्पात्त्वानुसंधानं युज्यतां कथं तदपरिमितस्य ब्रह्मण इत्याशंकानिराकरणार्थमिदं सूत्रम्। प्रापकत्वं चास्तीति। प्रापकत्वं चास्य श्रुतमस्तीत्यर्थः। सू ॥ उपपत्तेश्च ॥३४॥ चकारेण 'परात्पर' मिति निर्देशोऽपि देवमनुष्यादिभ्यः पराच्चतुर्मुखादेः परत्वपरतया

(१) 'ब्रह्मणोऽनन्तवानित्युपास्त' इति—ख० पाठः।

लभ्यः' इति। अतः परमेश्वरान्नास्ति परमिति सिद्धम् ॥ इति पराधिकरणम् ॥ ७ ॥

अथ अन्यप्रतिषेधाधिकरणम् ॥ ८ ॥

सू ॥ तथान्यप्रतिषेधात् ॥ ३५ ॥

पूर्वत्र विरूपाक्षात् परब्रह्मणः शिवान्नास्ति परमिति निरूपितम् । पुनरिह तत्सदृशोऽस्ति न वा ।

इति संशये पूर्वः पक्षः । परमेश्वरादुत्कृष्टवस्त्वभावेऽपि जगत्कारणत्वेनेश्वरत्वादिना तत्सदृशोऽस्त्येव । तथा हि श्रूयते—'सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात्' इत्यत्र कश्चित् पुरुषः । तस्य हि 'सहस्रशीर्षा पुरुषः' इत्यादिना बहुमुखपादादित्वं, 'पादोस्य विश्वा भूतानि' इति जगद्विशिष्टत्वं, 'त्रिपादस्यामृतं दिवि' इति परमाकाशवर्तित्वं, 'तस्माद्विराडजायत विराजो अधिपूरुषः' इत्यव्यक्तहिरण्यगर्भोपादानत्वम् 'आदित्यवर्णं तमसस्तु पारे' इति तमः

ब्रह्मण्युपपद्यत इति समुच्चीयते । ॥ इति पराधिकरणम् ॥ ७ ॥

अथ अन्यप्रतिषेधाधिकरणम् ॥ ८ ॥

सू ॥ तथान्यप्रतिषेधात् ॥ ३५ ॥ ननु, पुरुषसूक्तनारायणानुवाकादीनामविरोधेन गति 'रेतेन सर्वे व्याख्याताः' 'अनुपपत्तेस्तु न शारीर' इत्याद्यधिकरणेषु प्रपञ्चिता कथं तदवलंबनोऽत्र पूर्वपक्षः, उच्यते । पुरुषसूक्ते नारायणस्य सर्वकारणत्वप्रतिपादनं पारमेश्वरचिच्छक्त्यंशत्वेन जगदुपादानत्वाभिप्रायमित्युपपादितम् । तन्नोपपद्यते । तस्य तदंशत्वे प्रमाणाभावात् । नारायणानुवाके तस्य सर्वैश्वर्यपरब्रह्मभावादिप्रतिपादनं दहरोपासकस्य परमेश्वरैक्यभावनादार्ढ्याभिप्रायमित्युपपादितम् । तदपि नोपपद्यते । दहरविद्यायां स्वयमुपास्यस्य तस्यान्योपासकत्वासंभवात् । श्रूयते हि आत्मप्रबोधोपनिषदि 'यदिदं ब्रह्म पुरमिदं पुण्डरीकं तस्य य आत्मा हृत्पुण्डरीकमध्ये' इत्युपक्रम्य 'ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदन' इति ततः 'प्राक् ओं नमो नारायणाये' ति मन्त्रोपासनं 'वैकुण्ठं भगवल्लोकं गमिष्यती' ति तदीयदहरविद्यांगमंत्रस्तत्फलं चेत्युभयं दर्शितम्। नारायणोपासनया तल्लोके तत्सायुज्यप्राप्तिश्च शिवसायुज्यप्राप्तिवदेवानावृत्तिफला । अत एव महाभारते शिववचनम्—'सायुज्यानां विशिष्टे द्वे मामकं वैष्णवं तथा । मां प्राप्य न निवर्तंते विष्णुं वा शुभलोचने' ॥ इति । एतदभिप्रायेणैव बोधायनादिभिः 'महादेवं महापुरुषं वार्चयेद्देवयोर्यथाकामी स्यात्' इत्यादिवचनैः शिवविष्णुभजनयोर्विकल्प उक्तः ।

नयमणिमालायाम्

अथ पराधिकरणम् ॥ ७ ॥

सू ॥ परमतस्सेतून्मानसंबंधभेदव्यपदेशेभ्यः ॥ ३० ॥ सामान्यात्तु ॥३१॥ बुद्ध्यर्थः पादवत् ॥ ३२ ॥ स्थानविशेषात्प्रकाशादिवत् ॥ ३३ ॥ उपपत्तेश्च ॥ ३४ ॥

सेतुं तीर्त्वेत्यादौ तरितव्यत्वादिकश्रवणात् । ब्रह्मादिलंघ्यमुक्तौ ततःपरं प्राप्यमिति भाति ॥ १९५ ॥
ब्रह्मैव परममुक्तौ प्राप्यमिति श्रुतिशतावगतम् । तत्सेतुत्वमसंकरकारित्वं तरतिराप्त्यर्थः ॥ १९६ ॥

इति पराधिकरणम् ॥ ७ ॥

( १ ) 'पासकत्वकल्पनायोगात्' इति ख० पाठः।

परत्वं 'तमेवं विद्वानमृत इह भवति' इति मोक्षहेतुत्वं चावगम्यते। तस्य पुनः 'सहस्रशीर्षं देवम्' इत्यारभ्य 'पतिं विश्वस्य' इति विश्वपतित्वं 'नारायणपरं ब्रह्म' इति नारायणशब्दवाच्यत्वं परब्रह्मत्वं 'परमात्मा व्यवस्थितः' इति दहराकाशोपास्यत्वं चावगम्यते। अतो नारायणोऽसौ परमेश्वरसमानधर्मा। एत एव हि परमेश्वरस्य धर्माः–

'सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः।
सर्वव्यापी च भगवांस्तस्मात्सर्वगतः शिवः॥'

इति मन्त्रोपनिषदि। 'विश्वतश्चक्षुरुत विश्वतोमुखः' इति महोपनिषदि। शिवसंकल्पे च 'सर्वतोमुखः' इति। अथर्वशिरसि बहुमुखपादादिमत्त्वं परमेश्वरस्य श्रूयते।

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।
तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत्॥'

इति जगदंशविशिष्टत्वं, 'हिरण्यगर्भं पश्यत' इत्यादिषु हिरण्यगर्भकारणत्वं 'समस्तसाक्षिं तमसः परस्तात्' इत्यादिषु तमःपरत्वं 'दहरं विपाप्मम्' इत्यादिषु दहरोपास्यत्वं 'ज्ञात्वा शिवं शान्तिमत्यन्तमेति' इत्यादिषु मोक्षहेतुत्वं 'सर्वैश्वर्यसंपन्नः' इत्यादिषु जगदीश्वरत्वं चावगम्यते। एवं विश्वरूपत्वादिधर्मसाम्यमनयोर्नारायणपरमेश्वरयोः। स्मृत्यादिषु पूजाविधाने 'शिवं वा विष्णुमेव वा' इति समानतया विकल्पः श्रूयते। समानमेव च तयोर्लोके पूजास्थानादिकं तत्प्रतिपादकपुराणागमादिकं च। तस्मात् परमेश्वरसदृशः पुरुषो नारायणः।

न चैतेषां वचनानां विष्णुप्रजापत्यग्नीषोमानां तारतम्ये सत्यप्युपांशुयाजदेवतात्वे विकल्पवन्नित्यार्चने शिवनारायणयोस्सत्यपि तारतम्ये देवतात्वे विकल्प इत्येतावन्मात्रे तात्पर्यमिति वाच्यम्। उदाहृतभारतवचनानुसारेण मोक्षार्थभजन एव विकल्पपरत्वात्। [1](अत एव कूर्मपुराणे 'न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकम्। तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरि' मित्यादिना विष्णुपूजां विधाय तदवसाने) 'निवेदयीत स्वात्मानं विष्णावमिततेजसि। तदात्मा तन्मनाः शान्तः तद्विष्णोरिति मंत्रतः॥' इति तदीयप्रपदनप्रकाशकेन मन्त्रेण मोक्षार्थमेवात्मसमर्पणमुक्तम्। तदनन्तरम् 'अथवा देवमीशानं भगवन्तमनामयम्। आराधयेन्महापूतो भावयन्वै महेश्वर'मित्यादिना शिवपूजां विधाय तदवसानेऽपि 'नमस्कुर्यान्महादेवमृतं सत्यमितीश्वरम्। निवेदयीत चात्मानं यो ब्रह्माणमितीश्वरे॥' इति मोक्षफलकप्रपदनार्थतया प्रसिद्धेनैव मन्त्रेणात्मसमर्पणं विहितम्। एवमुभयोर्भजनस्य मुक्तिफलकत्वाविशेषादेव शैवानि वैष्णवानि च मुक्तिक्षेत्राणि पुराणेषु प्रसिद्धानि। तेषु तयोरद्याप्यविशेषेण पूजाविशेषाः प्रवर्तन्ते। तयोर्जगत्कारणत्वजगदीश्वरत्वमुक्तोपास्यत्वमुक्तप्राप्यत्वादिप्रतिपादकाश्च श्रुतिस्मृतिपुराणागमास्समम्एवोपलभ्यन्ते। एवञ्च यद्यपि तत्तत्पुराणागमेष्वितरापकर्षवचनं गार्हस्थ्यसंन्यासाद्यन्योन्यनिन्दावचनवन्नहिनिन्दान्यायेनोपपद्यते इति शिवादाधिक्यं कस्यचिदपि न संभवति,

(1) एतद्रेखाङ्कितो भागः ख पुस्तके न दृश्यते।

इति प्राप्ते ब्रूमः—परमेश्वरादुत्कृष्टं नास्ति यथा, तथा सदृगपि नास्त्येव, जगत्कारणत्वेश्वरत्वादौ तदन्यप्रतिषेधात्। तथा हि—

'एक एव रुद्रो न द्वितीयाय तस्थुः य इमाँल्लोकानीशत ईशनीयुः जननीयुः'

'द्यावापृथिवी जनयन् देव एकः' 'य एको रुद्र उच्यते' 'हरः क्षरात्मानावीशते देव एकः'

'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति॥'
'शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्य'
'यदा तमस्तन्न दिवा न रात्रिः न सन्न चासच्छिव एव केवलः॥'

इत्यादिभिः परमेश्वरादन्यस्य जगत्कारणत्वादौ निषेधः क्रियते। अतः परमेश्वरेण सदृशः कश्चिन्नास्ति। परमशक्तिमत्त्वान्निमित्तभूतः परमेश्वर एव। पुरुष उपादानमिति पुरुषस्य हिरण्यगर्भकारणत्वम्। तस्य उपादानत्वात्। ईश्वरस्य निमित्तत्वादुच्यते उभयोरपि जगत्कारणत्वम्। अत एव प्रतीयते 'तस्माद्विराट्' इति हि पुरुषस्योपादानत्वं 'हिरण्यगर्भं पश्यत जायमानम्' 'द्यावाभूमी जनयन् देव एकः' इति परमेश्वरस्य निमित्तत्वं च प्रतिपाद्यते। सर्वज्ञात् सर्वशक्तिमतः परब्रह्मणः शिवाद्विश्वाधिकात् प्रथमं परप्रकृतिभूता परा शक्तिः प्रादुर्भवति। सा प्रथमभोक्तृत्वदशायां पुरुषः उच्यते, यः 'सहस्रशीर्षा पुरुषः' इति श्रूयते। तदात्मन एव शिवात् सकलचेतनप्रपञ्चपरिणामः। अत एव 'सर्वो वै रुद्रः' इति परमेश्वरस्य सर्वात्मताभिधानमुपक्रम्य 'पुरुषस्य नारायणस्य सर्वात्मत्वमुपादानत्वात्।' कथमस्य सर्वात्मत्वमित्याशङ्कायां 'पुरुषो वै रुद्रः' इति 'पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि' इति च पुरुषोऽपि परमेश्वरस्य महाविभूत्यात्मा जगदाकार इति निरूपितम्। सर्वज्ञं सर्वशक्तिकं नित्यतृप्तं स्वतन्त्रं विश्वाधिकं निमित्तभूतमेव परं ब्रह्म सर्गसमये बहु स्यामिति संकल्प्य स्वात्मनोऽमुं पुरुषं विभजति। स्वविभक्तस्वांशभूतेन सकलं जगद्भवतीति 'तत्सृष्ट्वा। तदेवानुप्राविशत्। तदनु प्रविश्य। सच्च त्यच्चाभवत्।' इत्यादिना,

---

तथाप्यपक्षपातेन श्रुतिस्मृतिपुराणागमान्विमृशतां शिवेन नारायणस्य साम्यं न प्रत्याख्यातुं शक्यम्। जगत्स्रष्टृत्वादिकं चोभयोरपि कल्पभेदेनोपपादनीयमित्येवमधिकाशंकावलम्बनोऽत्र पूर्वपक्षः। तन्निराकरणाय प्रवर्तते सूत्रकारः—तथान्यप्रतिषेधादिति। तत्र तथाशब्दसूचितस्य प्रतिज्ञांशस्यानुवृत्त्यध्याहाराभ्यामपेक्षितं पूरयन्सूत्रं व्याचष्टे—यथेति। नन्वैश्वर्यकारणत्वादिविषये अन्यप्रतिषेधो दृश्यतां नाम, किमतः, नारायणस्यापि तत्प्रतिपादनमपि दृश्यत एवेत्याशंक्य तस्य गतिं वक्तुमुपक्रमते—परमशक्तिमत्त्वादित्यादिना। नन्विदं सर्वं स्वकल्पितप्रक्रियामात्रं 'तत्सृष्ट्वा तदेवानुप्राविश' दित्यादिश्रुतिवाक्यादपि सद्वारकाद्वारकसाधारणप्रवेशमात्रप्रतिपादकात्स्पष्टमिदं न प्रतीयत इत्याशंक्य नारायणस्य चिच्छक्त्यंशत्वे जगदुपादानभूततद्द्वारा परमेश्वरस्य जगदात्मत्वे च श्वेताश्वतर-

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत् ॥'

इत्यादिना च श्रुतिवाक्येनावगम्यते । निमित्तसंकल्पमूलत्वादुपादानभावस्य निमित्तस्योपादानाधिक्यम्, उपादानस्य निमित्तसंक्रमाविभागान्निमित्तधर्माणामुपादाने श्रवणम् । अतः परमेश्वरेण सदृशमुत्कृष्टं वा वस्तु नास्त्येव ॥

अतोऽपि परमेश्वरेण सदृशं तदुत्कृष्टं च किंचिदपि वस्तु नास्तीत्याह—

सू ॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३६ ॥

आयामो महाव्याप्तिः । 'सर्वाननशिरोग्रीवः' 'विश्वतश्चक्षुरुत विश्वतोमुखः' इत्यादिभिः, 'अणोरणीयान्' इत्यारभ्य 'सर्वो ह्येष रुद्रः' इत्येतत्पर्यन्तैर्महोपनिषद्वाक्यैः 'यो वै रुद्रः स भगवान्' इत्यारभ्य 'यच्च सत्यम्' इत्यन्तैराथर्ववाक्यैश्च सकलजगद्व्याप्तिप्रतिपादनपरैः । अनेन स्वधर्मांशभूतेनोपादानपुरुषेण

---

मन्त्रमुदाहरति–मायां त्विति । अस्य मन्त्रस्योक्तार्थपरत्वं प्रकृत्यधिकरणभाष्यव्याख्यानसमयेऽस्माभिः प्रपञ्चेन प्रतिपादितम् । यद्यपि प्रकृत्यधिकरणे शिवस्योपादानत्वे निर्विकारश्रुतिविरोधपरिहाराय परिणामिप्रकृतिद्वारकं तस्योपादानत्वमित्येतावत्प्रदर्शयितुं 'परिणामा'दिति सूत्रं प्रवृत्तम् । तथापि प्रकृतेरुपादानत्वे कथं नारायणस्योपादानत्वश्रवणमिति बुद्धिस्थशंकानिराकरणाय तत्र भाष्यकृता 'मायां त्वि' ति मन्त्रमुदाहृत्य तत्र तात्पर्यमुक्तमित्यस्माभिरपि तद्विषयेऽत्र वक्तव्यं सर्वं तत्र प्रपञ्चितम् । [1]( नारायणस्य मायाशब्दोक्तचिच्छक्तिरूपत्वमाश्वलायनस्मृतावपि यज्ञोपवीतप्रशंसाप्रकरणे वर्णितम् । 'सिसृक्षुरेक एवाग्रे समासीनश्शिवः स्वयम् । सृष्ट्वा गुणमयीं मायां सूत्ररूपामुपाकरोत् ॥ तया तदात्मकं विष्णुं सृष्ट्वा पालं दिवौकसाम् । स्वयं ब्रह्माभवद्रुद्रो रुद्रश्चास्य क्षयाय सः ॥' इति । ) ननु निमित्तस्य स्वातन्त्र्यात्तस्य तत्परतन्त्रादुपादानादाधिक्येन भाव्यं चेत् का तर्ह्युपादानस्य नारायणस्य परमैश्वर्यपरब्रह्मभावादिश्रवणस्य गतिरित्याशंक्य तस्यौपचारिकत्वमाह–उपादानस्येति । परमेश्वरैक्यभावनानिमित्तत्वमपि तत्र तत्रोक्तमनुसन्धेयम् । यत्तु दहरविद्योपास्यत्वं नारायणस्यापि श्रुतमिति भवतु तदस्मदाद्युपास्यस्यापि तस्य परमेश्वरमहिमप्रख्यापनार्थं तदुपासकत्वमविरुद्धम् । नारायणोपासना तु साक्षाज्ज्ञानावृत्तिफला किन्तु तत्पदप्राप्तिद्वारा शिवपदप्रापकत्वेन । यतश्शिवसायुज्यमेव मोक्षः । अत एव महाभारतेऽपि 'धर्मान्वेषी तपः कर्तुं यतेत सततं प्रिये । अमरत्वं शिवत्वं च तपसा प्रापयेत्सदे' ति तपसः स्वर्गमोक्षहेतुत्वकथने. मोक्षश्शिवत्वमित्यनेन व्यपदिष्टः । शिवनारायणयोर्जगत्कारणत्वादिप्रतिपादकवचनबलाबलविभागे तदाराधनयोः फलविशेषविभागे च यदत्र वक्तव्यमपेक्षितं तत्सर्वमस्माभिश्शिवतत्त्वविवेके प्रपञ्चितमनुसन्धेयम् । उत्तरसूत्रमवतारयति––अतोऽपीति । सू ॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३६ ॥ आयामस्त्रिविधव्याप्तिरूपा महाव्याप्तिः । तत्प्रतिपादकश्शब्दः 'सर्वाननशिरोग्रीव' इत्यादिमन्त्रः । तत्र हि 'सर्वव्यापी' त्यनेनाकाशवत्केवलं विभुत्वरूपा व्याप्तिर्गृह्यते । 'सर्वभूतगुहाशय' इत्यनेन नियमनार्थसर्वप्राणिहृदयगुहासन्निधानरूपा । ततः

---

( १ ) एतद्रेखांकितो भागः ख· पुस्तके नास्ति ।

**सर्वगतत्वमवगम्यते निमित्तस्य परब्रह्मणः । तस्मात् परमेश्वरस्य विभूतिमयं विश्वमिति तत्सदृशस्तदुत्कृष्टश्च नास्त्येव ॥ इत्यन्यप्रतिषेधाधिकरणम् ॥ ८ ॥**

'सर्वाननशिरोग्रीव' इत्यनेन उपादानभावप्रयुक्तसर्वकार्यानुस्यूतिरूपा व्याप्तिरुच्यते । पारिशेष्यात् 'सहस्रशीर्षं देव' मित्यादेर्नारायणविषयस्यैतदैकार्थ्यस्य तत्परत्वदर्शनाच्च । न निर्विकारस्य परब्रह्मणश्शिवस्य साक्षादुपादानत्वं संभवतीत्यन्यद्द्वारकं तदाश्रयणीयम् । तत्र द्वारापेक्षायां यत्र 'सर्वाननशिरोग्रीव' इत्यादिश्रुतितौल्यं तस्य नारायणस्य 'मायां तु प्रकृतिं विद्या' दिति श्रुतायाश्शिवशक्तेश्च द्वारत्वं प्राप्तम् । न च तयोरन्यतरपरित्यागे कारणमस्तीति तयोरपि द्वारद्वारिभावाश्रयणे मायाशक्तेस्साक्षाच्छिवधर्मत्वस्य प्रतिपन्नत्वात्परिशेषेण नारायणस्य तदंशत्वं सिद्ध्यतीति यच्छिवस्योपादानभावप्रयुक्तं सर्वानुस्यूतत्वं श्रुतं तदनेन तच्छक्त्यंशभूतेन नारायणेन द्वारेणेति सिद्ध्यतीत्येवमायामशब्दा- 'त्तदनेन सर्वगतत्व' मिति निर्दिष्टस्य साध्यस्य सिद्धिः। तथा 'सर्वो वै रुद्र' इत्यत्रोपादानभावेन सार्वात्म्यं विवक्षितम् । 'विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमान' मित्यग्रे सर्वस्य कार्यरूपतोक्तेः तत्कथं रुद्रस्योपपद्यते । पुरुषस्य हि तथा सार्वात्म्यं 'पुरुष एवेदं सर्व' मित्यादिश्रुत्यन्तरे प्रसिद्धमिति शंकावारणाय 'पुरुषो वै रुद्र' इति तदनंतरवाक्यं प्रवृत्तम् । तेना 'प्यनेन सर्वगतत्व' मिति निर्दिष्टस्य साध्यस्य सिद्धिः। 'तस्यावयवभूतेने' त्यनेन च सकलवैपरीत्यशंकानिवर्तनक्षमेण तस्य सिद्धिः । एवमायामशब्दादिभ्यो हेतुभ्यः प्राप्तं यत्परमेश्वरस्य स्वधर्मांशभूतनारायणद्वारेणोपादानतया सर्वगतत्वमस्मादपि हेतोः परमेश्वरेण समः कोऽपि नास्ति । संभावितसाम्यस्य नारायणस्य तद्धर्मांशभावेन तदुपादानत्वघटकतया तदुपसर्जनत्वात् अन्यस्य च तत्साम्यसंभावनास्पदस्याभावादिति पूर्वसूत्रोक्तेना 'न्यप्रतिषेधा' दिति समनिषेधहेतुनास्य हेतोस्समुच्चयः प्राक् 'अतोऽपी' ति सूत्रावतारिकाभाष्येण दर्शितः । एतत्सूत्रविवरणभाष्ये 'सर्वाननशिरोग्रीव' इति मन्त्रः प्राधान्येनायामशब्दरूपहेतुतयोपात्तः । तदुपोद्बलकतया 'विश्वतश्चक्षु' रित्यादय उपात्ताः । 'अणोरणीया' नित्यादेरणुतोऽप्यणीयान्पदार्थः परमेश्वरः एवं महतो महीयान्पदार्थोऽपि स एवेति सार्वात्म्यमर्थमभिप्रेत्य तदुदाहरणम् 'सर्वो वै रुद्र' इत्याद्यंशस्य त्वादिशब्दोपात्तद्वितीयहेतुसमर्पकतया । तृतीयहेतुसमर्पक 'स्तस्यावयवभूतेने'त्यादिः पूर्वसूत्र एवोदाहृत इति पुनरिह नोदाहृतः । एवञ्चान्यप्रतिषेधमात्रं पूर्वसूत्रे विवक्षितो हेतुः तर्हि श्रुत्यन्तरदर्शनतः समापतन्त्याः नारायणस्य तत्साम्यप्रतीतेः कः प्रतीकार इति शंकाया निराकरणमेतत्सूत्रोक्तहेतुप्रसादलभ्यमप्याकांक्षाशांतये भाष्यकृता पूर्वसूत्रे कृतमिति सर्वमनवद्यम् ॥ ॥ इति अन्यप्रतिषेधाधिकरणम् ॥ ८ ॥

## नयमणिमालायाम्

## अथ अन्यप्रतिषेधाधिकरणम् ॥ ८ ॥

सू० ॥ **तथान्यप्रतिषेधात्** ॥ ३५ ॥ **अनेन सर्वगतत्वमायामशब्दादिभ्यः** ॥ ३६ ॥

माभूत्परो महेशात् समस्तु नारायणोऽस्त्येव । श्रूयन्ते परधर्मास्तस्यापि हि कारणत्वाद्याः ॥ १९७ ॥
नास्ति समस्तस्यान्यप्रतिषेधात्कारणत्वमुख्येषु । नारायणे श्रुता अपि तदवस्थं प्राप्नुयुश्शिवं धर्माः ॥ १९८ ॥
मायांत्वित्यादिमंत्रप्रथितजगदुपादानभावस्य पुंसो नैव स्वप्रेरकत्वं समुपगतवता विश्वकर्त्रास्ति साम्यम् ।
तस्माद्यद्धर्मजातं पिशुनयति परब्रह्मभावं मुकुन्दे तत्सर्वं पर्यवस्येद्विषमशरहरे तादवस्थ्यं दधाने ॥ १९९ ॥

**इत्यन्यप्रतिषेधाधिकरणम् ॥ ८ ॥**

## सूत्रार्थचन्द्रिकायाम्

### अथ पराधिकरणम् ॥ ७ ॥

सू ॥ **परमतस्सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ ३० ॥ सामान्यात्तु ॥ ३१ ॥ बुद्ध्यर्थः पादवत् ॥ ३२ ॥ स्थानविशेषात्प्रकाशादिवत् ॥३३॥ उपपत्तेश्च ॥३४॥ तथान्यप्रतिषेधात् ॥३५॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३६ ॥**

**भगवत्पादमते,** पूर्वं 'नेतिनेती'ति ब्रह्मातिरिक्तं वस्तु निषेध्यमित्युक्तमयुक्तम् । ब्रह्मणस्सेतुत्वोन्मानादिव्यपदेशेन वस्त्वन्तरसत्त्वावगमाद्द्युभ्वाद्यधिकरणे सेतुत्वस्य गौणत्वेन नीतत्वेऽपि उन्मानादीनां गतेर्दर्शनादित्याक्षेपसंगत्येदमाह—**सू ॥ परमतस्सेतून्मानसंबन्धभेदव्यपदेशेभ्यः** ॥ ३० ॥ अत्र ब्रह्मातिरिक्तं वस्त्वस्ति वा न वेति **संदेहः । अतः**= अस्माद्ब्रह्मणस्सकाशात् । परं वस्त्वस्ति । 'अथ य आत्मा स सेतुः' इति ब्रह्मणस्सेतुत्वव्यपदेशात्, तथा '**ब्रह्म चतुष्पात्' इति** श्रुतौ उन्मानव्यपदेशात्, एतावदिदमिति परिच्छिन्नत्वव्यपदेशात्, सुषुप्तौ 'प्राज्ञेनात्मना संपरिष्वक्तः' 'शारीर आत्मा' इत्यादिना ब्रह्मणस्संबन्धव्यपदेशात्, आदित्ये हिरण्मयं पुरुषमीश्वरं व्यपदिश्य ततो भेदेन अक्षिस्थपुरुषस्य व्यपदेशात् । तस्मात्सद्वितीयं ब्रह्मेति सिद्धम् ॥ इति **पूर्वपक्षः ॥ सिद्धान्तस्तु,**

**सू ॥ सामान्यात्तु** ॥ ३१ ॥ तुशब्दः पूर्वपक्षनिरासार्थः । मृद्दार्वादिमये हि सेतुशब्दो रूढो लोके । न हि **ब्रह्मणस्ता**दृशं सेतुत्वमस्ति किं तु यथा सेतोर्जलव्यवस्थापकत्वम् एवं ब्रह्मणोऽपि जगन्मर्यादाव्यवस्थापकत्वेन प्रसिद्धसेतुसामान्यात्साम्यात्सेतुत्वव्यपदेश इत्यर्थः ॥

उन्मानव्यपदेशोऽपि न मुख्य इत्याह–**सू ॥ बुद्ध्यर्थः पादवत्** ॥ ३२ ॥ 'ब्रह्म चतुष्पात्' इति श्रुतौ उन्मानव्यपदेशो **बुद्ध्यर्थः**=उपासनार्थः । निर्विशेषस्य बुद्धिस्थत्वायोगात् । उपासनाद्वारा बुद्धिस्थस्योन्मानव्यपदेशो न मुख्यः । **पादवत्**=यथा ब्रह्मप्रतीकस्य मनसो वाग्प्राणचक्षुःश्रोत्राणामुपासनार्थं पादत्वेन व्यपदेशस्तद्वदित्यर्थः ।

संबन्धभेदव्यपदेशावपि न मुख्यावित्याह–**सू ॥ स्थानविशेषात्प्रकाशादिवत् ॥ ३३ ॥ स्थानविशेषात्**= स्थानमुपाधिर्बुद्ध्यादिस्तद्विशेषात्प्राप्तस्य भेदस्योपाध्युपशमाय उपशमस्स एव प्राज्ञेनात्मना जीवस्य सुषुप्तौ संबन्ध इत्युपाध्यपेक्षयोपचर्यते । अक्ष्यादित्यपुरुषयोर्भेदव्यपदेशोऽप्यक्ष्यादित्यरूपस्थानविशेषापेक्षयोपचर्यते । **प्रकाशादिवत्**=यथा सौरालोकादेरंगुल्याद्युपाधियोगादुपजातभेदस्योपाध्युपशमात्संबन्धव्यपदेशः, उपाधिभेदाच्च भेदव्यपदेशस्तद्वदित्यर्थः ॥

ननु मुख्यावेव संबन्धभेदौ किं न स्यातामित्यत आह–**सू ॥ उपपत्तेश्च** ॥ ३४ ॥ न मुख्यसंबन्धो जीवपरयोः सुषुप्तौ भवति । 'स्वमपीतो भवति' इति श्रुतौ स्वरूपस्यैव संबन्धत्वव्यपदेशोपपत्तेः । तथा भेदोऽपि मुख्यः । **श्रुतिसहस्रविरोधात् ।** इत्युपपत्तेश्चेत्यर्थः ॥

इत्थं सेतुत्वादीन्भेदहेतून्निराकृत्य ब्रह्मणोऽद्वितीयत्वं हेत्वन्तरेणाह–**सू ॥ तथान्यप्रतिषेधात्** ॥ ३५ ॥ यथा सेतुत्वादिहेतुभ्यो न वस्त्वन्तरप्रतिपत्तिः तथा 'आत्मैवाधस्तात्' इत्यादिवाक्यैरन्यस्य वस्तुनः प्रतिषेधादद्वितीयमेव ब्रह्मेत्यर्थः ॥

ननु ब्रह्मणोऽद्वितीयत्वे कथं सर्वगतत्वमत आह—**सू ॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३६ ॥ अनेन**= सेतुत्वादिव्यपदेशमुख्यत्वस्य वस्त्वन्तरस्य च प्रतिषेधेन ब्रह्मणस्सर्वगतत्वं सिद्धम् । अप्रतिषेधे प्रसिद्धसेतुवद्ब्रह्मणस्सर्वगतत्वं प्रसज्येत । कस्मात्पुनस्सर्वगतत्वम् ? । **आयामशब्दादिभ्यः**=आयामशब्दो व्यापकत्ववाचकः । 'आकाशवत्सर्वगतश्च नित्यः' इत्यादिशब्दात् आदिशब्देन 'नित्यस्सर्वगतः स्थाणुः' इत्यादिरुक्तः । तस्मादद्वितीयस्य ब्रह्मण आविद्यकं सर्वमादाय श्रुतिस्मृतिभ्यां सर्वगतत्वं सिद्धम् ॥

**श्रीकण्ठमते,** इदमधिकरणद्वितयात्मकतया विभज्य **पराधिकरणमन्यप्रतिषेधाधिकरणमिति** व्यपदिश्यते । तत्राद्ये पराधिकरणे सर्वज्ञतादिनिखिलमंगलगुणरत्नाकरात्परब्रह्मणः परमशिवात्परं किंचिदपि वस्त्वन्तरं नास्तीति वक्तुमाशंकते–**सू ॥ परमतस्सेतून्मानसंबन्धभेदव्यपदेशेभ्यः** ॥ ३० ॥ 'जन्माद्यस्य यतः' इत्यादिना परमकारणतया प्रतिपादितात्परमेश्वरात्परमपि वस्त्वस्ति वा न वेति **संदेहः** । 'अथ य आत्मा स सेतुर्विधृतिः' 'एतं सेतुं तीर्त्वा अन्धस्सन्ननन्धो भवति' 'चतुष्पाद्ब्रह्म' 'अमृतस्यैष सेतुः इत्या'दिभिरस्य परब्रह्मणः सेतुत्वतरितव्यत्वपरिमितत्वप्रापकत्वादीनां व्यपदेशादस्मादपि परं किञ्चिद्वस्त्वस्तीति **पूर्वपक्षः ॥ सिद्धान्तस्तु, सू ॥ सामान्यात्तु** ॥ ३१ ॥ तुशब्दः पूर्वपक्षं व्यावर्तयति । 'विश्वाधिको रुद्रो महर्षिः' इत्यादिश्रुतिभिः परब्रह्मणश्शिवस्य विश्वाधिकत्वसिद्धेः, 'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाये' ति सर्वलोकासंकरकरत्वेन साम्यादेव सेतुव्यपदेशोपपत्तेः, 'सर्वं खल्विदं ब्रह्मे'ति प्रतिपादितजगदुभयकारणभावस्य परमेश्वरस्यैव 'एतमितः प्रेत्याभिसंभवितास्मि' 'त्रिलोचनं नीलकण्ठं प्रशान्त' मित्यादिकया च श्रुत्या सर्वोत्तरतः प्राप्यत्वावगमाच्च तरितव्यत्वस्य प्राप्यत्वपरत्वात्, अन्यथानवस्थाप्रसंगाच्च परिमितत्वव्यपदेशस्य 'वाक्पादश्चक्षुः पादः' इतिवदुपासनार्थत्वात् अपरिमितस्यापि परमेश्वरस्य स्थानविशेषाद्वातायनादिस्थानसंबन्धात्प्रकाशादेरिवावच्छिद्या-

नुसंधानोपपत्तेः, 'यमेवैष वृणुते तेन लभ्यः' इत्यादिश्रुत्या प्राप्यस्यैव परमेश्वरस्य प्रापकत्वोपपत्तेश्च सर्वोत्तरात्परमशिवात्परं वस्तु किञ्चिदस्तीति वादो न युक्तः । अतः परमेश्वरान्नास्ति परमिति सिद्धम् इति । अनेन 'बुद्ध्यर्थः पादवत्' इत्यादीनि त्रीणि सूत्राण्यपि व्याख्यातानि ॥ **इति श्रीकण्ठमते पराधिकरणम्** ॥ ७ ॥

## अथ अन्यप्रतिषेधाधिकरणम् ॥ ८ ॥

**सू ॥ तथान्यप्रतिषेधात्** ॥ ३५ ॥ अत्राधिकरणे पूर्वाधिकरणोक्तरीत्या परमेश्वरादुत्कृष्टवस्त्वभावेऽपि जगत्कारणत्वेनेश्वरत्वादिना तत्सदृशोऽस्ति वा न वेति **संदेहः** । 'सहस्रशीर्षा पुरुषः' इत्यादिश्रुतिभिः बहुमुखपादादिमान् जगद्विशिष्टः परमाकाशवर्ती अव्यक्तहिरण्यगर्भोपादानः तमःपरः पुरुषनारायणशब्दवाच्यो मोक्षहेतुः कश्चित्तत्सदृशोऽस्तीति **पूर्वपक्षः** । **सिद्धान्तस्तु,** यथा परमेश्वरादुत्कृष्टं वस्तु नास्ति **तथा** तत्सदृशोऽपि नास्त्येव । जगत्कारणत्वेश्वरत्वादौ 'एक एव रुद्रो न द्वितीयाय तस्थुः' 'शिव एव केवलः' इत्यादिभिः परमेश्वरादन्यस्य प्रतिषेधात् । सर्वस्यास्य प्रपञ्चस्य परमेश्वरविभूतिमयत्वात्परमेश्वरेण सदृशमुत्कृष्टं वा वस्तु नास्त्येवेति । आयामो महाव्याप्तिः । जगद्व्याप्तिप्रतिपादनपरैरुपनिषद्वचनजातैः स्वधर्मांशभूतेनोपादानपुरुषेण निमित्तस्य परब्रह्मणः सर्वगतत्वप्रतिपादनात् सर्वस्यास्य परमेश्वरविभूतिमयत्वाच्च न काप्यनुपपत्तिः ॥ इति च ॥

**रामानुजमते** तु शांकरमतवदिदमेकमेवाधिकरणम् । सूत्रार्थवर्णनादिकं प्रायः श्रीकण्ठमतवदेव । श्रीकण्ठमते भिन्नाधिकरणतया व्याख्यातस्य **'तथान्यप्रतिषेधात्'** इति सूत्रस्य तु 'न तस्येशे कश्चने' त्यादिश्रुतिषु पुरुषादन्यस्य परत्वप्रतिषेधादित्यर्थः । **सू ॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः** ॥ 'नित्यं विभुं सर्वगतं सुसूक्ष्म'मित्यादिसर्वव्याप्तिवाचिशब्देभ्योऽवगम्यमानम् अनेन ब्रह्मणा सर्वस्य व्याप्तत्वमेतस्मात्परं वारयतीत्यर्थः । अन्यत्सर्वं श्रीकण्ठभाष्यप्रतिपादितपराधिकरणवत् । परब्रह्मणोऽन्यत्तदुत्कृष्टं वस्तु नास्त्येवेति सिद्धान्तितम् । सर्वत्र श्रीकण्ठरामानुजमतयोः प्रायस्समानप्रक्रियत्वेऽपि परब्रह्मशब्दवाच्यं जगत्कारणं वस्तु परं नामतो रूपतश्च भिन्नमिति वेद्यम् । **इति रामानुजमते पराधिकरणम्** ॥ ७ ॥

**आनन्दतीर्थमते,** इदमधिकरणचतुष्टयात्मकतया व्याख्यातम् । तत्राद्ये पराधिकरणे परमात्मनि अतिनिरतिशयभक्तिसिद्ध्ये तदीयगुणानां लौकिकगुणवैलक्षण्यं समर्थ्यते—**सू ॥ परमतस्सेतून्मानसंबन्धभेदव्यपदेशेभ्यः** ॥ ३२ ॥ अत्र ब्रह्मगुणजातं लोकविलक्षणं न वेति **संदेहः** । लोकविलक्षणं न भवतीति **पूर्वपक्षः** । लोकविलक्षणमेवेति **सिद्धान्तः** । **सूत्रार्थस्तु,** ब्रह्मगुणजातं **परमतः**=लोकविलक्षणम् । कुतः । **सेतून्मानसंबन्धभेदव्यपदेशेभ्यः**='एष सेतु'रिति सेतुत्वोक्तेः 'यतो वाच' इत्युन्मानशब्दितपूर्णत्वोक्तेः 'एतस्यैवानन्दस्ये'ति बिंबप्रतिबिंबभावसंबन्धोक्तेः 'अन्यज्ज्ञानं त्वि'ति लौकिकानन्दाद्भेदोक्तेश्चेत्यर्थः ॥

**सू ॥ दर्शनात्** ॥ ३३ ॥ अन्यमतेषु **'सामान्यात्तु'** इति अन्यथा सूत्रपाठो दृश्यते । अत्र मत एव **'दर्शना'दिति** पाठभेदः । अन्यानन्दादीनां प्रत्यक्षसिद्धत्वान्मनोवागविषयत्वाच्च ब्रह्मानन्दस्यातथात्वादेव लोकविलक्षणत्वमित्यर्थः ॥

**सू ॥ बुद्ध्यर्थः पादवत्** ॥ ३४ ॥ यथा लोकपादविलक्षणेषु जीवाख्यभूतेषु 'पादोऽस्य विश्वा भूतानी'ति पादपदप्रयोगः **बुद्ध्यर्थः**=भूतानामीशांशत्वज्ञापनार्थः । तथा लौकिकेऽपि ब्रह्मानन्दादावानन्दपदप्रयोगः बुद्ध्यर्थः अनुकूलतया वेदनीयत्वादिधर्मज्ञापनार्थ इत्यर्थः ॥ **इति पराधिकरणम्** ॥ १६ ॥

## अथ स्थानविशेषाधिकरणम् ॥ १७ ॥

**सू ॥ स्थानविशेषात्प्रकाशादिवत्** ॥ ३५ ॥ 'एतस्यैवानन्दस्ये'ति श्रुत्या हिरण्यगर्भादिजीवगतलौकिकानन्दानां ब्रह्मानन्दप्रतिबिंबत्वमुक्तम् । तथा सति बिंबावैचित्र्येण लौकिकानन्दानां वैचित्र्याभावप्रसंगात् बिंबप्रतिबिंबभावोक्तिरनुपपन्नेति **पूर्वपक्षः** । **सिद्धान्तस्तु, प्रकाशादिवत्**=यथा सूर्यकान्तादिगतसूर्यादिप्रतिबिंबेऽग्निजनकत्वादिवैचित्र्यं **स्थानविशेषात्**सूर्यकान्तादिस्थानगुणवैचित्र्यादुपपद्यते तथा ब्रह्मादिस्थानगतभक्त्यादिगुणवैचित्र्याद्भगवदानन्दप्रतिबिंबेषु ब्रह्माद्यानन्देष्वपि वैचित्र्यमुपपद्यत इत्यर्थः ॥

**सू० ॥ उपपत्तेश्च** ॥ ३६ ॥ बिंबभूतभगवदैश्वर्यवशादेव प्रतिबिंबभूतब्रह्माद्यानन्दवैचित्र्योपपत्तेश्च तत्प्रतिबिंबत्वमितरेषां युक्तमेवेत्यर्थः ॥ **इति स्थानविशेषाधिकरणम्** ॥ १७ ॥

## अथ तथान्यप्रतिषेधाधिकरणम् ॥ १८ ॥

**सू ॥ तथान्यप्रतिषेधात्** ॥ ३७ ॥ अत्र ब्रह्मणः प्राङ्निरूपितमव्यक्तत्वं पुनराक्षिप्य समर्थ्यते । ध्यातॄणां हृदि ध्यानकाले स्फुरणात् ब्रह्माव्यक्तं न भवतीति **पूर्वपक्षः** । **सिद्धान्तस्तु,** यथा जीवानन्दादि ब्रह्मानन्दादेर्विलक्षणं तथा ध्यानकाले प्रतीतं वासनामयं वस्तु ब्रह्मणोऽन्यत्तत्प्रतिबिंबभूतमेव । कुतः । 'यन्मनसे'ति तदन्यस्य ब्रह्मत्वप्रतिषेधादित्यर्थः । तस्माद्ध्याननिमित्तं रूपं ब्रह्मणः प्रतिबिंबविशेष इति तदुपासनयैव प्रतिमोपासनयेव तद्गतं ब्रह्म प्रसन्नं सदव्यक्तमपि स्वसामर्थ्यादपरोक्षीभवतीति युक्तम् ॥ इति ॥ **इति तथान्यप्रतिषेधाधिकरणम्** ॥ १८ ॥

## अथ फलाधिकरणम्. ॥ ९ ॥

**एवं सर्वेश्वरतया सर्वात्मकतया स एव परमेश्वरः सर्वकर्मणां तत्तद्देवतारूपेण स्वरूपेण च फलदाता भवतीति निरूपयितुमाह—**

### सू ॥ फलमत उपपत्तेः ॥ ३७ ॥.

**इह पूर्वत्र सर्वेश्वरतया प्रतिपादितस्य परब्रह्मण एव सर्वानुष्ठातॄणामनुष्ठानफलदातृत्वमुतान्यस्येति संशयः ॥**

**अनुक्षणविनाशिनोऽपि कर्मणोऽपूर्वव्यवधानेन कालान्तरभाविफलदाने सामर्थ्यमस्त्येव । ततः कर्मणः फलदातृत्वे सिद्धे तदतिरिक्ताप्रसिद्धपरमेश्वरकल्पने गौरवप्रसङ्गात् तस्य न फलदातृत्वमिति पूर्वः पक्षः ॥**

---

## अथ फलाधिकरणम् ॥ ९ ॥

संगतिं सूचयन्नुत्तराधिकरणमवतारयति–एवमिति । यथा निरस्तसमस्तदोषस्सकलमंगलगुणरत्नाकरस्सर्वकारणत्वसर्वेश्वरत्वादिविषये समाभ्यधिकरहितश्च परमेश्वरः एवं सकलकर्मजातानां स्वर्गापवर्गादिफलप्रदोऽपि स एवेति तस्य महिमान्तरं निरूपयितुमधिकरणमारभ्यत इत्यर्थः । अनेन महाप्रभुर्महावदान्यश्च फलेप्सुभिस्सर्वैस्सेव्यो नान्यः । 'एकाह्राद्वा तेषां समत्वात्स्या' दिति न्यायात् । तत्रोत्तरपादप्रतिपादनीयाभिरुपासनाभिराराधनीयत्वसिद्ध्यर्थं परमेश्वरस्यानन्यसामान्यं महाप्रभुत्वं निरूपितम् । इदानीं कर्मभिरुपासनैश्च प्रीतो महाफलं प्रयच्छतीति तस्य महावदान्यत्वं प्रतिपाद्यत इति संगतिः सूचिता । **सू ॥ फलमत उपपत्तेः ॥ ३७ ॥** विधिश्रुते 'र्यमेभ्यो लोकेभ्य उन्निनीषत' इत्यादिश्रुतेश्च संशयमाह–पूर्वत्रेति । अन्यस्येति । कर्मण इत्यर्थः । ननु तत्कालविनाशिनः कर्मणः कथं फलजनकत्वम् । अपूर्वव्यापारकल्पने तु 'धर्मिकल्पनातो वरं धर्मकल्पने'ति न्यायादीश्वरस्यैव फलदातृत्वकल्पना युक्तेति पूर्वपक्षस्य नावकाश इत्याशंक्याह–अनुक्षणेति । केवलः परमेश्वरः कर्मफलदातेति वक्तुं न शक्यते । अदृष्टवत्तस्य विपाकापेक्षत्वाभावेन स्वर्गादेः कालान्तरभावित्वभङ्गप्रसंगात् । कर्मोपासनाभिराराधितस्य प्रसन्नस्य परमेश्वरस्य फलदातृत्वपक्षेऽपि कर्मानुष्ठानानंतरमेव प्रसादो वक्तुं शक्यते । परमस्वतन्त्रस्य प्रसादे सति फले विलंबायोगात् प्रयाजादिभिरंगैस्तदनुष्ठानानंतरमेव प्रसादे सति प्रधानानुष्ठानेऽपि अंगान्तरकैवल्येऽपि फलनिष्पत्तिप्रसंगाच्च । तस्मात्कर्मभिरपूर्वे निष्पादिते तस्य परिपक्वतया फलजननौन्मुख्यदशायां परमेश्वरस्य प्रसादो वक्तव्यः । तथा चावश्याभ्युपगन्तव्यापूर्व-

---

#### अथ सर्वगतत्वाधिकरणम् ॥ १९ ॥

**सू ॥ अनेन सर्वगतत्वमायामयशब्दादिभ्यः ॥ ३८ ॥** अत्र देशकालान्तरेषु सृष्ट्यादिकमन्येनापि परमेश्वरदत्तस्वातन्त्र्येण क्रियत इति वक्तुं युज्यते वा न वेति **संदेहः** । यथा लोके स्वतन्त्रोऽपि राजा स्वयमेक एव राज्यधुरां निर्वहतीति नियमो नास्ति किं तु तद्दत्तस्वातन्त्र्यस्तत्रतत्रान्योऽपि निर्वहति तथा सृष्ट्यादिकमन्येनापि परमेश्वरदत्तस्वातन्त्र्येण देशकालान्तरेषु क्रियत एवेति युक्तमेवेति **पूर्वपक्षः । सिद्धान्तस्तु, अनेन** भगवतैव सर्वदेशकालयोः सृष्ट्यादिर्भवति । न तु देशकालान्तरयोरन्येन । कुतः । **सर्वगतत्वमायामयशब्दादिभ्यः** 'एष सर्वगत' इति सर्वगतत्वश्रुतेः तस्य च सृष्ट्याद्यर्थत्वात् विष्णौ प्रयुक्तमायामयशब्दव्याख्यानरूपसर्वत्रेत्यादिश्रुतेश्चेत्यर्थः । अन्यत्र प्रमाणाभावाच्चेत्यादिशब्दार्थः ॥ अत्रमते **'मायामयशब्दादिभ्यः'** इति पाठो विशिष्टः । **इत्यानन्दतीर्थमते सर्वगतत्वाधिकरणम् ॥ १९ ॥**

**इति सूत्रार्थचन्द्रिकायां पराधिकरणम् ॥ ७ ॥**

---

( १ ) 'सर्वेषां कर्मोपासनानाम्' इति ख. पाठः ।

सिद्धान्तस्तु–परमेश्वरादेवाराधितात् सर्वेषां कर्मफलसिद्धिः । उपपत्तेः, सेवितराजादिवदुपासितात् परमेश्वरादुपासकानां फलसिद्ध्युपपत्तेः। न हि अचेतनस्य कर्मणोऽपूर्वस्य वा तारतम्येन प्रतिनियतं फलं ज्ञातुं दातुं सामर्थ्यमस्ति, सेवाक्रियायामचेतनायां तथा दर्शनात् । इह शास्त्रसिद्धस्य परमेश्वरस्याकल्प्यत्वान्न कल्पनागौरवम् । तथा हि—'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति एष एवासाधु कर्म कारयति यमधो निनीषति' इति श्रुतिरीश्वरस्यैव धर्माधर्मफलदातृत्वं तत्कारयितृत्वं च वदति । प्रत्युत अपूर्वस्यैवाश्रुतस्य कल्पने गौरवम् । तस्मात् कर्मभिराराधितः परमेश्वरः फलदाता न कर्मेति निर्णयः ॥

## सू ॥ श्रुतत्वाच्च ॥ ३८ ॥

श्रूयते हि सर्वकर्मणामधिपतिः परमेश्वरः, तदाराध्यत्वात् तत्फलदातृत्वाच्च–'गाथपतिं मेधपतिं रुद्रं जलाषभेषजम्'।'आ वो राजानमध्वरस्य रुद्रम्।' इत्यादिषु॥

---

व्यापारेण कर्मण एव फलजनकत्वोपपत्तौ किमीश्वरस्यापि तत्फलदातृत्वकल्पनया तत्प्रसादकल्पनया वा । न च पुरुषस्य यागदानहोमादिकर्मभिः परमेश्वरस्य प्रसादोत्पत्तौ किञ्चित्कारणमस्ति । न च तेषां तत्प्रसादजनकत्वोपपत्तये तदाराधनरूपत्वं कल्पनीयम् । कल्पकाभावात् । तत्प्रसादे हेतुत्वेन तदाराधनत्वकल्पनेऽन्योन्याश्रयादिति भावः । उपपत्तेरिति । राजसेवान्यायप्रदर्शनेन केवलस्य कर्मणः फलदातृत्वं नोपपद्यत इत्यपि सूचितम् । तदुपपादयति–न हीति । ननु, तत्तत्कर्मणः स्वाभाव्यात्प्रतिनियतविचित्रफलविशेषजनकत्वं भवेत् । किमत्र ज्ञानापेक्षया । अतः क्लृप्तस्य कर्मण एव फलजनकत्वोपपत्तौ परमेश्वरस्यापि फलदातृत्वमक्लृप्तं कल्पनीयमित्याशंक्य न कल्प्यते तत्, किं तु श्रूयत इति गौरवमकिञ्चित्करमित्याह–इहेति । एवं च श्रुतेन फलदातृत्वेनैव कर्मणां परमेश्वरप्रसादहेतुत्वं तदुपपादकं तदाराधनरूपत्वं च कल्प्यत इति नान्योन्याश्रय इति भावः। विपरीतं गौरवमित्याह–प्रत्युतेति । ननु, श्रुतं कर्म परित्यज्याश्रुतमपूर्वं फलजनकमिति न कल्प्यते किं तु श्रुतमेव कर्मणां फलजनकत्वमुपपादयितुं तत्कल्प्यते । श्रुताभ्युपगम इव श्रुतनिर्वाहार्थकल्पनेऽपि गौरवं न दोष इति चेदेवं तर्हि कर्मण ईश्वरस्य च श्रुतं फलकारणत्वमुपपादयितुं कर्मणामीश्वरप्रसादस्य च मध्यवर्त्तित्वेनैव तत्कल्पनमुचितं न तु साक्षात्फलजनकत्वेन । कर्मण इव ईश्वरस्यापि फलकारणतायाः श्रुतत्वाविशेषेण तदनपेक्षानौचित्यादिति भावः । एवं कर्मणामीश्वराराधनत्वकल्पनामाश्रित्य तस्य कर्मफलदातृत्वमुपपादितम् । अथ कर्मणामीश्वराराधनत्वमपि श्रुतमेवेति प्रतिपादनार्थं सूत्रम्–श्रुतत्वाच्च ॥ ३८ ॥ गाथाः स्तोत्राणि । मेधा यज्ञाः। जलाषशब्दस्सुखवाची वैदिकनिघण्टुषु प्रसिद्धः। जायन्त इति जाः प्राणिनः तैर्लष्यतेऽभिलष्यत इति व्युत्पत्तेः । तदर्थं भेषजं तद्रूपं वा भेषजम् । ननु मेधपतिमित्येतद्यद्यपि परमेश्वरे यजमानत्वेन नोपपद्यते तथापि परमेश्वरविषयसेतुशब्दोक्तेन कर्मणामसंकरकारित्वेनोपपद्यते । अतस्तदाराधनरूपतायां नेदं प्रमाणमित्याशंक्य तत्र प्रामाण्यमुपपादयितुमुपबृंहणान्युदाहरति–स्मृतिरपीति । तथा चोपबृंहणानुरोधेन 'मेधपति' मित्यादेः 'आशासाना मेधपतिभ्यां मेध' मित्यादिवत्तत्तत्कर्माराध्यपरतयैवोपपादनं कार्यमिति भावः । 'आवो राजान' मिति मंत्रस्याप्येवमेवोपबृंहणं शिव-

एतन्मूला स्मृतिरपि परमेश्वरस्य सर्वयज्ञाधिपत्यं वदति—
'सोमेनाराधयेद्देवं सोमं सोमविभूषणम् ।' इति ॥ 'नाश्वमेधात्परो यज्ञो रुद्रस्याराधनं प्रति ॥' इति च रामायणम् ।

चमकेषु 'वाजश्च मे प्रसवश्च मे धाता च मे विष्णुश्च मे' इत्यादिषु च वाजादीनां वस्तूनां विष्ण्वादीनां देवतानां देयत्वप्रतीतेः परिशेषादीश्वरस्य सर्वकर्मफलदातृत्वसिद्धिः । अतः परमेश्वर एव सर्वयज्ञाराध्यः सर्वफलदाता ॥'

पक्षान्तरमाह—

## सू ॥ धर्मं जैमिनिरत एव ॥ ३९ ॥

धर्ममेवोपपत्तेः श्रुतत्वाच्च फलदायिनं जैमिनिर्मेने । उपपत्तिः कृष्यादेर्मर्दनादेश्च कर्मणः साक्षात् परंपरया वा फलसिद्धिनिदर्शनम् । श्रुतं च कामिनः कर्तव्यतया कर्मविधानान्यथानुपपत्त्या कर्मैवापूर्वरूपेण तत्तत्फलसाधनमिति ॥

पुराणे दृश्यते 'किमेभिरमरैरन्यैरध्वरे पूजितैः फलम् । राजा चेदध्वरस्यास्य न रुद्रः पूज्यते त्वये'ति । एवं सर्वकर्मणामाराध्यं तत्फलप्रदानधुरन्धरं च परं ब्रह्मेति व्यवस्थापितम् । तत्र 'मेधपतिं रुद्र'मित्यादिश्रुत्युदाहरणेन ब्रह्मा नारायणो वा कर्मणामाराध्यः फलप्रदाता चेति कल्पयतां निरवकाशत्वमपि प्रसंगात्सिद्धम् । तस्मिन्प्रसंगसिद्धेऽर्थे हेत्वन्तरमाह—चमकेष्विति । वाजादीनामिति दृष्टान्तार्थम् । वाजमन्नम् । विष्ण्वादीनां देयत्वं 'सर्वेऽस्मै देवा बलिमावहन्तीति' श्रुत्युक्तरीत्या तद्दृश्यतापादनम् । निरूपितोऽयमर्थः सुदर्शनाचार्यैः 'विष्णुप्रजापतिपुरन्दरपूर्वकेषु वाजादितुल्यमखिलेष्वपि दैवतेषु । आशंसितेषु चमकाः परिशिष्यमाणं दातारमीश्वर भवन्तमशाब्दमाहु' रिति प्रपञ्चेन च तैश्शिवस्य सर्वकर्माराध्यत्वं श्रुतिसूक्तिमुक्तावल्यां व्यवस्थापितं तत्रैवानुसंधेयम् । एवं दृढीकृतेऽपि सिद्धान्ते सिद्धान्तसिद्धमर्थं पूर्वपक्षिणं तद्रीत्यैवांगीकारयितुं पूर्वपक्षमुद्भावयति । सू ॥ धर्मं जैमिनिरत एव ॥ ३९ ॥ 'अत' एवे त्येतदुपपत्तिश्रुतत्वरूपोभयहेतुपरामर्शि । तत्र मर्दनादीनां यथा सान्दृष्टिकफलसाधनत्वं दृष्टम् एवं कृष्यादीनामुदर्कफलसाधनत्वमपि दृष्टमेव । न च कृष्यादिभिराराधितः कश्चिच्चेतनस्तत्फलं प्रयच्छति । तथैव यागादिकर्मणामपि स्वयमेव फलसाधनत्वमुपपद्यते इत्युपपत्तिः । 'यजेत स्वर्गकाम' इत्यादिश्रवणम् । तत्र हि यागादिकं कामिनः कर्त्तव्यतया बोध्यते न तु यागादिभिः कस्यचित्प्रसादनीयत्वम् । ननु, 'वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' 'तृप्त एवैनमिन्द्रः प्रजया पशुभिस्समर्द्धयती' त्यादिवाक्यशेषेण बोध्यत इति चेत् । न । तस्य बाधितार्थत्वात् । एतत्कल्पवर्तिनामिन्द्रादीनां कल्पान्तरभोग्यफलदातृत्वासंभवात् अचेतनदेवतानां कदापि फलदातृत्वासंभवाच्च । तस्मात्तत्तद्देवत्यकर्मफलमेव तत्तद्देवतादेयत्वेनारोप्य देवतास्तुतिपरो वाक्यशेषः । यथा कारीरीष्ट्यनन्तरं वृष्ट्या शुष्यत्सस्यफलनिष्पत्तौ जातायामेतैरिदं फलं दत्तमिति ऋत्विजः प्रति प्रशंसावाक्यम् । 'यमेभ्यो लोकेभ्य उन्निनीषते' 'अन्नादो वसुदान' इत्यादिवेदान्तगतार्थवादजातमुपपादनीयश्चेत्तदप्यसंकरेण सकललोकपालकस्य परमेश्वरस्य प्रशंसापरम् । दृश्यते ह्यसंकरेण राज्यं परिपालयतो राज्ञः प्रशंसावचन 'मयमत्र राज्ये कृष्यादिकर्मणां

सू ॥ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४० ॥

**पूर्वोक्तं परमेश्वरस्यैव कर्मफलदातृत्वं भगवान् बादरायणो मन्यते, 'वायव्यं श्वेतमालभेत भूतिकामः' 'स एवैनं भूतिं गमयति' इत्यादिषु परमेश्वरात्मकतया वाय्वादीनां कर्मविधिष्वेव फलहेतुत्वव्यपदेशात् । तदभावे हि क्षणिकस्य कर्मणः फलसाधनत्वनिर्वाहार्थमपूर्वत्वं कल्प्येत । वाक्यशेषोपपादितविध्यपेक्षितफलसाधनत्वप्रकारसद्भावे तु स एव स्वीकर्तव्यः । यथा वाक्यशेषस्थं विध्यपेक्षितं 'प्रतितिष्ठन्ति ह वा एता रात्रीरुपयन्ति' इत्यादिषु फलं स्वीक्रियते । 'यो वै रुद्रः स भगवान्' इत्यादिना वाय्वादिसर्वदेवतारूपत्वमीश्वरस्यावगम्यते अथर्वशिरसि । तत्रैव परमेश्वरेण 'यो मां वेद स सर्वान् देवान् वेद' इति स्वज्ञानात् स्वात्मकसकलदेवताज्ञानमुपपादितम् । अतः सकलदेवतारूपः सर्वकर्माराध्यः सर्वफलदाता परमेश्वरः परं ब्रह्म शिवः साक्षादुमापतिरिति सिद्धम् ।**

**इति फलाधिकरणम् ॥ ९ ॥**

**इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये तृतीयस्याध्यायस्य द्वितीयः पादः ॥ ३ ॥ २ ॥**

---

फलदाता स्वामी चे'ति । तस्मात्कर्मैव स्वर्गादिसाधनमिति जैमिनेर्मतम् । सू ॥ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४० ॥ रात्रिसत्रादेर्विध्यवगतेष्टसाधनत्वनिर्वाहायेष्टविशेषाकांक्षायां यद्वाक्यशेषप्रतीत इष्टविशेषो गृह्यते न तद्वाक्यशेषस्वारस्येन । 'प्रतितिष्ठन्ति हवा एते य एता रात्रीरुपयन्ती'ति वर्तमानोपदेशेनोभयोर्यौगपद्यप्रतीतेः कार्यकारणभावविरोधित्वात् । किं तु यदेतदौर्थ्यत्यस्तयोजनया 'प्रतितिष्ठन्ती'त्यत्र सन्नर्थान्तर्भावेन 'उपयन्ती' त्यत्र विधिविभक्तित्वाश्रयणेन च 'ये प्रतितिष्ठासन्ति त एता रात्रीरुपेयु' रिति व्यवधारणकल्पनया । न तावान्वायुक्षेपिष्ठादिवाक्येषु क्लेशोऽस्ति अन्तर्यामिपरत्वकल्पने । अतो रात्रिसत्रन्यायतः श्रुतपरमेश्वरप्रसादद्वारकत्वसिद्धौ पश्चात्तन्निर्वाहार्थमपूर्वकल्पना न गौरवदोषमावहति । न हि दर्शपूर्णमासयोरन्तःप्रयोगं श्रपणीयस्य पुरोडाशस्य प्रकृतिद्रव्योपादानाकांक्षायां पश्चादावश्यकतया प्राप्स्यन्तमपि पिष्टमतिलंघ्य श्रुतव्रीहिद्रव्यपरिग्रहेण समापततोस्तण्डुलपिष्टावस्थयोरपेक्षणं गौरवदोषेण परित्यज्यते । तस्माज्जैमिन्यभिमतन्यायेनैवात्र सिद्धान्तः सिध्यतीति सूत्रभाष्ययोराशयः । अपूर्वं कल्प्येतेति । परमेश्वरप्रसादानपेक्षमिति शेषः । तस्मादविकलं कर्मानुष्ठाय तत्सूक्ष्मावस्थारूपमपूर्वं सम्पाद्य तस्य यावद्विपाकं संकीर्तनादिभ्यो नाशकेभ्यस्संरक्षणे सति प्रसन्नः परमेश्वरस्तत्फलं प्रयच्छतीति निरवद्यम् ॥ इति फलाधिकरणम् ॥ ९ ॥

इति श्रीशिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरंधरसकलदेवभूदेवप्रतिष्ठापकश्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीसांबशिवप्रेरितस्य श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपिकाख्यायां तृतीयस्याध्यायस्य द्वितीयः पादः ॥ ३ ॥ २ ॥

## नयमणिमालायाम्

### अथ फलाधिकरणम् ॥ ९ ॥

**सू ॥ फलमत उपपत्तेः ॥ ३७ ॥ श्रुतत्वाच्च ॥ ३८ ॥ धर्मं जैमिनिरत एव ॥ ३९ ॥ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४० ॥**

कर्मण एवास्तु फलं किंचिद्द्वारा कृषिन्यायात् । मैवं कर्माराध्यः श्रुतः शिवस्तत्फलप्रदाता नः ॥ २०० ॥

### इति फलाधिकरणम् ॥ ९ ॥

## इति श्रीमदप्पय्यदीक्षितकृतौ चतुर्मतसारसंग्रहे नयमणिमालाख्ये तृतीयपरिच्छेदे तृतीयस्याध्यायस्य द्वितीयः पादः ॥ ३॥२॥

## सूत्रार्थचन्द्रिकायाम्

### अथ फलाधिकरणम् ॥ ८ ॥

**सू ॥ फलमत उपपत्तेः ॥ ३८ ॥ श्रुतत्वाच्च ॥ ३९ ॥ धर्मं जैमिनिरत एव ॥ ४० ॥ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥**

**भगवत्पादमते,** ननु ब्रह्मातिरिक्तस्य वस्तुनो निषेधे ब्रह्मणो निर्विशेषत्वेन फलदातृत्वं न स्यादित्याक्षेपसंगत्येदमाह— **सू ॥ फलमत उपपत्तेः ॥ ३८ ॥** अत्र किं सर्वस्य जन्तोः कर्मण एव फलं भवति उतेश्वरादिति **संदेहः । कर्मण** इति **पूर्वपक्षः । सिद्धान्तस्तु, अतः**=अस्मात्परमेश्वरात् फलं सर्वस्य जन्तोर्भवितुमर्हति । कुतः । **उपपत्तेः**=क्षणिकात्कर्मणः फलासंभवेनेश्वरस्यैव फलदातृत्वोपपत्तेरित्यर्थः ॥

**सू ॥ श्रुतत्वाच्च ॥ ३९ ॥** 'स वा एष महानज आत्मान्नादो वसुदान' इति ईश्वरे फलहेतुत्वस्य श्रुतत्वाच्चेश्वरः फलदातेत्यर्थः ॥

शङ्कते–**सू ॥ धर्मं जैमिनिरत एव ॥ ४० ॥** यतः श्रुत्युपपत्तिभ्यामीश्वरं फलदातारं मन्यते सिद्धान्ती, **अत एव**=श्रुत्युपपत्तिभ्याम् । धर्मं फलदातारं जैमिनिराचार्यो मन्यते । तथा हि–'स्वर्गकामो यजेत' इति **विधिविषयस्य यागस्य** स्वर्गसाधनत्वं श्रुतम् । तन्निर्वाहाय श्रुतिप्रामाण्यादपूर्वाख्यो व्यापारो यागस्योत्तरावस्थारूपः कल्पनीय इति **यागादिधर्म एव फलदाता, ईश्वरस्य** सर्वसाधारणस्य विचित्रफलदातृत्वानुपपत्तेरिति ॥

समाधत्ते **सूपूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥** तुरुक्तशंकानिरासार्थः । **पूर्वं**=पूर्वोक्तमीश्वरं **फलदातारं** बादरायणस्त्वाचार्यो मन्यते । कर्म अपूर्वं वा स्वस्वरूपस्वविनियोगसाक्षात्कारवदधिष्ठितं भवितुमर्हति अचेतनत्वान्मृदादिवदित्यनुमानेन संभाविते ऽर्थे श्रुतिस्मृती प्रमाणयति **हेतुव्यपदेशात्**—'एष ह्येव साधु कर्म कारयति' अन्नादो वसुदान' इति श्रुत्यां 'लभते च ततः कामान्मयैव विहितान्हितान्' इत्यादिस्मृत्या च ईश्वरस्य धर्माधर्मयोस्तत्फले च **हेतुत्वेन व्यपदेशा**दित्यतस्तत्तत्कर्मसापेक्षादीश्वरादेव सर्वेषां फलसिद्धिः । तदेवमधिकरणचतुष्टयेन निर्विशेषः स्वप्रकाशो निषेधाविषयोऽद्वितीयः शाखाचन्द्रन्यायेन कर्मफलदातृत्वेनोपलक्षितस्तत्पदार्थः परमात्मा शोधित इति तत्त्वंपदार्थौ शोधिताविति स्थितम् ॥ अस्मि**न्मते** अत्र **पादे अधिकरणान्यष्टौ** । सूत्राणि तु **एकचत्वारिंशत्** ॥

**श्रीकण्ठमते,** तथा **रामानुजमते** च **पूर्वपक्षसिद्धान्तादिकं** प्रमेयजातमविशिष्टम् । उपपादनप्रकारवैलक्षण्यात्सूत्रार्थवर्णने परमस्ति वैलक्षण्यमिति तदेवात्र निरूप्यते । **श्रीकण्ठमते–सू ॥ फलमत उपपत्तेः ॥ ३७ ॥ अतः**=परमेश्वरादेवाराधितात् । **फलम्**=सर्वेषां कर्मफलसिद्धिः । **उपपत्तेः**=सेवितराजादिवदुपासितात्परमेश्वरादुपासकानां फलसिद्ध्युपपत्तेः ॥ **रामानुजमते च** क्षणविध्वंसिनः कर्मणः कालान्तरभाविफलप्रदानाशक्तत्वात्सर्वज्ञस्य सर्वशक्तेश्च **परमेश्वरस्य** तदुपपत्तेश्चेत्यर्थः ॥

**सू ॥ श्रुतत्वाच्च ॥ ३८ ॥** 'गाथपतिं मेधपति' मित्यादिश्रुतिषु परमेश्वरस्य सर्वकर्माधिपत्यस्य **तत्फलदातृत्वस्य च** श्रुतत्वाच्चेत्यर्थः । **रामानुजमते तु,** 'स वा एष महानज आत्मान्नादो वसुदानः' 'एष ह्येवानन्दयाति' इति **भोगापवर्ग**रूपं फलमयमेव ददातीति श्रुतत्वाच्चेत्यर्थः ॥

**सू ॥ धर्मं जैमिनिरत एव ॥ ३९ ॥** उभयत्राप्यविशिष्टम् ।

**सू ॥ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४० ॥** पूर्वोक्तं परमेश्वरस्यैव फलदातृत्वं **भगवान्बादरायणो मन्यते** । 'स एवैनं भूतिं गमयती' त्यादिश्रुतिषु वाय्वाद्यात्मनावस्थितस्यैव परमेश्वरस्य कर्मविधिष्वेव **फलहेतुत्वव्यपदेशात्** । **रामानुजमते**ऽप्यविशिष्टम् ॥ अनयोर्मतयो**र्नवाधिकरणानि** सूत्राणि **चत्वारिंशत्** ॥

### इति श्रीकण्ठरामानुजमतयोः फलाधिकरणम् ॥ ९ ॥

**आनन्दतीर्थमते,** अत्रेश्वरस्य स्वर्गनरकादिफलप्रदत्वमहिमा समर्थ्यते-**सू ॥ फलमत उपपत्तेः ॥ ३९ ॥** ईश्वरस्य फलप्रदत्वमभ्युपगच्छतापि **कर्मणः** फलकारणत्वमवश्यमभ्युपगन्तव्यम् । अन्यथा वैषम्यनैर्घृण्यकर्मवैयर्थ्यतद्बोधकवेदाप्रामाण्यदोषापत्तेः। ततश्च कर्मण एव फलोपपत्तेः किमीश्वरेण। तस्य फलप्रदत्वश्रुतीनां साध्वसाधुकर्मणोस्तत्कारितत्वेनौपचारिकत्वोपपत्तेरिति **पूर्वपक्षः । सिद्धान्तस्तु,** सत्यं कर्म फलकारणं तत्तु न चेतनाप्रेरितं फलोपयोगीति यथाश्रुति परमेश्वर एव कर्मापेक्षफलदाता । अतः प्रतिपादितनिरतिशयमहिमशालिनि परमेश्वरे भक्तिः कार्येति सिद्धमिति । **सूत्रार्थस्तु, फलं**=स्वर्गादि । **अतः**=ईश्वरादेव भवति । न कर्मतः । कुतः । **उपपत्तेः**=ईश्वरस्य चेतनत्वेन फलदातृत्वस्य युक्तत्वादित्यर्थः ॥

**सू ॥ श्रुतत्वाच्च ॥ ४० ॥** श्रुतत्वात्=श्रुत्युक्तत्वाच्चेश्वरस्यैव फलदातृत्वमित्यर्थः ॥

**सू ॥ धर्मं जैमिनिरत एव ॥ ४१ ॥** जैमिनिराचार्यः धर्मं फलप्रदमाह । तं च धर्मं अत एव ईश्वरादेव जन्यं मन्यते । कुतः । **अत एव**='एष ह्येवे'ति श्रुतेरेवेत्यर्थः ॥

**सू ॥ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४२ ॥** बादरायणाचार्यस्तु **पूर्वं**=पूर्वोक्तं ब्रह्म धर्मं चोभयं फलहेतुं मन्यते । अत्र ब्रह्म कर्तृत्वेन कर्म करणत्वेन हेतुरिति विशेषस्तुशब्दार्थः । कुतः । **हेतुव्यपदेशात्**='पुण्येने' ति श्रुतौ ब्रह्मकर्मणोः कर्तृत्वकरणत्वरूपहेतुत्वस्योक्तत्वादित्यर्थः ॥

**अत्र पादे** अस्मिन्मते **विंशतिरधिकरणानि सूत्राणि तु द्विचत्वारिंशत् ॥**

**इत्यानन्दतीर्थमत फलाधिकरणम् ॥ २० ॥**

**सूत्रार्थचन्द्रिकायां फलाधिकरणम् ॥ ८ ॥**

**यं प्रासूत विशुद्धशीलमनघं वृद्धांबिकाख्या सती**
यं **मृत्युञ्जयशर्मणो** बुधमणेर्भाग्यं विदुस्साधवः ।
**वाधूलान्वयजन्मनोऽस्य सुधियो हालास्यनाथाह्वय-**
**स्येयं सत्कृतिरेधतामिह चतुर्भाष्यानुगा चन्द्रिका ॥**
**सूत्रार्थचन्द्रिकायां तार्तीयीकेऽत्र साधनाध्याये ।**
**द्वैतीयीकः** पादः प्रथितः पूर्णश्च **भक्तिपाद इति ॥**

**इति हालास्यनाथकृतौ सूत्रार्थचन्द्रिकायां तृतीयस्याध्यायस्य द्वितीयः पादः ॥ ३ ॥ २ ॥**



॥ श्रीः ॥

शिवाभ्यां नमः ।

श्रीकण्ठाचार्यकृतौ

# ब्रह्ममीमांसाभाष्ये

## अथ तृतीयस्याध्यायस्य तृतीयः पादः ॥

### अथ सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

**पूर्वत्र निरूपितो नित्यत्वादिगुणकस्त्वंपदार्थः पशुरुपासकः, सर्वज्ञत्वादिगुणकस्तत्पदार्थः पतिरुपास्यः शिवश्च । तदिह कथमुपासनमित्याकाङ्क्षायां तन्निरूपणमुत्तरत्राभिवर्तते–**

**सू ॥ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥**

**सर्वेषु वेदान्तेषु दहराद्युपासनं श्रूयते । तदेकम् उत शाखाभेदादिना भिन्नमेव इति संदेहः ॥**

**शाखाभेदेन प्रकरणभेदात् प्रतिशाखमुपासनं भिद्यते ।**

---

## शिवार्कमणिदीपिकायां

### तृतीयस्याध्यायस्य

### तृतीयपादप्रारंभः ॥

#### अथ सर्ववेदान्तप्रत्ययाधिकरणम् ॥

सङ्गतिसूचनार्थं पूर्वदशपादीसिद्धार्थेष्वपेक्षितार्थानुवादपूर्वकमुत्तरपादप्रतिपाद्यार्थं दर्शयति–पूर्वत्रेति । जीवस्य नित्यत्वे ह्युपासनासाध्यशाश्वतफलप्राप्तौ वांछा भवेत् । स्वयमनित्यस्य किं तेन । अतो 'नात्माश्रुते'रित्यधिकरणसिद्धं नित्यत्वं स्मारितम् । आदिशब्देन संसारे जिहासोत्पत्त्यर्थमवस्थात्रयेऽपि हेयास्पदत्वं पूर्वपादद्वयोक्तं संगृहीतम् । चिरमुपासितस्यापि शिवस्य कदाचिदुपासकप्रयासाननुसंधानेन तदनुगुणफलादातृत्वे किमतिदुष्करानेकनियमघटितेनोपासनाप्रयत्नेन । अतश्शास्त्रयोनित्वाधिकरणसिद्धं सर्वज्ञत्वं स्मारितम् । आदिशब्देन सर्वशक्तिमत्त्वनिरतिशयदयाशालित्वमहावदान्यत्वादिकं पूर्वाधिकरणपर्यन्ततत्तदधिकरणोदाहृतविषयवाक्यैः शब्दतोऽर्थतश्च सिद्धमुपास्यत्वोपयुक्तकल्याणगुणजातं गृह्यते । कथमुपासनमिति । किमेकस्योपासनस्य कस्यांचिच्छाखायां यावन्तो गुणा आम्नातास्तावदुपसंहारेणैव तदुपासनं कार्यमुत शाखांतरगततदुपासनाप्रकरणाम्नातगुणांतरोपसंहारेणेत्याकांक्षायां तन्निरूपणं, प्रवर्तते । तदर्थं शाखाभेदेऽपि चोदनाद्यविशेषे सति नोपासनं भिद्यत इति तदभेदनिरूपणं तद्भेदनिरूपणं तु तदपवादत्वेनेति भावः । सू० ॥ **सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥** चोदनाद्यविशेषेणाभेदप्रत्यभिज्ञानात् नामरूपादिभेदेन भेदप्रतीतेश्च संशयं दर्शयति–प्रकरणभेदादिति । प्रकरणांतरोक्तिरभ्यासस्याप्युपलक्षणम् । अस्ति हि मासाग्निहोत्रनित्याग्निहोत्रन्यायेन दहरविद्यादीनां छांदोग्यतैत्तिरीयादिषु प्रकरणभेदव 'द्विद्यादुपासीते' त्यादिरविशेषिततत्तद्विधिश्रवणरूपोऽभ्यासोऽपि । ननु नात्राभ्यासन्यायः प्रवर्तते । विधिश्रुत्या विशेषणसंक्रांतिरहितया कर्मविधिसिद्धौ विहितस्य विधानमनर्थकमित्यानर्थक्यन्यायमूलको ह्यभ्यासेन कर्मभेदः । न

तथा छान्दोग्ये तैत्तिरीयके च दहरोपासनमाम्नायते। एकत्र 'य आत्माऽपहतपाप्मा विजरो विमृत्युः' इत्यारभ्य अपहतपाप्मत्वादयो गुणा आम्नाताः। अन्यत्र 'ऋतं सत्यम्' इत्यारभ्य कृष्णपिङ्गलत्वादयो गुणाः। तत्र गुणभेदेनोपासनं भिद्यते। छान्दोग्ये पञ्चाग्निविद्यायां कौथुममिति नाम, बृहदारण्यके वाजसनेयमिति नाम। तत्र नामभेदादुपासनं भिद्यते। मुण्डकशाखायां शिरोव्रताख्यो धर्मः श्रूयते 'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम्' इति। शिरोव्रतं नाम वेदव्रतविशेषः आथर्वणिकान्प्रति विहितो नेतरान्प्रति।

---

चेहानर्थक्यमस्ति। यो यच्छाखाध्यायी तं प्रति तद्वाक्यं तत्कर्मप्रमित्यर्थमिति सार्थकत्वसंभवात् 'स्वाध्यायोऽध्येतव्य' इति पितृपितामहादिपरंपराप्राप्तस्वशाखाध्ययनस्यैव विहितत्वेनानधीताच्छाखान्तरतस्तत्प्रमित्यसंभवात्। एवमिह प्रकरणान्तरन्यायोऽपि न प्रवर्तते। असन्निहितस्य कर्मणो बुद्धिविपरिवृत्त्यभावेनानुवादायोगात्। कर्मविधिसिद्धौ विहितस्य विधानमनर्थकमिति प्रकरणांतरतः कर्मभेदसिद्धेरप्यानर्थक्यमूलकत्वादिति चेन्मैवम्। कृतस्वशाखाध्ययनस्य मतिपाटवकौतुकादिना शाखान्तराध्ययनस्य तत्तच्छाखाध्यायिभ्यस्तत्तद्वाक्यग्रहणस्य च सम्भवेन तं प्रति तस्य तस्य वाक्यस्यानुवादकत्वं स्वशाखाध्यायिनं प्रति ज्ञापकत्वमिति वैरूप्यं स्यादिति सर्वशाखावाक्यानामेवंविधानर्थक्यपरिहाराय सर्वेषामपि वाक्यानां भिन्नभिन्नकर्मविधायकत्वस्यावश्यवक्तव्यत्वेनात्राप्यानर्थक्यन्यायप्रवृत्तेः। तथा छांदोग्य इति। यथा 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन' मित्यत्रोत्पत्तिविशिष्टामिक्षाद्रव्यावरुद्धे वैश्वदेवयागे द्रव्यतया निवेशितत्वेनामिक्षाविरोधात्तत्र निवेशमलभमानेन वाजिनगुणेन वाजिनयागस्य ततो भेदः। उत्पत्तिवाक्यसंसिद्धं कर्म सर्वमनूद्यते। 'न चाश्रितगुणे शक्यं तद्विरोधि गुणान्तर'मिति न्यायात्। एवमपहतपाप्मत्वादिगुणनिरूपणानंतर 'मथ य इहात्मान' मित्यादिना प्रकृतापहतपाप्मत्वादिगुणकात्मविषयतया विधीयमानायां छांदोग्याम्नातदहरविद्यायां देहसद्भावे पाप्मादिस्पर्शावश्यंभावेनापहतपाप्मत्वादिविरोधात्तस्यां निवेशमलभमानेन कृष्णपिंगलत्वादिगुणेन तैत्तिरीयाम्नाताया दहरविद्यायास्ततो भेद इत्यर्थः। छांदोग्य इति। यथा 'अथैष ज्योतिरेतेन सहस्रदक्षिणेन यजेते' त्यत्र ज्योतिर्नामकस्य यागस्य ज्योतिरिति नामभेदेन प्रकृताज्ज्योतिष्टोमनाम्नो यागाद्भेदः। एवं छांदोग्यबृहदारण्यकाम्नातपंचाग्निविद्ययोः कौथुमवाजसनेयकनामभेदाद्भेदः। शाखास्विव तत्तदाम्नातविद्यास्वपि कौथुमादिनाम्नां कौथुमी पंचाग्निविद्येत्यादिरूपेण व्यवह्रियमाणतया तानि शाखानामेव नामानि न विद्यानामिति नियंतुमशक्यत्वादिति भावः। पञ्चाग्निविद्योदाहरणेन संख्यालक्षणगुणभेदादपि भेदस्सूचितः। छांदोग्ये हि पञ्चैवाग्नयः समाम्नाता 'अथ ह य एतानेवं पंचाग्नीन्वेदे'ति। बृहदारण्यके तु षष्ठोऽप्यग्निराम्नातः 'तस्याग्निरेवाग्निर्भवति समित्समि'दित्यादिना। मुण्डक इति। आथर्वणिकान्प्रत्येव विहितस्य शिरोव्रतस्य मुण्डकाम्नातप्रकृताक्षरब्रह्मविद्यांगत्वेन तद्गुणरहितशाखान्तराम्नाताक्षरब्रह्मविद्या ततो भिन्नैव वाच्या। एकस्यां विद्यायां तद्गुणत्वातद्गुणत्वसमावेशासंभवात्। न च 'नैतदचीर्णव्रतोऽधीत' इत्यग्रे शिरोव्रतस्य प्रकृतमुण्डकोपनिषदध्ययनांगत्वश्रवणात् गुरुमुखोच्चारणानूच्चारणरूपाध्ययनशरीरानुपकारकं तच्छिरोव्र-

---

( १ ) 'प्रमापकत्वमिति' इति. ख. पाठः। ( १ ) 'गुणविशिष्टात्म' इति ख. पाठः।

**अतो धर्मभेदादुपासनाभेदः । ततः शाखादिभेदादुपासनाभेद इति पूर्वः पक्षः ॥**

तमध्ययनसंस्कार्यायास्तस्या उपनिषद एवांगं भवेत् । तथा च सैवोपनिषदेतत्प्रतिपाद्याक्षरब्रह्मविद्याप्रतिपादकोपनिषदन्तराद्भिद्येत नाक्षरब्रह्मविद्येति वाच्यम् । अध्ययनजन्यसंस्कारस्याक्षरावाप्तिरूपत्वेन शिरोव्रतमंतरेणाध्ययनेनैवावाप्तुं शक्यायामुपनिषदि तज्जन्ये विद्यानुष्ठानोपयोगिन्यर्थज्ञाने चानुपकारकस्य शिरोव्रतस्य विद्यायामेव फलोपकार्यंगत्वस्य वक्तव्यत्वात् । न च तस्यां शिरोव्रतस्य विनियोजकं प्रमाणं नास्ति किंत्वध्ययन एव अचीर्णव्रतस्याध्ययननिषेधसामर्थ्यात् शिरोव्रताचरणमध्ययनांगमिति सिद्धेरिति वाच्यम् । उक्तसामर्थ्यादध्ययनांगत्वकल्पनायां प्रसक्तायामध्ययने तदवाप्यायामुपनिषदि चानुपकारिणश्शिरोव्रतस्योपनिषत्प्रतिपाद्यत्वेन तदुपस्थाप्यायां विद्यायां जुह्वाकृत्यनुपकारकस्य पर्णत्वस्य जुहूपस्थाप्यायामिष्टाविव विनियोजकस्य वाक्यप्रमाणस्य वोपनिषदुपस्थाप्याया विद्याया बुद्धिसन्निधानसत्त्वात्सन्निधिलक्षणस्थानप्रमाणस्य वा सत्त्वात् शिरोव्रतस्याध्ययनांगत्वविधिव्यतिरेकेण 'तेषामेवेतां ब्रह्मविद्या' मिति प्रकृतब्रह्मविद्यांगत्वविधेरपि सत्त्वाच्च । न च 'नैतदचीर्णव्रत' इत्यग्रिमवाक्यानुसारेण ब्रह्मविद्याशब्दस्तत्प्रतिपादकप्रकृतोपनिषद्ग्रंथपरो व्याख्येय इति वाच्यम् । उपसंहारानुरोधेनोपक्रमस्यान्यथाकरणायोगाद्विरोधाभावाच्च । अध्ययनांगस्य सतस्संयोगपृथक्त्वेन विद्यांगत्वस्यापि संभवात् । 'तेषामेवैता'मित्यनेनाप्यध्ययनांगत्वस्यैव बोधनेऽग्रिमवाक्येन पौनरुक्त्यापत्तेश्च । न 'चेतामि'ति प्रकृतपरामर्शिना सर्वनाम्ना मुण्डकोपनिषदध्ययनावाप्यत्वेन रूपेण विद्यापरामर्शादुपनिषदंतरेण यैरेषा विद्यावाप्यते तेषां तदनुष्ठाने शिरोव्रतमंगं न सिध्यतीति नास्ति विद्यैक्ये कश्चिद्विरोधः इति वाच्यम् । मुण्डकोपनिषदध्ययनावाप्यत्वेन रूपेण विद्यायाः शब्दतः प्रकृतत्वाभावेन ताद्रूप्येण परामर्शे हेत्वभावात् । अन्यथा 'य एतेनानिष्ट्वाथान्येन यजत' इत्यत्राप्येतच्छब्दस्य तच्छाखाध्ययनावाप्तत्रिवृदादिस्तोमयुक्तज्योतिष्टोमपरत्वापत्त्या क्रत्वंतराणां तथाभूतज्योतिष्टोमपूर्वकत्वनियमप्रसंगादेवमपि पौनरुक्त्यापरिहाराच्च । अग्रिमवाक्येन मुण्डकोपनिषदुपस्थितौ[1] तस्यामनुपकारकस्य शिरोव्रतस्य तदवाप्यविद्यांगत्व एव पर्यवसानात् । न च, तर्हि शाखान्तरेष्वप्याम्नाताक्षरब्रह्मविद्याथर्वणिकमात्राधिकारिकशिरोव्रतांगकत्वानुरोधेन तन्मात्राधिकारिकेत्यधिकारसंकोचोऽस्तु । 'ऋद्धिकामास्सत्रमासीर' न्नित्यविशेषश्रवणेऽपि सत्रे ये यजमानास्त ऋत्विज इति ब्राह्मणकर्तृकेषु ऋत्विक्कर्मसु यजमानानां कर्तृत्वविध्यनुरोधेन ब्राह्मणानामेवाधिकारः । तत्रापि राजन्यवसिष्ठानां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामिति प्रयोजकेषु कल्पभेदश्रवणात्सर्वेषां यजमानानां तद्वैगुण्याय[2] तुल्यकल्पानामेवाधिकारः । तत्रापि वैश्वामित्रो होतेति नियमात् वैश्वामित्रतत्तुल्यकल्पानामेवाधिकार इत्यंगानुरोधेनाधिकारसंकोचदर्शनात् । तथा च मुण्डके शाखान्तरेषु चाक्षरब्रह्मविद्यैक्येऽपि न कश्चिद्विरोधः । आथर्वणिकव्यतिरिक्तानां तु दहरवैश्वानरादिविद्यान्तरोपासनेन मुक्तिर्भविष्यतीति वाच्यम् । शाखान्तरोक्ताक्षरविद्यायां[3] मुण्डकोक्तांगानुरोधेन संकोचानुपपत्तौ तत्संकोचनायोगात् । न च चोदनाद्यविशेषादभेदसिद्धेस्तत्संकोचनं, तद्भेदस्याभ्यासादिभिस्साधितत्वादिति भावः। **अतो धर्मभेदादिति।**

( १ ) 'मुण्डकोपनिषदङ्गत्वप्रतीतौ' इति ख. पाठः । ( २ ) 'तदवैगुण्यानुरोधेन तुल्यकल्पानामिहाधिकार' इति ख. पाठः ।
( ३ ) 'विद्याया मुण्डकोक्ताक्षरविद्यातो भेदेनाधिकारासंकोचोपपत्तौ' इति ख. पाठः ।

**सिद्धान्तस्तु–सर्ववेदान्तप्रत्ययं दहराद्युपासनमेकमेव, कर्मविधिष्विव चोद-**

यद्यपि शिरोव्रतरूपधर्मविशेषाद्भेदोऽपि गुणविशेषादेव भेदः तथाप्ययमुत्पन्नशिष्टगुणाद्भेद इत्येतावता पृथगुक्तिः। सू० ॥ **सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्** ॥ १ ॥ प्रतीयत इति प्रत्ययम्। सर्ववेदान्तप्रतिपाद्यमेकमेवेति साध्यं हेतुसामर्थ्यादध्याहृतम्। 'कर्मविधिष्विवेति' शाखान्तराधिकरणन्यायस्सूचितः। शाखांतराधिकरणे हि 'नामरूपधर्मविशेषपुनरुक्तिनिन्दाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरे कर्मभेदः स्या'दिति सूत्रे पूर्वपक्षमुपन्यस्य 'एकं वा संयोगरूपचोदनाख्याविशेषात्' इति सूत्रेण सिद्धान्तः कृतः। तत्र पूर्वपक्षसूत्रस्यायमर्थः—काठकमाशककालापकादीनि तत्तच्छाखागताग्निहोत्रादीनां नामानीति नामभेदः। क्वचिच्छाखाया 'मग्नीषोमीयमेकादशकपाल'मिति श्रूयते। अन्यत्र द्वादशकपालमिति रूपभेदः। 'मारुतमसि मरुतामोज' इत्यादीनि कारीरीवाक्यान्यधीयानास्तैत्तिरीया भूमिभोजनमाचरन्ति नान्ये। अग्निवाक्यान्यधीयानाः केचिदुपाध्यायस्योदकुंभमाहरन्ति नापरे। अश्वमेधवाक्यान्यधीयानाः केऽप्यश्वस्य घासमानयन्ति नेतर इत्येवमादिर्धर्मभेदः। पुनरुक्तिरभ्यासः। 'प्रातः प्रातरनृतं ते वदंती'ति। 'पुरोदयाज्जुह्वति येऽग्निहोत्रं दिवाकीर्त्यमदिवा कीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषा'मिति 'यथातिथये प्रद्रुतायान्नं हरेयुस्तादृगेव तद्यदुदिते जुह्वती'ति च शाखाभेदेनोदितानुदितहोमयोः परस्परनिंदा। अशक्तिः सर्वशाखोदितांगानामेकत्रोपसंहारः। मैत्रायणीयानामन्वारोहसंज्ञकेषु स्थलारोहणमन्त्रेष्वग्निस्समाप्यतेऽन्यत्रान्येषामिति समाप्तिभेदः। केषांचिच्छाखायामुदितहोमव्यतिक्रमे प्रायश्चित्तं केषांचिदनुदितहोमव्यतिक्रमे इति प्रायश्चित्तभेदः। उदितानुदितहोमविधानं वैकल्पिकत्वेनोपपन्नमित्युभयथाप्यवैगुण्यं भवति। प्रायश्चित्तविधानमुभयथापि कर्मैक्ये वैगुण्यलिङ्गम्। एवं नामभेदादिभिश्शाखाभेदे कर्मभेदः। अन्यार्थदर्शनाच्च। तथा हि द्वादशाहे श्रूयते–'यदि पुरा दिदीक्षाणाः स्युर्बृहत्सामानमतिरात्रमुपेयुरुपेतं ह्येषां रथन्तरमथ यद्यदिदीक्षाणाः रथंतरसामानमतिरात्रमुपेयु' रिति। पुरा दिदीक्षाणा पूर्वमेव दीक्षावन्तः। लिटः कानचि द्विर्वचनम्। अत्रानिष्टप्रथमयज्ञानां द्वादशाहदर्शनं शाखाभेदेन द्वादशाहभेदे लिंगम्। कथम्। ताण्डिशाखायां 'य एतेनानिष्ट्वे'त्यादिना सर्वक्रतूनां ज्योतिष्टोमपाश्चात्यत्वमंगं विहितम्। यदि प्रतिशाखं द्वादशाहादयः क्रतवो भिन्ना न स्युः तदैक एव द्वादशाहो नानाशाखासु विहित इति तस्य ज्योतिष्टोमपूर्वकत्वनियमादनिष्टप्रथमयज्ञस्य द्वादशाहदर्शनं नोपपद्यते। यदि प्रतिशाखं ते भिन्नाः स्युस्तदा ताण्डिशाखाया 'मथान्येन यजते' इत्यन्यशब्दस्य ताण्डिशाखागतद्वादशाहादिक्रत्वंतरविषयत्वोपपत्तेः। शाखान्तरगतद्वादशाहादीनां ज्योतिष्टोमपाश्चात्यत्वस्याविधानात् यस्यां शाखायामनिष्टप्रथमयज्ञस्य द्वादशाहदर्शनं तच्छाखागतद्वादशाहविषयत्वेन तदुपपद्यत इति। एवं नामभेदादिहेतुभिः प्रतिशाखमग्निहोत्रादिकं भिद्यत इति पूर्वपक्षे सति तदैक्यसाधकस्य सिद्धान्तसूत्रस्यायमर्थः–सर्वासु शाखास्वेकमग्निहोत्रादिकर्म स्वर्गादिफलसंयोगस्य रूपाख्यस्य द्रव्यदेवतस्य जुहोत्यादिचोदनाया अग्निहोत्राद्याख्यायाश्चेत्येतेषामभेदप्रत्यभिज्ञापकानामविशेषादिति। एत एव शाखान्तराधिकरणसिद्धान्त-

**नाफलसंयोगरूपाख्यानामविशेषात् । 'विद्यात्' 'उपासीत' इति चोदना तावत् शाखाभेदेऽप्यविशिष्टा । फलसंयोगो ब्रह्मप्राप्तिरूपोऽविशिष्टः । वेद्यमपि वैश्वानरादिरूपं ब्रह्माविशिष्टम् । आख्यापि वैश्वानरविद्येत्येवमादिरविशिष्टैवेत्येकमेवोपासनम् । विद्यादिभेदेऽप्युपासनं न भिद्यते । 'तस्मिन्यदन्तस्तदन्वेष्टव्यम्' इति छान्दोग्ये दहरविद्याविधिः । 'तस्मिन्यदन्तस्तदुपासितव्यम्' इति तैत्तिरीयके च । तत्र स्थानाद्यभेदादुपास्यस्य ब्रह्मणोऽप्यभेदात् उभयत्रोक्तानां धर्माणामविरोधाद्विद्यैक्यमेव । छान्दोग्यबृहदारण्यकशाखयोर्द्युपर्जन्यपृथिवीपुरुषयोषिदाख्यस्याग्निपञ्चकस्य वेद्यतया यत्स्वरूपमाम्नातं तदुभयत्रापि समानम् । अतो न विद्याभेदः ।**

---

हेतवोऽत्रापि चोदनाद्यविशेषादित्यनेनोपन्यस्ता इति व्याचष्टे—चोदनाफलसंयोगेत्यादिना । गुणभेदाद्भेदमाशंकितं निराकरोति—तस्मिन्यदन्तरिति । यद्यपि 'अथ य इहात्मानमनुविद्य व्रजन्ती'ति वाक्ये दहरविद्याविधिः तथापि नोत्पत्तिशिष्टगुणावरोधो दोषः, विरोधाभावादित्यभिप्रेत्याह—उभयत्रोक्तानामिति । विरोधाभावो 'दर्शयति चे'ति सूत्रे प्रदर्शयिष्यते । विरोधाभावे च नोत्पत्तिशिष्टगुणावरोधो दोषः । अन्यथा पुरोडाशाद्यवरुद्धेषु यागेषु व्रीह्यादीनामनन्वयापत्तेः । कौथुमादीनि शाखानां नामानि न तु विद्यानाम् । अतो नामभेदाच्छाखाभेदेऽपि न विद्याभेदः । कौथुमादिशब्दानामेकैकशाखानामत्वेन तदाम्नातासु सर्वास्वपि विद्यासु लाक्षणिकत्वोपपत्तौ तावतीषु विद्यासु प्रत्येकं शक्तिं कल्पयित्वा तत्र तत्र लक्षणाकल्पनस्य गौरवपराहतत्वात् । यथाहुः—शाखया ह्येकया योगाद्बहुकर्मावबोधनम् । युज्यते कर्मनानात्वान्नैकशाखोपलक्षण' मिति । किञ्च । कौथुमशब्दः कुथुमिना प्रोक्तमित्यस्मिन्नर्थे प्रोक्तप्रत्ययान्तः प्रवचननिमित्तः । न च प्रवचनं विद्यायास्संभवति । तस्य शब्दविषयत्वात् । वाजसनेयकशब्दोऽप्याम्नायविशेषपरः 'शौनकादिभ्यश्छन्दसी'ति सूत्रेण शौनकादिगणपठिताद्वाजसनेयशब्दाद्वाजसनेयेन प्रोक्तं छन्द इत्यर्थे णिनिप्रत्यये तदन्तस्य 'छंदोब्राह्मणानि च तद्विषयाणी'ति सूत्रेण 'तदधीते तद्वेद' त्येतदर्थविहितप्रत्ययविषयत्वे तदर्थविहितस्य च प्राग्दीव्यतीयप्रत्ययस्य 'प्रोक्ताल्लुगिति' सूत्रेण लुकि वाजसनेयेन प्रोक्तं छंदोऽधीयत इति वाजसनेयिन इति रूपे स्थिते तेषामाम्नाय इत्यर्थे 'चरणाद्धर्माम्नाययोरिति वक्तव्य'मिति वार्त्तिकेन वाजसनेयिनामाम्नाय इत्यर्थे विहिते वाजसनेयिशब्दाद्वुञ्प्रत्यये 'नस्तद्धित' इति टिलोपे च सति वाजसनेयकशब्दस्य निष्पत्तेः । एवं कौथुमादिशब्दानां शाखानामत्वव्युत्पादनं 'न नाम्ना स्याच्चोदनाभिधानत्वा'दिति शाखान्तराधिकरणगुणसूत्रसिद्धं प्रसिद्धमेवेति तद्विहाय शाखाद्वयाम्नातायां पञ्चाग्निविद्यायामग्निसंख्यारूपगुणभेदाद्भेदशंकां निराचष्टे—छांदोग्येति । वेद्यतयेति । उपासनीयतयेत्यर्थः । तथा च बृहदारण्यकेऽपि सांपादिकाः पञ्चैवाग्नय उपास्याः । अत एव षष्ठस्याप्यग्नेस्समिद्धूमादिकल्पनयोपासनाप्रसक्तौ तन्निवृत्तये 'तस्याग्निरेवाग्निर्भवति' 'समित्समित्' इत्यादि समाम्नायते । षष्ठस्याप्यग्नेरुपास्यत्वे तु सांपादिकाद्यभिप्राया पञ्चसंख्येति न विरोधः ।

---

( १ ) 'विरोध एवोत्पत्तिशिष्टगुणावरोधो दोषः' इति क. ग. पाठः । ( २ ) "नामभेदाच्छाखा एव भिद्येरन्न विद्याः । न चात्र विनिगमनाविरहः' इति ख. पाठः । ( ३ ) 'तत्संबन्धाच्छाखायां लक्षणाकल्पनस्य' इति ख. पाठः ।

सू ॥ भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥

अविशेषपुनःश्रुतिः प्रकरणान्तरसहिता भेदापादिका । अतो न विद्यैक्यमिति चेत्–विद्यैक्येऽपि शाखान्तरेऽपि प्रतिपत्तृभेदादुपपन्ना सा न भेदावहा ॥

सू ॥ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥३॥

अथर्ववेदे 'तेषामेवैतां ब्रह्मविद्यां वदेत' इति शिरोव्रतनियमः स्वाध्यायाङ्गत्वेन न तु विद्याङ्गत्वेन ।'नैतदचीर्णव्रतोऽधीते' इति तस्याध्ययनसंबन्धावगमात्, समाचारग्रन्थे 'इदमपि वेदव्रतेन व्याख्यातम्' इति तस्य वेदव्रतत्वप्रतिपादनाच्च । 'ब्रह्मविद्याम्' इत्यत्र ब्रह्मशब्दो वेदविषयः ।

---

अभ्यासप्रकरणान्तराभ्यां विद्याभेदशङ्कानिराकरणार्थं सूत्रम्–भेदादिति चेन्नैकस्यामपि ॥ २ ॥ सर्ववेदान्तप्रत्ययं दहराद्युपासनं नैकं विधिश्रुतेः प्रकरणस्य च भेदादिति शंकाभागं तात्पर्यतो व्याचष्टे–अविशेषेति । प्रतिपत्तृभेदादिति । सर्वस्यापि स्वशाखाध्ययनं प्रथममावश्यकमिति तं प्रति तावत्प्रमितिजनकत्वेनार्थवत्त्वमस्ति । अतो नानर्थक्यमूलोऽभ्यासन्यायः प्रकरणान्तरन्यायो वात्र प्रवर्तते । न च परशाखाध्यायिनं प्रत्यनुवादकत्वाद्वैरूप्यमिति वाच्यम् । वाक्यान्तरेण प्राप्तिमपेक्ष्यार्थज्ञानजनकत्वं ह्यनुवादकत्वं न ज्ञातज्ञापकत्वमात्रम् । स्वशाखागतवाक्यस्यापि पुनःश्रवणेऽनुवादकत्वेन वैरूप्यापत्तेः । न च नानाशाखागतेष्वग्निहोत्रादिवाक्येषु किञ्चिदपि वाक्यं शाखान्तरवाक्यतः प्राप्तिमपेक्ष्य स्वार्थं बोधयति । अतो नानुवादकत्वकृतं वैरूप्यमपीति भावः । सू० ॥ स्वाध्यायस्य तथात्वेन समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥ स्वाध्यायस्य तथात्वेन स्वाध्यायं प्रत्यङ्गत्वेन शिरोव्रतविधिः न तु विद्यां प्रत्यङ्गत्वेन । कुतः । समाचारेऽधिकारात् आथर्वणिकानां वेदव्रतोपदेशार्थे समाचाराख्ये ग्रन्थे तथा प्रतिपादनात् । चकारेण 'नैतदचीर्णव्रतोऽधीत' इत्यग्रिमवाक्ये तथैव स्पष्टत्वाच्चेति सूत्रार्थं दर्शयन्धर्मविशेषाद्विद्याभेद इति शङ्कां निराचष्टे–अथर्वेति । एवञ्च धर्मविशेषान्मुण्डकोपनिषद्रूपस्वाध्यायस्यैव शाखान्तररूपात्स्वाध्यायाद्भेदो भवति । तस्यैव चाथर्वणिकमात्राधिकारिकशिरोव्रताङ्गत्वानुरोधेन तन्मात्राध्येयत्वं सिध्यति । न तु शाखान्तरगताक्षरविद्याया मुण्डकप्रतिपाद्याक्षरविद्यातो भेदो भवति । नाप्यक्षरविद्यामात्रस्याथर्वणिकैकाधिकारिकत्वं सिध्यति । तस्मादाथर्वणिकैरेतद्ग्रन्थोपायाक्षरविद्या वेदितव्येति तेषामेव शिरोव्रतपूर्वकाध्ययनप्राप्तैतद्ग्रन्थबोधितैषा विद्या फलं प्रयच्छति । शाखान्तराध्यायिनां त्वेषैव विद्या शाखान्तराध्ययनप्राप्तैतद्ग्रन्थाध्यायिभ्यो लब्धा वा फलं प्रयच्छतीति न कश्चिद्दोषः । ननु स्वाध्यायाङ्गस्य शिरोव्रतस्य संयोगपृथक्त्वन्यायेन विद्याङ्गत्वमप्यस्तु को विरोध इत्याशङ्कानिराकरणार्थमाह–ब्रह्मविद्यामित्यत्रेति । मुण्डकोपनिषदुपक्रमे 'द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च तत्रापरा ऋग्वेदो यजुर्वेदस्सामवेदोऽथर्ववेदश्शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमितिहासः पुराणं न्यायो मीमांसा धर्मशास्त्राणीत्यथ परा यया तदक्षरमधिगम्यते' इत्यत्र प्रकरणे विद्याशब्दो विद्यास्थानपरोऽवगतः । तदनुसारेणोपसंहारेऽपि तस्य तादर्थ्ये स्थिते निषादस्थपतिन्यायेन समानाधिकरण-

---

( १ ) 'प्रथमप्रक्रममिति' इति क. ग. पाठः ।

**तस्माद्यथा सवहोमस्तेषामेव, तथा शिरोव्रतमपि । अतस्तन्न विद्याभेदे लिङ्गम् ॥**

समासस्यान्यार्हितत्वाद्ब्रह्मशब्दः प्रकृतमुण्डकोपनिषद्रूपवेदपरो व्याख्येयः । षष्ठीसमासेन मुख्यार्थो वास्तु । न चाग्रिमवाक्येन पौनरुक्त्यम् । अग्रिमवाक्यमचीर्णव्रतस्याध्ययननिषेधपरं पूर्ववाक्यमचीर्णव्रतं प्रत्युपदेशनिषेधपरमित्यनयोश्शूद्रविषयाध्ययनाध्यापननिषेधवाक्ययोरिव विषयभेदसत्त्वादिति भावः । 'सववच्च तन्नियम' इति दृष्टान्तभागं व्याचष्टे— तस्माद्यथेति । यथा सप्तसूर्याख्यहोमप्रभृतिशतौदनाख्यहोमपर्यन्तस्सवहोमगणस्तेषामेवाथर्वणिकानाम् । तदीयैकाग्निसम्बंधात् । एवं शिरोव्रतमपि स्वाध्यायस्यैव । तदीयाध्ययनसम्बन्धादित्यर्थः । एवमिह शिरोव्रतं नामाथर्वणिकानां वेदव्रतत्वेन प्रसिद्धं शिरस्यंगारपात्रधारणरूपं व्रतम् । तस्य च स्वाध्यायांगत्वमेव प्रतिपाद्यते न तु विद्यांगत्वमित्युपपादितम् । पुराणेषु तु सौरसंहितादिष्विह शिरोव्रतमथर्वशिरसि प्रसिद्धं पाशुपतव्रतं, तस्य च विद्यापेक्षितत्वमेव प्रतिपाद्यते । तदपि न प्रकृताक्षरब्रह्मविद्यामात्रापेक्षितत्वं किं तु वैश्वानरविद्यासाधारण्येन सकलब्रह्मविद्यापेक्षितत्वमित्यंगीकृत्य तथैवोपबृंहितम् । सौरसंहितायाम्—'ब्रह्मविद्योपदेशस्य योग्यं वक्ष्यामि सुव्रते' इत्युपक्रम्य 'विधिवच्छ्रद्धया सार्द्धं न चीर्णं यैश्शिरोव्रतम् । ब्रह्मविद्यामिमां तेषां न वदेत कदाचन ॥ इदं शिरोव्रतं चीर्णं विधिवच्छ्रद्धया यदि । तेषामेव परां विद्यां वदेदज्ञानबाधिकाम् ॥ शिरोव्रतमिदं नाम शिरस्याथर्वणश्रुतेः । यदुक्तं तद्धि नैवान्यत्तत्पाशुपतसंज्ञितम् ॥ शाखाभेदेषु नामानि व्रतस्यास्य विभेदतः । पठ्यन्ते मुनिशार्दूल शाखास्वेकं व्रतं हि तत् ॥ अग्निरित्यादिभिर्मन्त्रैः षड्भिः शुद्धेन भस्मना । सर्वाङ्गोद्धूलनं कुर्याच्छिरोव्रतसमाह्वयम् ॥' इति । ब्रह्मोत्तरखण्डेऽपि 'अयमत्याश्रमो धर्मो यैस्समाचरितो मुदा । प्राप्तं तैः परमं ज्ञानं संसारच्छेदकारणम् ॥ उद्धूलनं त्रिपुण्ड्रञ्च मायापाशनिवृत्तये । आमनंति मुनिश्रेष्ठाः अथर्वशिरसि स्थितम् ॥ अतोऽपि पापविच्छेदलाभाय ज्ञानसिद्धये । उद्धूलनं त्रिपुण्ड्रं च मुमुक्षुस्सम्यगाचरे' दित्यादि । न्याय्यं चैतत् । मुण्डके हि "ब्रह्मा देवानां प्रथमस्संबभूव विश्वस्य कर्त्ता भुवनस्य गोप्ता । स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहे'ति परमोपक्रमोपक्षिप्ता ब्रह्मविद्या ब्रह्मोपासनारूपैव न तु तत्प्रतिपादकोपनिषद्रूपा । तदनंतरमथर्वप्रभृत्यंगिरःपर्यन्तां गुरुपरंपरामुक्त्वा 'शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः प्रपच्छ, कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती'ति शौनकस्य ब्रह्मोपासनाविषयं प्रश्नमुपन्यस्य 'तस्मै स होवाचे' त्यादिना तदुत्तरत्वेनैव मुण्डकोपनिषत्परिसमाप्तेः । तत्परिसमाप्तौ च 'शिरोव्रतं विधिवद्यैस्तु चीर्ण 'मित्येतदनंतरं 'तदेतत्सत्यमृषिरंगिराः पुरोवाचे'ति ब्रह्मोपासनाविषयशौनकांगिरस्संवादरूपाख्यायिकात्मत्वेनैव समापनात् । तदनन्तरं 'नैतदचीर्णव्रतोऽधीते नमः परमऋषिभ्यो नमः परमऋषिभ्य' इति श्रुतिवाक्यमध्य एवाचीर्णव्रतस्यैतदुपनिषदध्ययननिषेधश्रवणात् । यद्यपि 'कस्मिन्नु भगवो विज्ञाते' इत्यत्र ब्रह्मविषयज्ञानमात्रसाधारणो विज्ञानशब्दः, तथापि 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि' त्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते वा इदं सर्वं विदितमात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदित'मिति श्रुत्यन्तरगतसर्वविज्ञानप्रतिज्ञावाक्येषु विज्ञा-

( १ ) 'विधिवद्यैर्द्विजातिभिः' इति ख. पाठः । ( २ ) 'तेषामेव परं ज्ञानं' इति ख. पाठः ।

नशब्दस्य स्थानप्रमाणेनोपासनापरत्वनिर्णयादत्रापि तस्य तथात्वमवसीयते । एवं चोपक्रमे ब्रह्मविद्याशब्दस्योपासनापरत्वात्समाप्तावपि 'स यो ह वैतत्परं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तो भवती'ति मुक्तिफलामुपासनारूपामेव ब्रह्मविद्यां प्रस्तुत्य 'तदेतदृचाभ्युक्तं, क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठा स्वयं जुह्वत एकऋषिं श्रद्धयन्तः । तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्ण' मिति प्रकृतोपासनारूपब्रह्मविद्याविषयत्वेनैवास्य श्लोकस्यावतरणाच्च । न चात्र ब्रह्मविद्याशब्दस्याकस्मादुपासनारूपार्थपरित्यागो युक्तः । एकर्षिर्मुख्यर्षिश्शिवः । 'विश्वाधिको रुद्रो महर्षि'रिति श्रवणात् । ईशावास्यबृहदारण्यकयोः 'पूषन्नेकर्षे यमसूर्यप्राजापत्यव्यूह परस्मिन्समूहते हि । यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषस्सोऽहमस्मी'ति सूर्यान्तर्वर्तिनि शिवे साक्षादेकर्षिशब्दस्यैव श्रवणाच्च । तं श्रद्धयन्तः श्रद्दधानाः स एवास्मान्रक्षिष्यतीति दृढनिश्चयवन्त इत्यर्थः । 'द्वे विद्ये वेदितव्ये' इत्यादौ विद्याशब्दो वेदसामानाधिकरण्याद्वेदपरोऽस्तु । वेदादिशब्दा वा विद्यासामानाधिकरण्यात्तत्तज्जन्यविद्याविषयास्सन्तु । इह तु ब्रह्मविद्याशब्दस्योपासनापरत्वमुक्तन्यायैस्सुदृढम् । एवं च शिरोव्रतशब्दस्यापि नाथर्वणिकमात्राधिकारिकव्रतविशेषपरत्वं युक्तम् । कथं हि बह्वृचत्वेन प्रसिद्धाय शौनकायांगिराः स्वयमिमां विद्यामुपदिश्यानाथर्वणिकायैतदुपदेशं निषेधेत् । 'नैतदचीर्णव्रतोऽधीत' इत्यत्र स्वाध्यायांगत्वेन वर्ण्यमानं व्रतमिदं वा व्रतं भवत्वाथर्वणिकप्रसिद्धं व्रतान्तरं वा भवत्वित्यन्यदेतत् । समाचारग्रंथस्याप्याथर्वणिकप्रसिद्धं[3] व्रतान्तरं वेदव्रतत्वेन कीर्तयतो नात्र कश्चिद्विरोधोऽनुरोधो वा । तस्मात्सर्वसाधारणं पाशुपतव्रतमेवेह शिरोव्रतम् । तस्य 'चैता'मिति प्रकृताक्षरविद्यापरामर्शेऽपि हेतुसाधारण्यात्सकलब्रह्मविद्यासाधारण्यं सिद्ध्यति । 'एता'मिति प्रकृतपरामर्शेनैव ब्रह्मविषयत्वे विद्यायास्सिद्धेऽपि ब्रह्मविशेषणं हि हेतुसूचनार्थं हेतुगर्भविशेषणम् । यस्मादेषा ब्रह्मविषया विद्या तस्मादचीर्णशिरोव्रताय न प्रदेयेति हेतुसाधारण्ये च हेतुमति सर्वत्र विधेयं सिद्ध्यति । यथा 'न ह्यत्रानूयाजा इज्यन्त' इति हेतुसाधारण्यादातिथ्याव्यतिरिक्तास्वप्यनूयाजरहितास्विष्टिष्वौपभृताष्टगृहीताभावः, एवं ब्रह्मविद्याप्रदानस्य शिरोव्रतापेक्षत्वादेव श्वेताश्वतरोपनिषदि 'तपःप्रभावाद्देवप्रसादाच्च ब्रह्मविच्छ्वेताश्वतरोऽथ विद्वान् । अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्ट' मिति पाशुपतव्रतवद्भ्योऽत्याश्रिभ्य एव ब्रह्मविद्याप्रदानमुक्तम् । तेभ्यो ब्रह्मविद्यामुपदिष्टवतः श्वेताश्वतरस्यापि महर्षेः पाशुपतव्रतानुष्ठातृत्वमुक्तं कूर्मपुराणे–'अथास्मिन्नंतरेऽपश्यत्समायान्तं महामुनिम् । श्वेताश्वतरनामानं महापाशुपतोत्तम'मिति । एवं दहरविद्यानुष्ठानेऽपि पाशुपतव्रतस्याधिकारिविशेषणत्वमुक्तं कैवल्योपनिषदि 'अत्याश्रमस्थस्सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्ये'ति । कैवल्योपनिषदि ब्रह्मविद्याधिगमार्थं परमेष्ठिनमुपसन्नस्याश्वलायनस्य पाशुपतव्रतवत्त्वं तु तदीयधर्मशास्त्रपर्यालोचनयैव स्पष्टम् । एवं न्यायोपबृंहणाभ्यां सुप्रतिष्ठितं 'शिरोव्रतं विधिवद्यैस्तु चीर्ण' मित्यस्यार्थमपहाय सूत्रकारभाष्यकाराभ्यामर्थांतरं परिगृह्य किमर्थं परिहृतमिति चेत्

( १ ) 'मुपासनां प्रकृतां प्रस्तुत्य' इति क. ग. पाठः । ( २ ) 'प्रस्तुतोपासनाविषयत्वेनैव' इति क. ग. पाठः
( ३ ) 'प्रसिद्धस्याप्या' इति ख. पाठः ।

## सू ॥ दर्शयति च ॥ ४ ॥

**श्रुतिरेव विद्यैक्यं दर्शयति महोपनिषत्कैवल्योपनिषदोर्दहरविद्यायाम्—'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षम्' 'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्।'**

**इत्यादिना निर्दिष्टमीश्वरस्य रूपमपेक्ष्य रूपवत्त्वात् पाप्मजरामरणादिप्रसक्तौ**

कृत्वाचिंतयेति ब्रूमः । यदि शिरोव्रतमित्यस्याथर्वणिकवेदप्रसिद्धवेदव्रतातिरेकेणार्थांतरं न स्यात्तदा यथाकथंचिच्छिरोव्रतस्य स्वाध्यायधर्मत्वप्रतिपादन एव 'शिरोव्रतं विधिवद्यैस्तु चीर्ण'मित्यस्य तात्पर्यं वक्तव्यम् । अन्यथा चोदनाद्यविशेषप्राप्ताभेदप्रत्यभिज्ञानविरोधात्तद्भेदकल्पने गौरवाच्चेति । एवमर्थांतरपरस्यापि वाक्यस्य न्यायव्युत्पादनार्थं कृत्वाचिन्तयार्थान्तराश्रयणेन सिद्धांतवर्णनमन्यत्रापि दृश्यते । तदत्र शास्त्रे यथा 'प्राणादयो वाक्यशेषा'दिति । न हि 'यस्मिन्पञ्च पंचजना' इति मन्त्रे पञ्चजनशब्दः क्लिष्टगत्या वाक्यशेषगतप्राणादिपरः । तस्य मंत्रान्तरानुसारेण चेतनविशेषणपरत्वात् । अथर्ववेदे हि तृतीयकाण्डे पञ्चमानुवाके समाम्नायते मन्त्रः—यं त्वा होतारं मनसाभिसंविदुस्त्रयोदश भौवनाः पञ्च मानवाः । वर्चोधसे यशसे सूनृतावते तेभ्यो अग्निभ्यो हुतमस्त्वेत' दिति । अस्यार्थो वेदभाष्ये दर्शितः—हे अग्ने त्वा त्वां होतारं देवानामाह्वातारं मनसाभिसंविदुस्सम्यग्जानन्ति । ये जानंति ते प्रदर्श्यंते । त्रयोदश भौवनाः 'विश्वकर्मा भौवनः स्वात्मनि सर्वाणि भूतानि जुहवांचकारे'त्यादिश्रुत्यन्तरप्रसिद्धाः विश्वकर्मप्रभृतयो भुवनस्य महर्षेः पुत्राः त्रयोदशसंख्याकाः। पञ्च मानवाः निषादपञ्चमाश्चत्वारो वर्णाः। गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके । तस्मै वर्चोधसे तेजो धारयते यशसे यशस्विने सूनृतावते प्रियहितवचनयुक्ताय तुभ्यं तेभ्यः प्रागुक्तेभ्यः त्वद्विभूतिरूपेभ्यः अग्निभ्यश्च हुतमेतद्धविरस्त्विति । यथा 'यमाय हर्म्यमवपन् पञ्च मानवा वैवस्वतो न तृप्यति पञ्चभिर्मानवैर्यम'इत्यादिरिह वेदान्तरावगतमन्त्रभागोऽप्युदाहरणम् । तत्रापि 'निषादपञ्चमाश्चत्वारो वर्णाः पञ्च मानवा' इति भट्टभास्करादिभिर्व्याख्यातम् । वर्णानां पञ्चमत्वेन निषादस्य ग्रहणमग्निसम्बंधसाम्यात् । अत एव मन्त्रवर्णः 'जना यदग्निमयजन्त पञ्चे' ति । एवं मन्त्रान्तरानुरोधेन पञ्चजनशब्दस्यार्थान्तरपरत्वादेव शारीरकभाष्ये तस्य यथासूत्रं प्राणादिपरत्वं वर्णितवद्भिरपि शङ्कराचार्यैर्बृहदारण्यकभाष्ये 'पञ्च पञ्चजनाः गंधर्वाः पितरो देवा असुरा रक्षांसि, निषादपंचमा वा वर्णा' इति व्याख्यातम् । एवमेवार्थांतरपरस्यापि वाक्यस्य न्यायव्युत्पादनार्थमर्थान्तराश्रयणेन सिद्धान्तवर्णनं पूर्वतंत्रेऽपि दृश्यते । हानोपायनाधिकरणे तदुदाहरिष्यते । तस्मान्न्यायोपबृंहणानुगृहीतवाक्यार्थनिर्णयानुरोधात्सूत्रकारभाष्यकाराभिप्रायाविरोधाच्चाथर्वशिरःप्रसिद्धात्याश्रमसंज्ञकपाशुपतव्रतानुष्ठानवद्भिरेव ब्रह्मविद्यानुष्ठेया ग्राह्या च तेभ्य एव च प्रदेयेति निर्णयः । अंगावबद्धाधिकरणे चाधिकमत्र व्युत्पादयिष्यते। शरीरित्वापहतपाप्मत्वादिगुणभेदो विद्याभेदकत्वेन यः पूर्वपक्षिणश्शंकाविषयः स न तद्भेदकः प्रत्युत तदभेदस्यैवोपपादक इति प्रतिपादनार्थं सूत्रम्—दर्शयति च ॥ ४ ॥ शरीरित्वेन पाप्मादिप्रसक्तौ हि तन्निषेधोऽर्थवान् । अतः कैवल्योपनिषदादिप्रतिपादितशरीरित्वप्राप्तिमपेक्षमाणश्छांदोग्ये पाप्मादिनिषेधो विद्यैक्यस्यैव गमकः इति भावः । दहरविद्या-

छान्दोग्ये 'अथ यदिदमस्मिन्' इत्यारभ्य तस्य गुणाष्टकविशिष्टत्वं केवलमुच्यते। तत्र तत्र धर्मविशेषापादिका पुनःश्रुतिः विद्याभेदिकेति शङ्काया अपि नावकाशः। ततश्चोदनाद्यविशेषात् सकलवेदान्तप्रत्ययमेकमेवोपासनम्, तद्भेदकशब्दान्तराद्यदर्शनात् इति सिद्धम् ॥

इति सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

---

याश्शाखाभेदेन पुनःश्रुतिर्विरुद्धधर्माणामपि प्रापयित्रीति ततो विद्याभेदो न शङ्कनीयः। सत्किमस्तु तद्विरोधासिद्धेरित्याशयेनाह—तत्र धर्मविशेषेति। शब्दान्तराद्यदर्शनादिति। शब्दांतराभ्याससंख्यागुणप्रक्रियानामधेयानि कर्मभेदप्रमाणानि पूर्वतंत्रे प्रसिद्धानि। इहापि 'नानाशब्दादिभेदा'दित्यादिषु विभावयिष्यन्ते। तेषामिहादर्शनमभेदसाधकमित्यर्थः[1]। इति सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

---

नयमणिमालायाम्

अथ सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

सू ॥ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥ भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥ दर्शयति च ॥ ४ ॥

अविशेषपुनःश्रवणात्प्रकरणगुणानामभेदाच्च। धर्माणामपि भेदात्प्रतिशाखं भिद्यते विद्या ॥ २०१ ॥

विधिफलरूपाद्यैक्यात्कैवल्यगुणोपजीवनाच्छांदोग्ये। नास्ति भिदा सुपरिहरा बोध्यविभेदादिभिः पुनःश्रवणाद्याः ॥ २०२ ॥

इति सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

सूत्रार्थचन्द्रिकायाम्

अथ तृतीयस्याध्यायस्य तृतीयः पादः ॥

अथ सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

सू ॥ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥ भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥ स्वाध्यायस्य तथात्वेन हि समाचारोऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥ दर्शयति च ॥ ४ ॥

**भगवत्पादमते,** पूर्वपादे वाक्यार्थज्ञानकरणभूततत्त्वंपदार्थनिरूपणमकारि। सगुणविद्यायाश्चित्तैकाग्र्यद्वारा निर्गुणवाक्यार्थज्ञानोपयोगित्वात्तद्वाक्यार्थविचारः प्रस्तूयतेऽस्मिन्पादे—तत्र तावत्पंचाग्निप्राणदहरशाण्डिल्यवैश्वानरोपासनस्वरूपमाह—**सू। सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥** अत्र उक्तोपासनानि किं प्रतिशाखं भिद्यन्ते उत नेति **संदेहः**। नामरूपादिभेदाद्भिद्यन्त इति **पूर्वपक्षः। सिद्धान्तस्तु,** सर्वैर्वेदान्तैः प्रत्ययं प्रतीयमानान्युपासनानि न भिद्यन्ते। कुतः। **चोदनाद्यविशेषात्**—चोदनासंयोगरूपसमाख्यानामविशेषात्। यथा—सर्वशाखासु 'अग्निहोत्रं जुहुया'दिति चोदनाया अविशेषात् नित्याग्निहोत्रमेकमेव, यः प्राणोपासकः सः 'ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति' इति फलसंयोगस्य सर्वत्राविशिष्टत्वाच्च ज्येष्ठत्वादिगुणकप्राणस्योपास्यस्य सर्वत्राविशिष्टत्वाच्च न विद्याभेदः, तथा प्राणविद्येति समाख्यायास्सर्वत्राविशिष्टत्वाच्च न विद्याभेद इति सिद्धम् ॥

**सू ॥ भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥** ननु वाजसनेयिनः पञ्चाग्निविद्यायां 'तस्याग्निरेवाग्निर्भवति' इति षष्ठं प्रसिद्धाग्निमुपास्यत्वेनामनन्ति, छन्दोगास्तु 'पञ्चाग्नीन्वेदे'ति। तथा च रूपभेदादामिक्षावाजिनयागयोरिव शाखाद्वये पञ्चाग्निविद्याया भेदो नैक्यमिति चेत् **न**। यतः। एकस्यामपि विद्यायामयं रूपभेद उपपद्यते। यथा—वाजसनेयिभिर्द्युलोकादयो ये पञ्चाग्नय उक्तास्त एव प्रत्यभिज्ञायन्ते छान्दोग्ये। तथा च न विद्याभेदो युक्तः। अग्निषु पञ्चत्वसंख्याश्रवणस्य सांपादिकाग्निपरत्वेन एकस्मिन्नेवातिरात्रे षोडशिग्रहणतदभावयोरिव षष्ठाग्नितदभावयोरुपपन्नत्वेन च विरोधाभावाच्च ततोऽपि विद्याभेदो युक्त इति सिद्धम् ॥

ननु ब्रह्मविद्याप्रतिपादकमुण्डकाध्ययने शिरोव्रताख्यधर्मो विहितो नान्यत्र। अतो धर्मभेदाद्विद्याभेद इत्याशंकायामाह—**सू ॥ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥** स्वाध्यायस्यैव शिरोव्रताख्यधर्मोऽङ्गं न विद्यायाः। कुतः। **तथात्वेन हि**—यतः स्वाध्यायांगत्वेन समाचाराख्यवेदव्रतोपदेशपरग्रन्थे शिरोव्रतमपि वेदव्रतत्वेनाथर्वणिकास्समामनन्ति। **अधिकाराच्च**—'नैतदचीर्णव्रतोऽधीत' इत्यत्राधिकृतविषयादेतच्छब्दात् चकारा-

---

(१) 'तेषामिहादर्शनादित्यर्थः' ॥ इति क. पाठः।

'दधीते' इत्यध्ययनशब्दाच्च शिरोव्रतमध्ययनस्यैवाङ्गम् । तत्र दृष्टान्तः—सववत्=यथा सवाः सप्त होमास्सौर्यादयश्शतौदनान्ताः शाखान्तरोक्तत्रेताग्न्यनभिसंबन्धादाथर्वणिकोक्तैकाग्निसंबन्धाच्चैकाग्नीनामाथर्वणिकानामेव नियम्यन्ते तद्वत् । तन्नियमः=मुण्डकाध्ययन एव तस्य शिरोव्रतस्य नियमः । तस्मात्सर्वत्र विद्यैक्यमनवद्यम् ॥

किं च ॥ सू ॥ दर्शयति च ॥ ४ ॥ 'सर्वे वेदा यत्पदमामनन्ति' इति वाक्यं वेद्यस्यैकत्वेन सर्वत्र तद्विद्याया एकत्वं दर्शयति 'यस्त्वेतमेवं प्रादेशमात्र' मित्यादि वाक्यं च वैश्वानरविद्याया एकत्वं दर्शयति । तथा च तदुपासनानामप्यैक्यमवगम्यते । तत्समभिव्याहारादितरेषामप्युपासनानामभेद इति सिद्धम् ॥

**श्रीकण्ठमते, रामानुजमते च संदेहपूर्वपक्षादिकं** शांकरमतादविशिष्टम् । सूत्रार्थवर्णनप्रकारः परं शांकरमतात्किंचिदिव भिद्यते । उपपादनप्रकारेऽप्यनयोर्मतयोः परस्परमवैशिष्ट्यमेवेत्यनुसंधेयम् । सर्वेषु वेदान्तेषु श्रूयमाणं दहराद्युपासनं किमेकमेव उत भिन्नमिति **संशयः** । अविशेषपुनःश्रवणस्य प्रकरणान्तरस्य च भेदहेतुत्वात् उपासनान्तरमिति **पूर्वपक्षः** । प्रतिपत्तृभेदेन पुनःश्रवणोपपत्तेः तत एव प्रकरणान्तरत्वाभावाच्च चोदनाफलसंयोगरूपाख्यानामविशेषादुपासनैक्यमेवेति **सिद्धान्तः** । सूत्रार्थोऽप्यविशिष्टः ।

**सू ॥ भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥** अविशेषपुनःश्रुत्या विद्याभेदावगमान्न विद्यैक्यमिति चेत् एकस्यामपि विद्यायां शाखान्तरे प्रतिपत्तृभेदात्पुनःश्रवणमर्थवदिति न विद्याभेदः ॥

**'स्वाध्यायस्ये'**त्यादिसूत्रस्यार्थः पूर्वस्मादविशिष्टः ॥

**सू ॥ दर्शयति च ॥ ४ ॥ श्रीकण्ठमते,** श्रुतिरेव विद्यैक्यं दर्शयति । महोपनिषत्कैवल्योपनिषदोर्दहरविद्यायां 'ऋतं सत्यम्' 'उमासहायम्' इत्यादिना निर्दिष्टमीश्वरस्य रूपमपेक्ष्य रूपवत्त्वात्पाप्मजरामरणादिप्रसक्तौ छान्दोग्ये 'अथ यदिदमस्मिन्' इत्यारभ्य तस्य गुणाष्टकविशिष्टत्वं केवलमुच्यते । ततश्चोदनाद्यविशेषादेकमेवोपासनमिति सिद्धम् ॥ इत्यर्थः ॥

**रामानुजमते तु दर्शयति च** श्रुतिरुपासनस्य सर्ववेदान्तप्रत्ययत्वम् । छान्दोग्ये दहरविद्यायां 'तस्मिन्यदन्त'रिति विहितमपहतपाप्मत्वादिगुणाष्टकं तैत्तिरीयके केवलं 'तस्मिन्यदन्तस्तदुपासितव्य'मित्येवोक्तम् । तदुभयत्र विद्यैक्य एव संभवतीत्यर्थः ॥ **॥ इति श्रीकण्ठरामानुजमतयोस्सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥**

**आनन्दतीर्थमते,** भक्तिनिरूपणानन्तरं तत्साधनोपासना निरूप्यते । सा चोपासना समस्तशास्त्राभ्यासरूपा श्रवणमननात्मिकैका, श्रवणमननोत्सारिताज्ञानसंशयविपर्ययस्य पुरुषस्य ध्यानात्मिकान्या चेति द्विविधा । तत्र श्रवणमननात्मिकोपासना प्रथमाधिकरणे निरूप्यते—**सू ॥ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥** सर्ववेदोदितं ब्रह्म किमधिकारिणा स्वशाखोक्तरूपेणैव श्रवणमननाभ्यां ज्ञातव्यम् उत समस्तशाखोक्तरूपेण वेति **संशयः** । क्वचिच्छाखायां सत्यज्ञानादिरूपं वेद्यमन्यत्रापहतपाप्मत्वादिरूपमित्येवं वेद्यभेदात्सर्वशाखाध्ययनश्रवणमननेषु मन्दानां शक्त्यभावात्स्वस्वशाखोक्तरूपेणैव ज्ञातव्यम् । अत एव शाखाभेदव्यवस्थापि युज्यत इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** यस्सर्वेषां वेदानामन्तो निर्णयः श्रवणमननसाध्यः तेन ज्ञातव्यं ब्रह्म न तु स्वशाखानिर्णयमात्रेण ज्ञातव्यम् । कुतः । **चोदनाद्यविशेषात्**= 'आत्मे'त्यादिविधीनामादिपदोदितानां 'मन्त्र श्येत' इत्यादिवाक्योक्तयुक्तीनां **चाविशेषात्**सर्वाधिकारिसाधारणत्वादिति ॥

**सू ॥ भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥** 'चे'ति 'ने'ति 'भेदा'दिति 'अपी'ति चावर्तते । तर्हीति शाखायामिति च लभ्यते । तथा च वेदादिसर्वशाखोक्तार्थानां **भेदात्**=पृथक्त्वात् । अथ एकैकेन सर्वशाखोक्तं ज्ञेयं न भवति किं तु स्वशाखोक्तमेवेत्युच्यते तर्ह्यपि स्वस्वशाखोक्तमपि न ज्ञेयं स्यात् । कुतः । **एकस्यां शाखायामपि भेदात्**=अर्थभेददर्शनात् । अथ यदि तत्र धर्मभेदादेकस्मिन्धर्मिणि भिन्नधर्मविधानात्प्रसंगभेदाच्चेति परिहार उच्यते तस्य सर्वशाखोक्तज्ञानेऽपि सम इत्यर्थः ॥

**सू ॥ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च ॥ ३ ॥** पृथक्सूत्रमिदम् । **स्वाध्यायस्य**='स्वाध्यायोऽध्येतव्य' इति विधेः । **तथात्वेन**=सर्वसाधारण्येनाध्ययनविधायकत्वेन । **समाचारे**=सर्ववैदिककर्मकरणे । **अधिकाराच्च**=सर्वेषामधिकारसद्भावाच्च 'हि' इतिसूचितायाः 'वेदः कृत्स्नोऽधिगन्तव्य'इति स्मृतेश्च एकैकेनापि सर्वशाखाध्ययनेन ब्रह्म ज्ञातव्यमित्यर्थः ॥

**सू ॥ सलिलवच्च तन्नियमः ॥ ४ ॥** सूत्रपाठभेदः स्पष्टः । चोऽवधारणे । 'तन्नियम' इत्यत्र पञ्चमीतत्पुरुषकर्मधारयौ । **सलिलवत्**=सलिलमिव । **तन्नियमः**=यथा सर्वेषां सलिलानां प्रतिबन्धकाभावमपेक्ष्यैव समुद्रैकाश्रयत्वनियमः तथात्रापि **तस्याः**=पुरुषशक्तिमपेक्ष्यैव **नियमः**=सर्ववेदोक्तप्रकारेण ध्यानेन ब्रह्म ज्ञातव्यमिति नियम इत्यर्थः ॥

**सू ॥ दर्शयन्ति च ॥ ५ ॥** श्रुतिः स्मृतिश्च सर्वशाखोक्तमार्गेण ब्रह्म ज्ञातव्यमित्यर्थं ज्ञापयतीत्यर्थः ॥

**इति सूत्रार्थचन्द्रिकायां सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥**

## अथोपसंहाराधिकरणम् ॥ २ ॥

सर्ववेदान्तचोदितानां विद्यानामैक्यप्रतिपादनफलमाह—

**सू ॥ उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥ ५ ॥**

इह विद्यैक्ये सत्यपि शाखान्तरसिद्धानां गुणानां शाखान्तर उपसंहारो न कर्तव्यः कर्तव्यो वा ।

इति संशये न कर्तव्य इति पूर्वः पक्षः । तथा हि—छान्दोग्ये दहरविद्याया-मपहतपाप्मत्वादयो गुणा आम्नाताः । न तैत्तिरीये । न तत्र तेषामुपसंहारः कर्तव्यः, तत्रानुक्तत्वात् । विद्योपकारस्तत्रोक्तैरेव कृष्णपिङ्गलत्वादिगुणैर्भवि-ष्यति, किमुपसंहारेणाचोदितेन ॥

---

## अथोपसंहाराधिकरणम् ॥ २ ॥

सू० ॥ उपसंहारोऽर्थाभेदाद्विशेषवत्समाने च ॥ ५ ॥ पूर्वाधिकरणप्रयोजनसम-र्थनार्थत्वेन संगतिं सूचयन्नेकैकस्यां शाखायां सर्वगुणानामनाम्नानाद्विद्यैक्याच्च संशयं दर्शयति—इहेति । ननु विद्यैक्ये तद्गुणत्वाविशेषात्तच्छाखागतगुणानामिवान्यशाखा-गतगुणानामपि ग्रहणं सिध्येदेव । अतः कथं पूर्वपक्ष इत्याशंक्याह-तथा हीति । यद्य-न्यशाखागतगुणा अपि ग्राह्या विवक्षिताः तदा तेषामप्याम्नानं स्यादित्यनाम्नानादेव तेषा-मविवक्षावगमादग्रहणमित्यर्थः । न च शाखान्तरगुणा अभेदात्स्वत एव प्राप्नुवन्तीत्य-न्यथासिद्ध्या तदनाम्नानं न त्वविवक्षयेति वाच्यम् । शाखान्तरगतानामपि केषाञ्चिदा-म्नानेन तदतिरिक्तानामनभिमतत्वोन्नयनादिति भावः । ननु तद्गुणानामेव सतामग्रहणे कथमखण्डोपकारसिद्धिः । तस्य तत्प्रधानान्वयसकलांगकलापसाध्यत्वादित्याशंक्याह— विद्योपकार इति । अनेकशाखाविप्रकीर्णसकलगुणोपसंहारस्य कर्तुमशक्यत्वात्सर्वशक्त्य-धिकरणन्यायेन शक्यगुणमात्रोपसंहारः कार्यः । तथा च केषांचिद्गुणानामशक्त्या हाना-वश्यंभावे यो यच्छाखागतविधिनोपासनामवगत्य तामनुतिष्ठासति तस्य तच्छाखागतगुणा-नामवगतानां हाने हेत्वभावात्तदनाम्नातगुणास्तेन हातव्या इति व्यवस्थाभ्युपगन्तव्या । ननु सर्वशक्त्यधिकरणे नित्यानामेव शक्यांगोपसंहारेणानुष्ठानमुक्तम् । जीवनादिनिमित्त-कप्रधानावश्यकर्तव्यतानुरोधात्काम्येषु तु सकलांगोपसंहारनियमः 'काम्येषु चैवमर्थत्वा' दिति तदनंतराधिकरणे स्थापितः । काम्यानि चोपासनानि, अतस्तेष्वशक्यांगहानं न युक्तमिति चेन्मैवम् । जीवनादिरूपानुपादेयनिमित्तरहिततया कदाप्यवश्यकर्तव्यत्वेना-प्राप्नुवंति काम्यकर्माणि यदाकदाचिदुपादेयसकलांगसंपादनेन कर्तुं शक्नोति पुरुष इति तत्र युक्तस्सकलांगोपसंहारनियमः । अनवगतनानाशाखाविप्रकीर्णसकलगुणोपसंहारं तु कश्चिदपि कदाचिदपि कर्तुं न शक्नोतीति उपासनानां काम्यत्वेऽपि सर्वशक्त्यधिकरण-न्यायविषयत्वात् कर्मस्वपि नानाशाखागतसकलांगोपसंहाराशक्तितौल्ये तत्रापि समा-नोऽयमाक्षेपः । देवर्षयस्सर्वशाखाभिज्ञास्सकलगुणांगोपसंहारशक्तास्सन्तीति चेत् । न । तेषामपि प्राचीनेषु जन्मसु देवर्षिपदप्रापककर्मानुष्ठानस्यापेक्षितत्वादिति भावः । अनेना-भिप्रायेण तत्रोक्तैरित्युक्तम् । अपठितगुणोपसंहारे पठितगुणानां पाठक्रमप्राप्तस्यानुसंधान-

---

( १ ) ' शाखान्तराम्नाता वस्तुतो विद्यैक्यात्स्वत एव ' इति ख. पाठः ।

**इति प्राप्तेऽभिधीयते—सर्वत्र विद्यैक्ये छान्दोग्यादिषूक्तानां दहराद्युपासनधर्माणामपहतपाप्मत्वादीनामन्यत्र तैत्तिरीयकदहरादिषूपसंहारः कार्यः, विद्योपकाररूपस्यार्थस्यैकत्वात् । यथैकविधिशेषतया विहितानामङ्गानामग्निहोत्रा-**

---

क्रमस्य बाधः स्यात् सोऽपि न युक्त इत्युक्तेरित्यनेन सूचितम् ।, 'उक्तेरेवे' त्येवकारेण गृहमेधीयन्यायस्सूचितः । ननु गृहमेधीयेष्टौ प्रकृतितस्संभवत्प्राप्तिकयोराज्यभागयोः पुनःश्रवणमपूर्वतापरमित्यर्थादप्राप्तप्राकृतांगनिवृत्तिः फलति । न चेह तथा किंचित्प्राकृतमंगं, तस्य पुनःश्रवणं वास्ति, अतो नात्र गृहमेधीयन्यायः प्रवर्तत इति चेन्मैवम् । इहापि शाखांतरतस्संभवत्प्राप्तिकानां केषांचिद्गुणानां पुनःश्रवणस्य सत्त्वेन प्रकृतिविकृतिभावाभावेऽप्यन्यतस्संभवत्प्राप्तिकगुणश्रवणं तत्रत्यगुणांतरनिवृत्तिफलकमिति न्यायावतारसंभवादित्याशयः । विद्योपकाररूपस्येति । एकविद्याकर्मान्वयिगुणांगानामखण्डोपकाररूपप्रयोजनैक्यात्सर्वेषामपि तेषां ग्रहणं तावत्स्वरसतः प्राप्नोति । तस्य न तावदशक्त्यापवादः । अशक्तिर्हि तावच्छाखाध्ययनाशक्तिः । उत अनंतशाखाविहितानन्तगुणानुसंधानांगानुष्ठानाशक्तिः अथवा अनधीतशाखाम्नाताङ्गावगत्यशक्तिः । नाद्यः । 'अध्ययनेनैव स्वाध्यायार्थज्ञानं भावये'दिति नियमस्य स्वस्वशाखामात्रविषयत्वेनानधीतपरशाखाम्नातगुण[1]संग्रहणसंभवात् । न द्वितीयः । सर्वज्ञैर्महर्षिभिः प्रणीतेषु कल्पसूत्रेषु कर्मणामंगेयत्तायाः ब्राह्मवासिष्ठादिविद्याकल्पेषूपासनानां गुणेयत्तायाश्च परिच्छिन्नत्वेनानन्तशाखाविहितानामपि तेषामानन्त्यासिद्धेः । न तृतीयः । कल्पसूत्रैर्विद्याकल्पैस्तत्तत्कालाभियुक्तशाखान्तराध्ययनवदुपद्रष्टृवचनैश्चैतदवगतिसंभवात् । नापि गृहमेधीयन्यायेन शाखान्तराम्नातकतिपयांगपुनःश्रवणादपवादः । गृहमेधीयप्रयोगविधिरंगजन्योपकारमपेक्षमाणः प्रकृतौ क्लृप्तोपकारयोराज्यभागयोः सन्निधानाम्नातयोर्ग्रहणेनोपकाराकांक्षाशांत्या प्रकृतितोऽगांतराणां प्राप्तिं नापेक्षत इति तत्प्रापकचोदकलोपात् न दर्शपूर्णमासप्रकृतिको गृहमेधीयः किन्त्वपूर्व इति सिद्ध्यति । एवमंगान्तरनिरपेक्षोऽपि सन्निध्याम्नातान्यप्राकृतानि वैशेशिषिकांगानि तद्वैयर्थ्यपरिहारार्थं गृह्णातीति गृहमेधीयन्यायः । न चात्र शाखान्तराम्नातपुनःश्रूयमाणगुणांगानां क्वचित्प्राक्क्लृप्तोपकारत्वमस्ति । येन तद्ग्रहणनिराकांक्षा विद्याकर्मप्रयोगविधयो गुणांगान्तराणि नापेक्षेरन् । तथापि यदि तेषां पुनःश्रवणस्य वैयर्थ्यं प्रसज्यते तदा तत्परिहाराय शाखान्तराम्नातगुणांगान्तरपरिसंख्यार्थत्वं कल्प्येतापि । न तु वैयर्थ्यप्रसक्तिरस्ति । तस्य शाखान्तराम्नातविद्याकर्मैक्यप्रत्यभिज्ञानार्थत्वात् । सिद्धे हि तदैक्ये ततस्संभवत्प्राप्तिकानां पुनःश्रवणं व्यर्थमिति शंकनीयम् । तदैक्य[2]सिद्धावेवोपयुक्तस्य न वैयर्थ्यशंकावकाशः । नापि तत्तच्छाखापठितगुणांगक्रमबलादपवादः । एकस्यां शाखायां विहितानि विद्याकर्मगुणांगानि गुणिद्वारा वाक्यप्रमाणेन हि शाखान्तरे गच्छंति । यथा जुह्वादिद्वारा वाक्यप्रमाणेन क्रतौ पर्णतादयः । न च वाक्यस्य स्थानरूपपाठक्रम ईष्टे । तत्प्रमेयश्च पदार्थधर्मरूपः क्रमश्शिष्टाकोपाधिकरणन्यायाद्वाक्यप्रमेयेभ्यः पदार्थरूपेभ्यो गुणांगांतरेभ्यो दुर्बलः । तस्मादखण्डोपकाररूपप्रयोजनैक्याद्विद्यैक्ये गुणोपसंहारः कर्मैक्येऽगोपसंहारश्च युक्त एव । सूत्रे 'विधिशेषव'दिति समुच्चयो-

---

(१) 'गुणांपग्रहण' इति ख. पाठः । (२) 'सिद्धावेव पुनःश्रवणस्यावैयर्थ्यशंका' इति क. पाठः ।

**दिषु, तथैव चोदनादिभिः समाने दहराद्युपासने गुणानां प्राप्तिरिति गुणोपसंहारो युक्त एव ॥ इत्युपसंहाराधिकरणम् ॥ २ ॥**

## अथान्यथात्वाधिकरणम् ॥ ३ ॥

## अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥

**वाजिनां छन्दोगानां चोद्गीथे प्राणदृष्ट्योपासनं शत्रुपरिभवफलं विधीयते । तत्र विद्यैक्यमस्ति न वा ।**

---

पमा । तेन कर्मणामंगोपसंहारोऽप्यत्र प्रसंगात्प्रसाधनीयः । चकारोऽवधारणार्थः ॥

इत्युपसंहाराधिकरणम् ॥ २ ॥

अथ अन्यथात्वाधिकरणम् ॥ ३ ॥

सू ॥ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥६॥ चोदनाद्यविशेषाद्विद्यैक्यं विद्यैक्ये गुणोपसंहारश्चेत्युभयं निरूपितम् । तदपवादः क्रियते इति संगतिः । देवासुरसंग्रामोपक्रमाद्यैकरूप्यात् क्वचिदुद्गातरि प्राणदृष्टिरन्यत्रोद्गात्रा गातव्यस्य स्तोत्रसामद्वितीयभक्तिरूपस्योद्गीथस्यावयवे प्रणवे प्राणदृष्टिरिति रूपविशेषभेदाच्च विद्यैक्यभेदसंशये पूर्वपक्षः। एकैव विद्या चोदनाद्यविशेषात् । उभयत्रापि ह्युपासनाविषया चोदना । 'भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य एवं वेदे' त्येकत्र 'यथाश्मानमाखणमृत्वा विध्वंसते एवं हैव स विध्वंसते य एवंविदि पापं कामयत' इत्यन्यत्र चोच्यमानं शत्रुपराभवरूपं फलम् । उपास्यं रूपं प्राणः । उद्गीथविद्येत्याख्या । आखन्यतेऽनेनेत्याखणः । 'खनो घ चे'ति करणाधिकरणयोर्विहितो घप्रत्ययः । तमाखणमित्यश्मविशेषणम् । णत्वं छांदसम् । कालायसवत्खननसाधनत्वेन दृढमित्यर्थः । अर्थाल्लोष्टादिकमिति कर्तृलाभः । 'यथाश्मानमृत्वा लोष्टो विध्वंसेते'ति

---

नयमणिमालायाम्

अथोपसंहाराधिकरणम् ॥ २ ॥

सू० ॥ उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥ ५ ॥

तत्तच्छाखोक्तगुणैर्विद्यानामुपकृतेर्लाभात् । विद्यैक्येऽपि न कार्यश्शाखान्तरगतगुणोपसंहारः ॥ २०३ ॥

तेषामपि तद्विद्यात्संबंधस्याविशेषेण । ... ... ... ... ... पसंहारः ॥ २०४ ॥

इत्युपसंहाराधिकरणम् ॥ २ ॥

सूत्रार्थचन्द्रिकायाम्

अथोपसंहाराधिकरणम् ॥ २ ॥

सू ॥ उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥ ५ ॥

**भगवत्पादमते,** सर्वत्रोपासनानामेकत्वेऽपि एकशाखास्थविद्यानां शाखान्तरस्थाधिकगुणानामुपसंहारोऽस्ति न वेति **संदेहः** । यत्र यावन्तो गुणाः श्रुतास्तैरेवाकांक्षाशान्तेर्नोपसंहार इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** समाने उपासने गुणोपसंहारो युक्तः । कुतः । **अर्थाभेदात्**=उपास्यगुणैर्निर्दर्त्यस्य उपासनारूपार्थस्य सर्वशाखास्वभिन्नत्वात् । तत्र दृष्टान्तः— **विधिशेषवत्**=यथाग्निहोत्रस्य सर्वत्रैक्यात् तच्छेषाणामुपसंहारस्तद्वदित्यर्थः ॥

**श्रीकण्ठमते** तथा **रामानुजमते च संदेहपूर्वपक्षादिक**मविशिष्टम् । **अर्थाभेदात्**=विद्योपकाररूपस्यार्थस्यैकत्वादित्यर्थः। **'विधिशेषवत्'** इत्यत्र **रामानुजमते** परं वैश्वानरविद्यादिविधिशेषतया विहितस्य गुणस्य यथा तदुपकारायोपसंहारस्तथा वेदन्तान्तरेष्वपि तद्विद्याङ्गत्वाविशेषादुपसंहारो न्याय्य इति दृष्टान्तस्वरूपमन्यथा विवृतमिति विशेषः । **अन्यद**विशिष्टम् ।

**आनन्दतीर्थमते,** अस्याधिकरणस्य उत्तराधिकरणसूत्रैस्सहैकाधिकरण्यसद्भावादुत्तरस्मिन्नधिकरण एव तस्य निरूपणीयत्वादत्र तन्निरूपणावकाश इति वेद्यम् ॥ **इति सूत्रार्थचन्द्रिकायामुपसंहाराधिकरणम् ॥ २ ॥**

---

( १ ) 'कर्माङ्गानामुपसंहारोऽप्यत्र' इति ख.पाठः । ( २ ) 'तस्य कश्चिदपवादः' इति ख. पाठः ।

इति संदेहे चोदनाद्यविशेषाद्विद्यैक्यमस्तीति पूर्वः पक्षः ॥

ननु वाजिनां प्राणदृष्ट्योपासनमुद्गानकर्तृविषयमिति 'अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्'। इति शब्दात् प्रतीयते। छन्दोगानां तु तदुद्गानकर्मविषयमिति 'य एवायं मुख्यप्राणस्तमुद्गीथमुपासांचक्रिरे' इति शब्दात् प्रतीयते । तस्मादन्यथात्वं विद्ययोर्नैक्यमिति चेत्–न, उपक्रमाविशेषात् । 'द्वया ह प्राजापत्या देवाश्चासुराश्च । ततः कानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्धन्त ते ह देवा ऊचुः हन्तासुरान् यज्ञ उद्गीथेनात्ययाम' इत्येकत्र 'देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्यामः' इत्याद्यन्यत्र । तस्मादुपक्रमाविशेषादुभयत्र विद्यैक्यमिति ॥

सिद्धान्तमाह—

समानप्रकरण श्रवणात् । यद्यप्याखन्यते भिद्यत इति कर्मणि घञ्प्रत्ययेन भिदुरं लोष्टमेवाखणशब्देन वक्तुं शक्यते, तथापि 'स एषो ऽश्माखण' इत्यग्रिमवाक्यदर्शनादिहाप्यश्मविशेषणमेवेदम् । 'ननु अथ हेममासन्यं प्राणमूचु'रित्यादिना एकत्रोद्गानकर्तरि प्राणदृष्टिर्विधीयते। अन्यत्र 'तमुद्गीथ' मित्यादिनोद्गीथावयवे। आसन्यमास्ये भवम् । 'य एवायं मुख्यः प्राण' इति समानप्रकरणे श्रवणात् । 'पद्दन्नोमा' सित्यादिसूत्रेणास्यशब्दस्यासन्नादेशः । यद्यपि बृहदारण्यकेऽप्युद्गीथेनात्ययामे' त्युद्गीथोपक्रमाविशेषात्तदनुरोधेन प्राण उदगायत्ते विदुरनेन वैन उद्गात्रात्येष्यंती'ति प्राणसमानाधिकरणोद्गानकर्तृवाचिशब्दप्रयोग उद्गानकर्मण्युद्गीथ एव सौकर्यातिशयविवक्षया लाक्षणिक इत्युपपाद्येत। तथाप्युत्तराधिकरणन्यायेन छांदोग्यगत उद्गीथशब्दः उद्गीथावयवपरः । बृहदारण्यकगतस्तु न्यायाविषयत्वात्कृत्स्नोद्गीथभक्तिपर इत्यस्ति विशेषः । तस्माद्विद्याभेदो युक्त इति चेन्मैवम् । उपक्रमादिसारूप्यबाहुल्येनाल्पवैलक्षण्यस्य भेदकत्वाभावात् देवासुरसंग्रामप्रवृत्तिर्देवानामुद्गीथेनासुरपराभवाभिप्राया । असुरपराभवार्थं देवानां वाग्घ्राणचक्षुःश्रोत्रमनसामाश्रयणं वागादीनामसुरैरभिभवः ततो मुख्यप्राणसमाश्रयणं तद्वीर्यादश्मलोष्टनिदर्शनेनासुरविध्वंसनमित्येतत्सर्वमुभयत्रापि समानम् । अतोऽल्पवैलक्षण्यमुदितानुदितहोमवद्विकल्पेन समाधेयम् । न चोद्गात्रुद्गीथयोरुत्पत्तिशिष्टतया कश्चिद्विशेषः । अग्नीषोमीययागांगकपालैकादशद्वादशसंख्ययोरुत्पत्तिशिष्टत्वेऽपि तुल्यबलतया विकल्पस्य शाखान्तराधिकरणवार्तिके वर्णितत्वात् । नन्विह प्राणविद्यायां प्राणः प्राधान्येन नोपास्यः किंत्वेकत्राध्यस्तप्राणभाव उद्गातोद्गीथो वा उपास्यः । अन्यत्र तथाभूत उद्गीथावयवः प्रणवः । ततश्च प्रधानोपास्यात्मकरूपभेदे भाव्यमुपासनभेदेनेति चेन्मैवम् । यथा यागे देवता एवमुपासनायामुपास्यः। उपांशुयाजे सत्यप्यग्निप्रजापत्यग्नीषोमलक्षणदेवताभेदे भेदो नाश्रितः । किंत्वेकस्मिन्नेवोपांशुयाजे देवतानां विकल्प आश्रितः । तथैंद्रवाय्वादिदेवताभेदेऽपि सोमयागे भेदो नाश्रितः । किंत्वेकस्यैव सोमयागस्य देवताभेदेनाभ्यासस्समाश्रितः । एवमिहाप्युपास्यविकल्पस्तद्भेदेनोपासनाभ्यासो वा भविष्यति । तस्माद्विद्यैक्यमेव न्याय्यमिति । अत्र सिद्धा-

( १ ) 'प्रधानोपसर्जनभावादेव भाव्य' मिति क. पाठः । ( २ ) 'सत्यपि विष्णुप्रजापति' इति क. पाठः ।

## सू ॥ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥ ७ ॥

**नोभयत्र विद्यैक्यम्, प्रकरणभेदात् । तथा हि—'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्युद्गीथावयवभूतप्रणवविषयं प्रकरणं छन्दोगानाम् । वाजिनां तु कृत्स्नोद्गीथविषयमिति प्रक्रमभेदेन रूपभेदाद्विद्याभेदः । यथैकस्यामपि शाखायामुद्गीथोपासनेषु हिरण्मयदृष्टेः परोवरीयस्त्वादिदृष्टिर्भिद्यते, तथात्रापीति ॥**

न्त उच्यते । सू० ॥ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥ ७ ॥ न वेति निपातसमुदायः पूर्वपक्षव्यावृत्त्यर्थः । प्रकरणभेदात् प्रकरणवैलक्षण्यादित्यर्थः । अयमाशयः । युक्तं शाखाद्वयेऽपि अग्नीषोमीययागैक्यं द्रव्यदेवताकालरूपप्रधानबहुगुणसारूप्ये सति द्वयोपसर्जनकपालविशेषणसंख्यावैषम्यमात्रस्य प्रत्यभिज्ञाविच्छेदकत्वाभावात् । प्रत्यभिज्ञैक्यसिद्धौ संख्याद्वयस्याप्युत्पत्तिशिष्टत्वेन तुल्यबलत्वाद्विकल्पोऽपि न्याय्यः । इह तूपसर्जनप्राणगुणमात्रसारूप्येऽपि प्रधानोपास्यवैरूप्यं प्रत्यभिज्ञाविच्छेदकमिति प्रत्यभिज्ञानुदयान्न विद्यैक्यसिद्धिः । एवं विधिवाक्ययोरैक्यप्रत्यभिज्ञाविच्छेदके जाग्रति बहिरंगार्थवादमात्रसारूप्यमप्रयोजकम् । इत्थमेव न्यायमर्यादासारूप्येण साधनीयेऽर्थे प्रधानगुणसारूप्ये सत्यप्रधानगुणवैरूप्यं नार्थसिद्धिविघातकं प्रधानगुणवैरूप्ये सत्यप्रधानगुणसारूप्यं नार्थसिद्ध्युपयोगीति । अत्रेदमुदाहरणम्—कर्मणां प्रकृतिविकृतिभावस्सारूप्येण कल्पनीयः जनकसप्तरात्रे श्रूयते–'चत्वारि त्रिवृन्त्यहानी'ति । तेषां सारूप्येण प्रकृतौ कल्पनीयायां यदि त्रिवृत्त्वसारूप्यं प्रयोजकमाद्रियेत तदा द्वादशाहे पार्ष्ठिकेष्वहःसु प्रथममेवाहश्चतुर्णामपि प्रकृतिः स्यात् । तदेव हि त्रिवृत्स्तोमकं सरूपम् । द्वितीयतृतीयचतुर्थानि त्वहानि पञ्चदशसप्तदशैकविंशस्तोमकानि विरूपाणि । यदि संघातसामान्यं प्रयोजकमाद्रियेत तदा प्रथमस्य प्रथममहः द्वितीयस्य द्वितीयं तृतीयस्य तृतीयं चतुर्थस्य चतुर्थं प्रकृतिस्सिद्ध्येत् । तत्राहर्धर्मस्य संघातस्य प्रधानगुणसारूप्यरूपत्वादहरंगभूतस्तोत्रोपसर्जनऋक्संख्यारूपत्रिवृत्त्वादिवैषम्ये सत्यपि संघातसारूप्येण चतुर्णामह्नां क्रमेण चत्वार्यहानि प्रकृतय इति गुणचोदनायां यस्य लिंगं तदावृत्तिः प्रतीयेताग्नेयवदित्याष्टमिकाधिकरणे निर्णीतम् । तत्र प्रकृतिविकृतिभावकल्पनायां प्रधानाप्रधानगुणसमवाये प्रधानगुणसारूप्येणैव सारूप्यनिबंधनार्थसिद्धिः न तु प्रधानगुणाननुगुणाङ्गगुणसारूप्येणार्थसिद्धिरस्तीत्युभयमाविष्कृतम् । तथा एकानेकगुणसमवायेऽनेकगुणसारूप्येण सारूप्यनिबंधनार्थसिद्धिः न त्वेकगुणवैरूप्येण तद्विघात इत्यपि न्यायमर्यादा । अत्र त्विदमुदाहरणम्–चित्रेष्टौ मधूदके द्रव्ये श्रूयेते । तयोर्द्रवत्ववर्णरूपाभ्यामाज्येन सारूप्यं द्रवत्वगतसांसिद्धिकत्वविशेषेण तु पयसा । तत्र सत्यपि द्रवत्वगुणभूतसांसिद्धिकत्वनैमित्तिकत्ववैरूप्ये द्रवत्ववर्णरूपानेकरूपगुणसारूप्येण मधूदकयोराज्यं प्रकृतिरिति मधूदके द्रवत्वसामान्यात्तयोर्विकारः स्यादित्याष्टमिकाधिकरणे निर्णीतम् । तस्मान्नात्राग्नीषोमीयन्यायः प्रवर्तते । नाप्युपांशुयाजन्यायः प्रवर्तते । 'उपांशुयाजमंतरा यजती' त्येकेन वाक्येनोत्पन्ने तस्मिन्भेदस्यासंभवित्वेनैक्ये सिद्धे पश्चाद्याज्यानुवाक्यामुखेनापतंतीनां देवतानां विकल्पं विना गत्यन्तराभावात् । अत एव सोमयागन्यायोऽपि न प्रवर्तते । 'सोमेन यजेते' त्येकेन वाक्येनोत्पन्नस्य सोमयागस्यैक्ये सिद्धे तद्द्रव्यसंस्काररूपग्रहणमुखेनापतंतीनां देवतानां ग्रहणसमुच्चयेन समुच्चये सत्यपि ततः

( १ ) 'द्रवत्वरूपाभ्या' मिति ख. पाठः ।

**आशङ्क्य परिहरति—**

## सू ॥ संज्ञातश्चेत् तदुक्तमस्ति तु तदपि ॥ ८ ॥

**उद्गीथविद्येति संज्ञैक्यादुभयत्राभेद इति न वाच्यम् । अस्ति हि विधेयभेदेऽपि संज्ञैक्यम् । यथा नैयमिकाग्निहोत्रे कुण्डपायिनामयनाग्निहोत्रे च नामैक्येऽपि कर्मभेदः । तद्वदत्रापि न विरोधः ॥ इत्यन्यथात्वाधिकरणम् ॥ ३ ॥**

प्राक्सिद्धसोमयागैक्यविघातायोगात् । इह तूपासनोत्पत्तिदशायामेवानुसंधीयमानं प्रधानोपास्यवैरूप्यं भिन्नयोरेवोपासनयोरुत्पत्तिं गमयेत् । तस्माच्छांदोग्यबृहदारण्यकयोर्भिन्नैवैषा प्राणविद्येति । सू० ॥ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ९ ॥ 'तदुक्त' मित्यस्य परोवरीयस्त्वादिगुणकविद्याभेदेऽपि छांदोग्यप्रथमप्रपाठकाम्नातानां सर्वासां विद्यानामुद्गीथविद्येति संज्ञैक्यसत्त्वान्न तद्विद्यैक्यप्रयोजकमित्येतत्पूर्वसूत्र एव परोवरीयस्त्वादिवदिति दृष्टान्तोपन्यासेनोक्तप्रायमित्यर्थः ॥ इति अन्यथात्वाधिकरणम् ॥ ३ ॥

### नयमणिमालायाम्

### अथ अन्यथात्वाधिकरणम् ॥ ३ ॥

**सू० ॥ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥७॥ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥**

छांदोग्यकाण्वपठिता विद्यैकोद्गीथरूपरूपैक्यात् । उद्गीथ एव रूपं काण्वानामप्युपक्रमात्कर्ता ॥ २०५ ॥
उद्गीथस्यावयवश्छांदोग्ये रूपमधिकारात् । काण्वे सकलोऽसाविति रूपविभेदेन भिन्ना सा ॥ २०६ ॥

इत्यन्यथात्वाधिकरणम् ॥ ३ ॥

### सूत्रार्थचन्द्रिकायाम्

अथान्यथात्वाधिकरणम् ॥ ३ ॥

**सू ॥ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥ ७ ॥ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥**

**भगवत्पादमते,** अत्र 'अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्' । इति वाजसनेयवाक्यं तथा 'अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे' इति छान्दोग्यवाक्यं च विषयः । अत्रोभयत्रापि प्राणविद्याविधिरवसीयते । पूर्वत्र समाख्याया अविशेषाद्विद्यैक्यमुक्तम् । तर्हि अत्राप्युद्गीथविद्येति समाख्याया अविशेषाद्विद्यैक्यमेवेति दृष्टान्तसंगत्येदमारब्धम् । किमत्र विद्यैक्यम् उत विद्याभेद इति **संशयः ।** विद्यैक्यमेवेति **पूर्वपक्षः । अन्यथात्वं**=न विद्यैक्यं भवितुमर्हति । कुतः । **शब्दात्**='त्वं न उद्गाये' त्युद्गीथकर्तृत्वेनैकत्र अन्यत्र 'तमुद्गीथमुपासां चक्रिरे' इति उद्गीथत्वेन च प्राणस्योपास्यत्वप्रतिपादकात् शब्दात् इति चेत् । नैतावता विद्याभेदः । कुतः । **अविशेषात्**=देवासुरसंग्रामोपक्रमासुरात्ययाभिप्रायप्रभृतीनामुभयत्राविशेषात् । अतो विद्यैक्यमिति सिद्धम् ॥ एवं पूर्वपक्षे प्राप्ते **सिद्धान्तमाह=सू ॥ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥ ७ ॥** नैव विद्यैक्यं युक्तम् । कुतः । **प्रकरणभेदात्**=एकत्र 'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्युद्गीथावयव ओंकारे प्राणदृष्टिरुपदिश्यते, अन्यत्र तु 'त्वं न उद्गाये' ति या सकलैव सामभक्तिः तस्याः कर्तोद्गाता प्राणत्वेनावेद्यत इत्युपक्रमभेदात् । तत्र दृष्टान्तः=**परोवरीयस्त्वादिवत्**=यथा परमात्मदृष्ट्यध्याससाम्येऽपि 'स एष परोवरीयानुद्गीथ' इति परोवरीयस्त्वादिविशिष्टमुद्गीथोपासनमक्ष्यादित्यगतहिरण्यश्मश्रुत्वादिविशिष्टोद्गीथोपासनाद्भिन्नं तद्वत् ॥

**सू ॥ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥** ननु उद्गीथविद्येत्युभयत्र **संज्ञातः**=संज्ञाया एकत्वाद्विद्यैक्यमिति **चेत् तदुक्तम्**='न वा प्रकरणभेदात्' इति सूत्रे । **अस्ति तु** तत्संज्ञैकत्वं प्रसिद्धभेदानामप्यग्निहोत्रप्रभृतीनां काठकैकग्रन्थपठितानां काठकत्वसंज्ञैकत्वम् ॥

**श्रीकण्ठमते** तथा **रामानुजमते च संदेहपूर्वपक्षादिषु** नास्ति वैलक्षण्यमतो नास्ति तद्विवरणावकाशः ॥

**आनन्दतीर्थमते,** अत्र 'उपसंहारोऽर्थाभेदा' दित्यादिकमेकमधिकरणम् । अत्र उपसंहारपक्षानुपसंहारपक्षावुभावपि सोपपत्तिकमुपपादितौ । पक्षद्वयमपि वैकल्पिकत्वेन सिद्धान्तितम् । तच्च सूत्रार्थवर्णनतः विशदीभवेत् । **सू ॥ उपसं-**

## अथ व्याप्त्यधिकरणम् ॥ ४ ॥

### सू ॥ व्याप्तेश्च समञ्जसम् ॥ ९ ॥

छान्दोग्ये 'ओमित्येतदक्षरमुद्गीथमुपासीत' इति श्रूयते । इह प्रणवोद्गीथयो-स्तन्त्रमुपासनमुतैकविषयम् ।

इति संशये पूर्वः पक्षः—यद्यपि प्रणवोद्गीथयोरिह सामानाधिकरण्यमवग-म्यते । तच्च विशेषणविशेष्यतया संभवति । तथाप्युद्गीथेन प्रणवो विशेष्यते प्रणवेन चोद्गीथ इत्यत्र नियामकाभावात् तन्त्रमुपासनमिति ॥

एवं प्राप्ते ब्रूमः—न तन्त्रमुद्गीथप्रणवयोरुपासनम् । छान्दोग्ये प्रथमप्रपाठके

---

## अथ व्याप्त्यधिकरणम् ॥ ४ ॥

**सू० ॥ व्याप्तेश्च समञ्जसम् ॥ ९ ॥** छांदोग्यगत उद्गीथशब्दः उद्गीथावयवप्रणवपर इति सिद्धवत्कृत्य तन्निबंधनो विद्याभेदः पूर्वाधिकरणे निरूपितः । तदिदानीं साध्यत इति संगतिः । प्रणवोद्गीथोभयविषयमुपासनमुतोद्गीथविशिष्टप्रणवविषयमि 'त्योमित्येतदक्षरमु-द्गीथ' मिति श्रुतयोरक्षरोद्गीथशब्दयोस्सामानाधिकरण्यसंभवासंभवाभ्यां संशये पूर्वपक्षः । भिन्नार्थवाचिनोरनयोः स्वस्वार्थपरतया सामानाधिकरण्यं न संभवति । अन्यतरलक्षणया विशेषणविशेष्यभावकल्पनायां च किमुद्गीथशब्देनोद्गीथावयव ॐकारो लक्षणीयः 'ओमि-त्येतदक्षर' मित्यनेन वा तद्वानुद्गीथो लक्षणीय इत्यत्र विनिगमकं नास्ति । अन्यतरलक्ष-णया विशिष्टोद्देशे चैकत्वविशिष्टग्रहोद्देश इव वाक्यभेदः प्रसज्यते । तस्माद्यथा 'त्वाष्ट्रं पात्नीवतमालभेते' त्यत्र प्रत्येकं तद्धितश्रवणात् त्वष्टा पत्नीवांश्च पृथक्पृथग्देवतेति तदुभ-योद्देश्यको यागः, तथात्रापि प्रत्येकं द्वितीयाविभक्तिश्रवणादोंकार उद्गीथश्च पृथक्पृथगु-पास्य इति तदुभयोद्देश्यकमुपासनमिति युक्तम् । एवञ्चान्यतरत्र द्वितीयाविभक्तेर्विशेषण-विभक्तितया व्यर्थप्रायता च न भविष्यतीति । अत्र सिद्धान्तः—विशेषणविशेष्यभावे वि-निगमकाभावस्तावदसिद्धः 'ॐमिति ह्युद्गायती'त्यनंतरवाक्य ए'वो'मित्यक्षरे उद्गीथशब्दस्य

---

**हार इत्यादि ॥ ६ ॥ विधिशेषवत्**=विधिविहितस्येव । यथा विधिविहितत्वात्सन्ध्यावन्दनादिकमवश्यं कर्तव्यं **तथार्थाभेदात्**=सर्ववेदार्थभूतानामानन्दादिगुणानामपहतपाप्मत्वादिदोषाभावानां चाविभागात् । तानविभज्येति यावत् । **उपसंहारः**=सर्वगुणानामप्येकबुद्ध्यारोहणरूपोपसंहारः 'उपास्य एक' इति श्रुतौ विहितत्वात्कर्तव्यः । सोऽपि **समाने च**=समानविषय एव । ये ब्रह्मणि योग्याः पूर्णत्वाविरोधिनो गुणाः तद्विषय एव । न त्वयोग्यरोदनादौ । तथा सत्यनर्थप्राप्तेरित्यर्थः ॥

**सू ॥ अन्यथात्वं च शब्दादिति चेन्नाविशेषात् ॥ ७ ॥ अन्यथात्वं**=सर्वगुणोपसंहारः कार्य इत्युक्तस्यान्यथा-भावः तस्याकर्तव्यत्वमेवावश्यमंगीकार्यम् । कुतः । **शब्दात्**='आत्मेत्येवोपासीते'ति अनुपसंहारश्रुतेरिति **चेन्न । अविशे-षात्**='एते गुणा नोपसंहार्या' इति विशेषप्रमाणाभावात् 'सर्वैर्गुणै' रित्यविशेषेणोपसंहारे तु विशेषप्रमाणसद्भावाच्चेत्यर्थः । 'आत्मेत्येवे' त्येवकारस्त्वयोगव्यवच्छेदक इति भावः ॥

**सू ॥ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥ ८ ॥ परोवरीयस्त्वादिवत्**=यथा स एष इत्युक्तानां निरवधिकसर्वोत्तमत्वरूपपरोवरीयस्त्वादिगुणानामेवोपासनार्थमुपसंहारो न सर्वगुणानाम् । तद्वत्सर्वगुणोपसंहारो न कर्तव्यो वा । कुतः । **प्रकरणभेदात्**=परोवरीयोवैश्वानरादिप्रकरणभेदात् । अन्यथा तत्र स्यादित्यर्थः ॥ **सू ॥ संज्ञातश्चेत्त-दुक्तमस्ति तु तदपि ॥ ९ ॥ संज्ञातः**=सर्वविद्यानां भगवन्नामत्वेन तद्गुणोक्तिरूपत्वात् सर्वविद्योक्तगुणोपसंहारः कार्य इति **चेत् । तदुक्तम्**=तत्र चोद्ये तदिष्टमेवेति समाधानं तेनोपसंहारसूत्रेणोक्तमित्यर्थः । न केवलं युक्तिसिद्धमेतत् । किंतु **तदपि**=तस्मिन्नर्थे 'नाम वा एता' इति प्रमाणमपि **अस्ति तु**=अस्त्येवेत्यर्थः ॥

**इत्यानन्दतीर्थमते उपसंहाराधिकरणम् ॥ २ ॥**

'ओमित्येतदक्षरमुद्गीथमुपासीत ओमित्युद्गायति' इति तस्योपक्रमवदुत्तरत्रापि 'खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति' इति प्रणवस्योपास्यत्वव्यासेरुद्गीथेन लक्षणया प्रवृत्तौ निमित्तस्य सम्बंधस्योच्यमानत्वात्तस्योपव्याख्यानमिति प्रकृतस्योंकारस्यैव गुणोपासनफलप्रपञ्चनार्थं उत्तरः प्रपञ्च इत्युक्तत्वात् प्रथम 'मेषां भूतानां पृथिवी रस' इति गुणप्रपञ्चनमुपक्रम्य पृथिव्योषधिपुरुषवागृक्सामोद्गीथा उत्तरोत्तरं रसा इत्युद्गीथस्य रसतमत्वगुणप्रतिपादनानंतरं कतम उद्गीथ इति विमृष्टं भवतीत्युद्गीथविमर्शं कृत्वा 'ओमित्येतदक्षरमुद्गीथ' इति व्याख्यातत्वाच्च। रसतमत्वादिविशिष्टगुणोपासनात्फलप्रपञ्चनानंतरं द्वितीयखण्डमारभ्य प्रपञ्चयिष्यमाणानामुद्गीथविद्यानामप्योंकारविषयतायाः 'खल्वेतस्यैवाक्षरस्ये' त्यादिप्रथमखण्डान्तवाक्येन दर्शितत्वाच्च। एतेन विभक्तिद्वयसाफल्यायोपास्यद्वयकल्पनमपि निरस्तम्। अग्रिमव्याख्यानप्रपञ्चेन विशेषणविशेष्यभावावधारणात्। न च विशिष्टोद्देशेन वाक्यभेदः। विशिष्टस्योद्देश्यत्वानंगीकारात् उद्गीथावयवत्वविशिष्टप्रणवोपासनाविधेरंगीकारात् तस्य चा'ग्नये पावकाय पुरोडाशमष्टाकपालं निर्वपे' दित्यत्र पावकत्वविशेषिताग्निदेवताविशिष्टयागविधिवदुपपत्तेः। वस्तुतस्तु 'ओमित्येतदक्षरमुद्गीथमुपासीते' त्यत्र नोपासनाविधिः। 'आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते' इत्यत्र रसतमत्वादिगुणकोपासनाविधिः, अग्रिमखण्डे प्राणदृष्टिविशेषोपासनाविधिरित्येवमादिक्रमेण प्रत्येकमुपासनाविधीनां सद्भावात्। न च ते सर्वेऽप्यधिकारविधयः सर्वसाधारणोऽयमुत्पत्तिविधिः स्यादिति वाच्यम्। तथा सत्युत्पत्तिविध्यैक्येन एकस्या एवोद्गीथविद्यायाः फलभेदेन गुणभेदेन च ज्योतिष्टोमरीत्या प्रयोगावृत्तिमात्रमित्यापत्तेः। न चेष्टापत्तिः। 'परोवरीयस्त्वादिव' दिति पूर्वाधिकरणसूत्रांशेन परोवरीयस्त्वहिरण्मयत्वादिदृष्टिविशिष्टोद्गीथविद्यानां परस्परभेदस्य दर्शितत्वात्। किं तु तत्र वक्ष्यमाणोपासनानिकुरुंबविषयमोंकारमनूद्य तस्योद्गीथावयवत्वविधानपरम्। ओंकारो हि सर्ववेदव्यापी क्रतुषु चाध्वर्यवहौत्रादिमन्त्रव्यापी। उद्गीथावयवस्यैवोंकारस्योपास्यत्वं यथा स्यादित्येवमर्थं तत्प्रतिपादनम्। एतत्सिद्धस्यैवोद्गीथावयवत्वस्याग्रिमसमानाधिकरणनिर्देशैरनुवादः। न च वक्ष्यमाणोपासनाविषयत्वेनाक्षरानुवादे विशिष्टोद्देशप्रयुक्तवाक्यभेदापत्तिः। अक्षरमात्रानुवादेऽपि तस्य प्रकरणप्राप्तोपासनासंबंधानुवादार्थं 'उपासीते'ति निर्देशः 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त' इत्यत्र यथाश्वरशनाग्रहणोद्देशेन मंत्रविधौ विशिष्टोद्देशदोषापत्तेः केवलमश्वोद्देशेन मन्त्रविधौ सति रशनाग्रहणप्रकाशकस्य मन्त्रस्य साक्षादश्वार्थत्वासंभवात्तदीयरशनाग्रहणद्वारकत्वं पर्यवस्यतीति 'अभिधानीमादत्त' इत्यंशस्सामर्थ्यसिद्धानुवादार्थ इत्युपपत्तेः। एतेनैव 'य एवायं मुख्यप्राणस्तमुद्गीथमुपासांचक्रिर' इत्यग्रिमखण्डे यथोद्गीथे प्राणदृष्टिविधिः एवमिहाप्युद्गीथे प्रणवदृष्टिविधिरस्तु। न च फलनिर्देशाभावादुपासनाविध्यंतरं न संभवतीति शंकनीयम्। विशिष्य फलनिर्देशरहितानामंगावबद्धोपासनानां क्रतुवीर्यवत्तरत्वरूपसाधारणफलेनैव फलाकांक्षाशान्तेरिति निरस्तम्। दृष्टिविधौ सारूप्यस्यैवापेक्षितत्वेन 'ओमिति ह्युद्गायतीति' संबंधप्रतिपादकवाक्यशेषानुपपत्तेः 'खल्वेतस्यैवाक्षरस्योपव्याख्यान' मित्यस्यासामञ्जस्यप्रसंगाच्च। तस्मा 'दोमित्ये-

(१) 'उद्गीथावयवत्वविशेषितप्रणवविशिष्टोपासनाविधे'रिति. क. ग. पाठः।

**प्रणवो विशेष्यत इति प्राणविषयत्वमेव समञ्जसम् । अतः प्रणव एवोपास्यः ॥**

**इति व्याप्त्यधिकरणम् ॥ ४ ॥**

## अथ सर्वाभेदाधिकरणम् ॥ ५ ॥

## सू ॥ सर्वाभेदादन्यत्रेमे ॥ १० ॥

**'यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च' इति छन्दोगा वाजिनश्च प्राणविद्यायां ज्येष्ठत्वादिकमधीयते**

---

तदक्षरमुद्गीथ' मिति वाक्यमग्रिमविद्यासूपास्यस्य प्रणवस्योद्गीथावयवत्वविशेषणसमर्पणार्थमिति न्याय्यः पन्थाः । सूत्रे 'व्याप्ते' रित्यनेन प्रणवस्योत्तरग्रन्थे विशेषणविशेष्यभावनियामिका व्याप्तिर्यथोच्यते तथा प्रणवस्य विशेषनिर्धारणाय विशेषणापेक्षापादिन्याध्वर्यवादिमन्त्रव्याप्तिरपि हेत्वंतरत्वेनोच्यत इति तत्समुच्चयार्थश्चकारः । इति व्याप्त्यधिकरणम् ॥४॥

## अथ सर्वाभेदाधिकरणम् ॥ ५ ॥

**सू ॥ सर्वाभेदादन्यत्रेमे ॥ १० ॥** प्राणविद्यायां विचारं प्रवर्त्तयिष्यन् विषयशुद्ध्यर्थं विषयवाक्यमुपन्यस्य तत्प्रतिपाद्यं दर्शयति–यो हवा इति ॥ ज्यैष्ठ्य वयःकृतम् । मुख्य-

---

## नयमणिमालायाम्

### अथ व्याप्त्यधिकरणम् ॥ ४ ॥

**सू० ॥ व्याप्तेश्च समञ्जसम् ॥ ९ ॥**

ओमित्यत्रोपासनमुद्गीथप्रणवयोर्भवेत्तन्त्रम् । न तयोः किमपि नियामकमस्ति विशेषणविशेष्यत्वे ॥ २०७ ॥

प्रणवस्योपास्यतया यदुत्तरत्रापि लक्ष्यते व्याप्तिः । तस्मादुद्गीथं प्रति विषयता समुचिता तस्य ॥ २०८ ॥

**इति व्याप्त्यधिकरणम् ॥ ४ ॥**

## सूत्रार्थचन्द्रिकायाम्

### अथ व्याप्त्यधिकरणम् ॥ ४ ॥

**सू ॥ व्याप्तेश्च समञ्जसम् ॥ ९ ॥**

**भगवत्पादमते,** पूर्वम् 'ओमित्येतदक्षरमुद्गीथम्' इत्यत्रोंकारोद्गीथयोर्विशेष्यभावं सिद्धवत्कृत्य प्रक्रमभेदाद्विद्याभेदस्सिद्धान्तितः । स न युक्त इत्याक्षेपसंगत्येदमाह–**व्याप्तेश्चेति** । अत्र 'ओमित्येतदक्षरमुद्गीथम्' इत्योंकारोद्गीथयोस्सामानाधिकरण्यं श्रूयते । तत्किं नामब्रह्मेतिवदध्यासार्थम्, उत यद्रजतं सा शुक्तिरितिवदपवादार्थम् आहोस्वित्सिन्धुरः करीतिवदैक्यप्रमित्यर्थम्, उताहो नीलोत्पलमितिवद्विशेषणविशेष्यभावनिबन्धनम् । इति **संशयः** । निर्धारणे कारणाभावादनिर्धारितार्थकमिदमिति **पूर्वः पक्षः** । **सिद्धान्तस्तु,** ओंकारस्य ऋग्यजुःसामसु त्रिषु **व्याप्तेः** व्याप्तत्वात् क ओंकार उपास्य इत्यपेक्षायामुद्गीथावयवत्वेन ओंकारो विशेष्यते 'ओमित्येतदक्षरमुद्गीथमुपासीते'ति । एवं च उद्गीथमित्योंकारस्य विशेषणमित्येव **समञ्जसं**=निरवद्यम् । तुशब्दार्थकेन सौत्रचशब्देनाध्यासापवादादिपक्षाणां निरासः । अतः विशेषणपक्ष एव श्रेयान् इति ॥

**श्रीकण्ठमते, रामानुजमते च** 'ओमित्येतदक्षरमुद्गीथमुपासीते' त्यत्र प्रणवोद्गीथयोस्तन्त्रमुपासनमुतैकविषयमिति **संशयः** । अत्र प्रणवोद्गीथयोस्सामानाधिकरण्ये सत्यपि उद्गीथेन प्रणवो विशेष्यते वा प्रणवेन चोद्गीथो वेत्यत्र नियामकाभावात्तन्त्रमुपासनमिति **पूर्वपक्षः** । **सिद्धान्तस्तु,** न तन्त्रमुद्गीथप्रणवयोरुपासनम् । छान्दोग्ये 'ओमित्यक्षर' मित्युपक्रमवदुत्तरत्रापि 'एतस्यैवाक्षरस्योपव्याख्यानं भवति' इति प्रणवस्योपास्यत्वव्याप्तेरुद्गीथेन प्रणवो विशेष्यत इति प्रणवविषयत्वमेव समञ्जसम् । अतः प्रणव एवोपास्यः । इति ॥

**आनन्दतीर्थमते,** पूर्वोक्तमुपसंहारानुपसंहारयोरुभयोरपि कर्तव्यत्वं समञ्जसं न वेति **संदेहः** । परस्परविरोधादधिकारिभेदाभावाच्च न समञ्जसमिति **पूर्वपक्षः** । **'प्राप्तेश्च'** सूत्रपाठे विशेषः । **सिद्धान्तस्तु,** सर्वगुणोपसंहारे विरिञ्चस्य शक्तत्वेनाधिकारिभेदसद्भावात् पक्षद्वयस्य कर्तव्यत्वे विरोधाभावाच्च समञ्जसमिति । **सूत्रार्थस्तु, सू ॥ प्राप्तेश्च समञ्जसम् ॥ १० ॥** उपसंहारानुपसंहारयोः कर्तव्यत्वं समञ्जसं युक्तम् । कुतः । **प्राप्तेश्च**=तत्तद्योग्यपुरुषभेदेन तयोर्व्यवस्थितत्वादविरोधप्राप्तेश्चेत्यर्थः ॥

**इति सूत्रार्थचन्द्रिकायां व्याप्त्यधिकरणम् ॥ ४ ॥**

**कौषीतकिनश्च । त्रिभिरपि वागादिकरणग्रामस्थितेस्तत्कार्यस्य च प्राणहेतुत्वेनैकरूपेण प्राणस्य ज्यैष्ठ्यमुपपादितम् । वागादिगतवसिष्ठत्वादिसंबन्धित्वं प्राणस्योभयेषामुक्तम् 'अथ हैनं वागुवाच यदहं वसिष्ठास्मि त्वं तत् वसिष्ठोऽसीति अथ हैनं चक्षुरुवाच यदहं प्रतिष्ठास्मि त्वं तत् प्रतिष्ठासीति अथ हैनं श्रोत्रमुवाच यदहं सम्पदस्मि त्वं तत् सम्पदसीति अथ हैनं मन उवाच यदहमायतनमस्मि त्वं तदायतनमसीति' । कौषीतकिनां तु अनुक्तमपि वसिष्ठत्वादिकमुपसंहार्यं न वा ।**

प्राणो हि सर्वेषां प्राणानां मध्ये वयसाधिकः । गर्भस्थे पुरुषे प्राणस्य वृत्तिश्चक्षुरादिभ्यः पूर्वं लब्धात्मिका भवति । यथा गर्भो वर्धते । चक्षुरादीनां तु गोळकनिष्पत्तौ सत्यां वृत्तिलाभ इति श्रेष्ठो गुणैरधिकः । चक्षुरादिभ्यो गुणैराधिक्यं श्रुत्युक्तं भाष्यकार एवानुपदमुपपादयति—'ज्येष्ठश्च हवै श्रेष्ठश्च स्वानां भवती'ति वाजसनेयकपाठ इति विशेषः । स्वाः ज्ञातयः । कौषीतकिनश्चाधीयत इत्यनुषंगः । वसिष्ठत्वादिसंबंधित्वमिति । वागादिभिर्वसिष्ठत्वादिगुणानां यत्प्राणे समर्पणमुक्तं तेन प्राणस्य तद्गुणसंबंधित्वमुक्तं भवतीति भावः । उभयेषां छन्दोगवाजसनेयिनां शाखायामिति शेषः । यैर्वाक्यैरुक्तं तानि वाक्यानि दर्शयति—अथ हैनमित्यादिना । कौषीतकिनां त्विति । कौषीतकिनां शाखायां वागादीनां वसिष्ठत्वादिकं तस्य प्राणे समर्पणञ्चेत्युभयमपि नोक्तमित्यर्थः । अनुक्तमपीति । कौषीतकिशाखागतैवंशब्दाद्विद्यैक्याच्च संशयः । स्यादेतत् । चोदनाद्यविशेषेण शाखात्रयेऽपि विद्यैक्यादुपसंहाराधिकरणन्यायेन वसिष्ठत्वाद्युपसंहार्यं प्राप्नोति । कोऽत्रानुपसंहार्यत्वशंकावकाशः । न च क्वचिद्वसिष्ठत्वाद्यनाम्नानाद्विद्याभेदश्शंकनीयः । विद्यैक्ये सत्यनाम्नातगुणानामुपसंहारन्यायतः प्राप्तेः । अनाम्नातगुणोपसंहारार्थमेव हि सर्वत्र विद्यैक्यसाधनम् । ननु फलभेदाद्विद्याभेदः स्यात् । छंदोगवाजसनेयिशाखयोर्ज्यैष्ठ्यादिकं फलमुक्तम् । कौषीतकिशाखायां तु 'अथो एवैवं विद्वान्सर्वेषां भूतानां प्राणमेव प्रज्ञात्मानमभिसंभूय सहैतैस्सर्वैरस्माच्छरीरादुत्क्रामति स वायुप्रतिष्ठ आकाश आत्मा स्वरेति यत्रैते देवास्तत्प्राप्य तदमृतो भवति यदमृता देवा' इति प्राणदेवतासायुज्यं फलमुक्तम् । न चामृतत्वं चिरकालावस्थायित्वरूपं ज्यैष्ठ्यान्तर्गतं प्राणदेवतासमानैश्वर्यं श्रैष्ठ्यान्तर्गतमिति नास्ति फलभेद इति वाच्यम् । वाजसनेयिशाखायां स्वानामिति विशेषणेन ज्यैष्ठ्यश्रैष्ठ्ययोरैहिकफलत्वावसायात् । छांदोग्ये तद्विशेषणभावेऽपि समानप्रकरणगतवाक्यानुसारेण छांदोग्य एव 'वसिष्ठो ह स्वानां भवती'त्यग्रिमवाक्यगतविशेषणानुसारेण च तादर्थ्यप्राप्तेरिति चेन्मैवम् । वाजसनेयिशाखायां 'ज्येष्ठश्च श्रेष्ठश्च स्वानां भवती' त्येतदनन्तरमपि च 'य एषां बुभूषति य एवं वेदेति' वाक्येनान्येषामपि येषां ज्येष्ठश्च भवितुमिच्छति तेषामपि ज्येष्ठः श्रेष्ठश्च भवती' त्युक्तत्वेन फलतः फलैक्यपर्यवसानात् । तदनंतरं यो ह वै प्रतिष्ठां वेद प्रतितिष्ठत्यस्मिंश्च लोकेऽमुष्मिंश्च यो हवै संपदं वेद सं ह वास्मै कामाः पद्यन्ते दैवाश्च मानुषाश्चे'ति छांदोग्ये साक्षादेवैहिकफलवदामुष्मिकफलस्याप्युक्तत्वाच्च । यद्यपि तत्र चक्षुःश्रोत्रगतप्रतिष्ठात्वसंपत्त्वानुसंधानफलमुक्तं, तथापि प्राणश्रैष्ठ्यनिर्धारणानंतरं चक्षुःश्रोत्राभ्या स्वगुणयोस्तयोः प्राणे समर्पितस्योक्तत्वेन तत्साफल्याय प्राणगतप्रतिष्ठात्वाद्यनुसंधानफ-

**इति संवादे 'य एवं विद्वान्' इत्येवंशब्देन सन्निहितोक्तगुणानामेवावधारणा-न्नोपसंहार्यम् ॥**

---

लतया विपरिणममानं तत्प्राणविद्याफलमेव पर्यवस्यतीत्याशंक्य पूर्वपक्षमुपपादयति—य एवं विद्वानिति । अयमाशयः । एवंशब्दस्सन्निहितं परामृशति । शाब्दश्च सन्निधिश्शा-ब्दानुभवेऽपेक्ष्यते[1] । तेन यथा मधुरायामध्यापकत्वेन दृष्टस्य चैत्रस्य माहिष्मत्यां दर्शने सोऽयमिति प्रत्यभिज्ञाप्रत्यक्षेण प्रागनुभूतमध्यापकत्वमपि सहानुसंधीयते न तथा ज्येष्ठ-त्वादिगुणकप्राणस्य शाखान्तरे वसिष्ठत्वादिनावगतस्य कौषीतकिशाखायां दर्शने तज्जन्येन शब्दानुभवेन वसिष्ठत्वादिकमपि विषयीक्रियत इति वक्तुं शक्यम् । प्रत्यभिज्ञाप्रत्यक्ष इव शाब्दानुभवे शब्दसमर्पितैकविषये संस्कारेण स्मृत्या वोपनीतस्याविषयत्वात् । न हि वस्तुतः प्रागध्यापकत्वेनानुभूतेऽपि चैत्रे चैत्र इहागत इति केनचिदुक्ते तज्जन्यं शाब्दज्ञानमप्यध्या-पकत्वं विषयीकरोति । ननु तथापि कौषीतकिशाखायां शब्दावगम्यमाने ज्येष्ठत्वादिगु-णके प्राणे 'विमतमिदं कौषीतकिवाक्यं वसिष्ठत्वादिगुणकप्राणोपासनाविषयम् । ज्येष्ठत्वा-दिगुणकप्राणोपासनाविषयत्वात् । छांदोग्यादिवाक्यव' दित्यनुमानतः प्राप्तिर्भवेदिति चेत् सत्यम् । एवमनुमानतो गुणांतरयुक्तस्यापि प्राणस्येहोपास्यत्वप्रसक्तौ तद्वारणार्थमेवैव-मिति विशेषणम् । यथा आध्वर्यवादिमंत्रगतप्रणवस्याप्युपास्यत्वप्रसक्तौ तद्वारणार्थमुद्गी-थविशेषणम् । अतस्सत्यपि विध्यैक्ये वसिष्ठत्वादिकमेवंशब्देन निरुद्धं नोपसंहर्तव्यम् । नन्वव्यभिचरितजुहूपस्थापितस्य क्रतोरशाब्दस्यापि पर्णमयीवाक्यार्थान्वयो दृष्टः । एवमव्यभिचरितप्राणविद्यारूपप्रधानोपस्थापितस्य शाखान्तराम्नातांगजातस्याशाब्दस्या-प्येवंशब्देन परामर्शः स्यात् । किमिति तस्य तन्निवारकत्वं कल्पनीयमिति चेत् विषमो दृष्टान्तः । पर्णताया लौकिकजुह्वाकृत्यर्थत्वे वैयर्थ्यं स्यादिति जुहूपदस्य जुहूसंबंधिनि क्रतौ लक्षणा कल्प्यत इति तत्र नाशाब्दस्य वाक्यार्थान्वयः । इह कस्य वैयर्थ्यपरिहाराय कस्य पदस्य शाखान्तराम्नातगुणजाते लक्षणा कल्पनीया येन तस्य शाब्दत्वं समर्थ्येत । स्यादेतत् । कौषीतकिशाखायामपि प्राणस्य वसिष्ठत्वादिकं प्रतिपादितमेव । तदेव हि तस्य वसिष्ठत्वादिकं यद्वागादिगतवसिष्ठत्वादिहेतुत्वम् । वागादिगतं च वसिष्ठत्वादिकं तत्तत्का-र्यकरणसामर्थ्यमेव । अतो यदहं वसिष्ठास्मि स्वकार्यकरणसमर्थास्मि त्वं तद्वसिष्ठोऽसि मत्सामर्थ्यस्य त्वदधीनत्वात् तवैव तत्सामर्थ्यमित्यर्थः । इदं च वागादिगतकार्यकरणसा-मर्थ्यनिमित्तत्वं प्राणस्य वागादीनां प्राणाधीनकार्यत्वोपपादनेनैव कौषीतकिशाखायामपि सिद्धमिति चेत् मैवम् । तस्यां वागादीनां प्राणाधीनकार्यत्वमेव न प्रतिपादितं यदंतर्ग-ततया वसिष्ठत्वादिप्रतिपादनसिद्धिराशंक्येत प्रत्युत छांदोग्यबृहदारण्यकवैपरीत्येन तेषां प्राणादिनिरपेक्षकार्यत्वमेव तस्यां प्रतिपादितं दृश्यते । तत्र ह्येवं प्राणविद्यायामुपाख्या-यते—'अथातो निःश्रेयसादानं सर्वा वै देवता अहंश्रेयसे विवदमाना अस्माच्छरीरादुच्चक्र-मुस्तद्दारुभूतं शिश्ये, अथैनद्वाक्प्रविवेश तद्वाचावदच्छिश्य एव, अथैनच्चक्षुः प्रविवेश तद्वाचावदच्चक्षुषा पश्यच्छिश्य एव, अथैनच्छ्रोत्रं प्रविवेश तद्वाचावदच्चक्षुषा पश्यच्छ्रोत्रेण शृण्वच्छिश्य एव, अथैनन्मनः प्रविवेश तद्वाचावदच्चक्षुषा पश्यच्छ्रोत्रेण शृण्वन्मनसा

---

( १ ) 'शाब्दानुभवमपेक्षते' इति. क. पाठः ।

इति प्राप्ते ब्रूमः—अनुक्तमपि वसिष्ठत्वादिकमुपसंहार्यमेव, एवंशब्देनानुक्तगुणानामप्युक्तगुणवत् परामर्शात्, प्राणस्य गुणिन एकत्वेन गुणानामपि बुद्धिस्थत्वात्। यथा देवदत्तो मथुरायामध्यापयन् दृष्टः पुनर्माहिष्मत्यामनध्यापय-

---

ध्यायच्छिद्रस्य एव अथैनत्प्राणः प्रविवेश ततत एव समुत्तस्था' विति। अत्र सह शरीरादुत्क्रांतेषु सर्वेषु प्राणेषु मुख्यप्राणप्रवेशात्प्रागेव शरीरं प्रविष्टानां वागादीनां मुख्यप्राणनिरपेक्षमभिवदनादिकार्यकारित्वं स्पष्टमेवोक्तम्। भाष्ये तु 'त्रिभिरपि वागादिकरणग्रामस्थिते'रित्यादिकमुपाख्यानगतार्थो यथा तथा वा भवत्वित्यनादरेणोक्तम्। अस्तु वा कौषीतकिशाखायामपि वागादीनां प्राणाधीनस्वकार्यत्वं कथंचित्सूचितमित्येतत्। तावता प्राणे वागादिगतकार्यकरणसामर्थ्याधायकत्वमात्रं श्रैष्ठ्योपपादकत्वेनानुसंधेयं सिध्यति न तु विशिष्य तद्गतवसिष्ठत्वादिनिमित्तत्वमपि। न च वागादिषु तत्तत्कार्यकरणसामर्थ्यसामान्यमेव वसिष्ठत्वादिकमिति वाच्यम्। वाचो वसिष्ठत्वं वाग्मिनः सद्व्यवहारजननेन वसुमत्तमत्वसंपादकत्वं चक्षुषः प्रतिष्ठात्वं चक्षुष्मतस्समविषमभूतलादिप्रदर्शनेन प्रतिष्ठासंपादकत्वं श्रोत्रस्य सम्पत्त्वं वेदशास्त्रतदर्थश्रवणादिसंपादनेन सम्पत्करत्वं मनस आयतनत्वं सन्निहितस्रक्चंदनादिविषयज्ञानरूपभोगायतनत्वमिति छांदोग्यवाजसनेयकयोर्वसिष्ठत्वादिवेदनफलकीर्तनानुगुण्येन 'चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति श्रोत्रेण हीमे सर्वे वेदा अभिसम्पन्ना' इति वाजसनेयगतवाक्यशेषानुसारेण चावगमात्। न च सामान्यानुसंधाने तदंतर्गतयावद्विशेषानुसंधाननियमोऽस्ति। तन्नियमसत्त्वे च वागादिदोषेणैव पापिष्ठत्वादेरपि प्राप्तेस्तस्याप्यत्रानुसंधेयत्वप्रसंगः। अशक्यं चानन्तकार्यव्यक्तीकरणसामर्थ्यानुसंधानम्। अपि च ज्येष्ठत्वं कौषीतकिशाखायां प्राणस्य सर्वथैव नाम्नातम्। तस्यां तत्संग्रहे का गतिः। तस्मादेवंशब्देन निवारितं ज्येष्ठत्ववसिष्ठत्वादिकं नोपसंहार्यमिति। ननु छांदोग्ये तावदुद्गीथविद्यास्तोभाक्षरविद्यासमस्तसामविद्याप्रपञ्चेषु मधुविद्यागायत्रीविद्याज्योतिर्विद्यापुरुषविद्यासु मनोब्रह्मेत्यादिविद्यासु संवर्गविद्याषोडशकलविद्योपकोसलविद्याप्राणविद्यापञ्चाग्निविद्यावैश्वानरविद्यादिषु प्रायेण फलवाक्येषु एवंशब्दः श्रूयते। एवं बृहदारण्यकगतविद्यास्वपि तासु सर्वास्वपि शाखान्तरगतगुणोपसंहारो न स्यात्। किं बहुना। कर्मकाण्डेऽपि 'य एवं विद्वान्पौर्णमासीं यजते' 'य एवं विद्वांसः पंचदशरात्रमासत' इत्यादिवाक्येष्वेवंशब्दः कर्मैक्यात् शाखान्तरतः प्राप्तानां गुणानां वेदनविचारणद्वारा तदुपसंहारनिराकरणार्थः स्यादिति कर्मस्वपि सकलांगोपसंहारो न स्यादिति चेदस्तु नाम। पूर्वपक्षिणः किं हीयते। न हि प्राणविद्यामेवाधिकृत्येदमधिकरणं प्रवृत्तं किं तु ब्रह्मविद्यासूपसंहार्यानुपसंहार्यविभागे न्यायं दर्शयितुं प्राणविद्या केवलं लक्षीकृता। तथा च न्यायसाम्यात् ब्रह्मविद्यास्वेवंशब्दे सत्यपि एतदधिकरणसिद्धांतन्यायेनोपसंहारस्सिध्यन्प्रसंगात्कर्मस्वप्युपकरोतु। तस्मात्पूर्वपक्षिणो विषयान्तराणामप्यास्कन्दनं न दोषः। एवं प्राप्त इति। अत्रायमाशयः। फलपरवाक्याम्नातस्यैवंशब्दस्य शाखान्तराम्नातगुणनिवारणपरत्वमपि कल्पयितुं न युक्तम्। भिद्येत हि तदा वाक्यम्। न च फलसंयोगच्छांदोग्यादिशाखान्तरप्राप्तोऽनूद्यतां, वाक्यस्य गुणान्तरनिराकरण एव तात्पर्यमस्त्विति वाच्यम्।

---

(१) 'निराकरणपरत्वमेवास्त्विति' इति. ख. पाठः।

अप्यध्यापकत्वेन प्रत्यभिज्ञायते, तथा छान्दोग्यादिषु वसिष्ठत्वादिनोक्तः पुनरन्यत्र केवल उच्यमानोऽपि तद्गुणविशिष्टतया बुद्धिस्थो भवति। तत एवंशब्देन

छांदोग्यवाजसनेयकगतफलवाक्ययोरप्येवंशब्दार्थवशीकृततात्पर्ययोः फलविधिपरत्वासंभवात्। अतः सर्वास्वपि शाखास्वेवंशब्दोऽनुवाद इति तस्य स्वशाखाप्राप्तगुणमात्रानुवादकत्वेऽपि गुणान्तरनिवारकत्वाभावान्न विद्यैक्यप्रयुक्ते सर्वशाखाम्नातगुणोपसंहारे काचिदनुपपत्तिः। यथा प्राप्त्यनुवाद इति प्राणविद्यायां स्वशाखापरशाखाम्नातं यावद्गुणजातं प्राप्तं तस्य सर्वस्यानुवादक एवंशब्द इति कल्पनायामपि न काचिदनुपपत्तिः। न हि स्वशाखाम्नातमेव शाब्दं परशाखागतमशाब्दमिति वैषम्यमस्ति। शाब्दत्वेऽपि कौषीतकिशाखागतैवंशब्दार्थावगतिसमये शाखान्तराम्नातं गुणजातं शब्देन नोपस्थितमिति चेत् किं स्वशाखाम्नातं तत्पूर्वापरानेकवाक्यविहितं तथाशब्देनोपस्थितं तदानीमशाब्दमिति शब्दमूलप्रतिपत्त्यास्पदमेतत्प्रकरणाम्नातप्राणगुणत्वेन क्रोडीकृतमेवंशब्दगोचरः स्यादिति चेत् एवं तर्हि शाखान्तराम्नातमपि गुणजातमेतद्विद्यासंबन्धिप्राणगुणत्वेन क्रोडीकृतं तद्गोचरोऽस्तु। तदपेक्षयास्य क्रोडीकारस्य लघुत्वात् प्रकरणस्य प्रधानभूतविद्याघटितत्वात् यथा प्राप्त्यनुवादन्यायस्यासंकुचितविषयलाभाच्च। न हि स्वशाखाम्नातमेवानुवदितव्यं न त्वन्यशाखाम्नातमिति कुलधर्मः। मैत्रायणीयशाखायां प्रयाजाम्नानरहितायां 'मृतवो वै प्रयाजाः समानत्र होतव्या' इति तैत्तिरीयादिशाखाम्नातप्रयाजानुवाददर्शनात्। सन्निहितमात्रानुवादसंभवे दूरस्थितस्याप्यनुवादो न कल्पनीय इति चेत् दूरस्थितस्य स्वत एव बुद्धावपरिवर्तमानस्य कल्पनीयोपस्थितिकत्वे तथैव। इह तु विद्यैक्यात्तदीयत्वेन तत्तच्छाखाम्नातगुणवत्स्वत एव बुद्धौ विपरिवर्तमानस्य योग्यस्य परित्यागेन संकोच एव दोष इति भाष्ये 'यथा देवदत्त' इत्यादिना यथा देशकालव्यवहितस्याध्यापनस्य तद्धर्मिदर्शनेन बुद्धिस्थता तथेह शाखान्तरव्यवहितस्यापीत्येतावन्मात्रे दृष्टान्त उक्तः। न त्वशब्दोपस्थितस्य विषयत्वे इति न विरोधः। सूत्रस्य त्वयमर्थः। इमे वसिष्ठत्वादयः अन्यत्र कौषीतकिशाखायामप्युपसंहर्तव्याः। कुतः। सर्वासु शाखासु प्राणविद्याया अभेदात्। अभेदे च तया बुद्धिसन्निधापितस्य तस्याप्येवंशब्देन परामृष्टुं योग्यस्य प्रहाणे कारणाभावादिति। नन्विदमधिकरणं कौषीतकिनामुपनिषदि चतुर्थाध्याये य 'दथातो निःश्रेयसादान' मित्यारभ्य प्राणविद्याश्रवणं तत्र वसिष्ठत्वादिगुणोपसंहारनिर्णयार्थत्वेन किमित्यतिक्लेशेन योजितम्। तस्यां दशमाध्याये, यो ह वै ज्येष्ठञ्च श्रेष्ठञ्च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवती' त्यारभ्य यत्प्राणविद्याश्रवणं तत्र वसिष्ठत्वादिकगुणोपसंहारनिर्णयार्थत्वेन व्याख्यातुमुचितम्। तत्र हि छांदोग्यबृहदारण्यकरीत्यैव प्राणस्य ज्यैष्ठ्यश्रैष्ठ्यगुणकत्वं वागादीनां वसिष्ठत्वादिगुणकत्वं मुख्यप्राणस्य वागादीनां च श्रैष्ठ्यविषयपरस्परविवादेन ब्रह्मसभोपसर्पणं 'यस्मिन्नुत्क्रान्ते शरीरेंद्रियानवस्थितिः स श्रेष्ठ' इति ब्रह्मवचनं तत्परिचिक्षिषया वागादीनामेकैकस्य शरीरादुत्क्रम्य पर्यटनं तस्मिन्समये शरीरस्येंद्रियान्तराणाञ्च यथापूर्वमवस्थानं प्राणस्योत्क्रमणप्रवृत्तौ तेषां विशरणं ततो भीतानां वागादीनां 'मोत्क्रमीस्त्वं नः श्रेष्ठ' इति मुख्यप्राणं प्रति प्रार्थनमित्येतत्सर्वं क्रमेण वर्णितम्। प्राणे वागादिगतव-

(१) 'चिरकालव्यवहितस्य' इति. ख. पाठः। (२) 'सर्वं समञ्जसम्' इति. ख. पाठः। (३) 'प्राणस्य श्रेष्ठयावधारणमित्येतत्सर्वं' इति. क. पाठः।

**परामर्शाद्वसिष्ठत्वादिकमुपसंहार्यमिति ॥ इति सर्वाभेदाधिकरणम् ॥ ९ ॥**

सिष्ठत्वादिगुणसमर्पणमात्रं नोक्तं तद्विषयत्व एव भाष्यवाक्यानामाञ्जस्यमुच्यते । तत्रैवं- वेदनशब्दयुक्तफलवचनाश्रवणाद्भाष्ये पूर्वपक्षबीजत्वेनोक्ता युक्तिर्न प्रवर्तते । न च वाच्य- मेकशाखान्तर्गतप्रदेशद्वयाम्नातशाण्डिल्यविद्यान्यायेनात्र प्रदेशद्वयाम्नातप्राणविद्यैक्यसिद्धौ 'यो ह वै ज्येष्ठं चे' त्यादेर्विषयवाक्यत्वेऽपि 'अथातो निःश्रेयसादान' मित्यादिप्रदेशगतैवं- शब्दान्वयस्तत्र वक्तुं शक्यत इति । तथा सत्युपसंहाराधिकरणन्यायेन छांदोग्यबृहदारण्य- काम्नाततयापि प्राणविद्यैक्यसिद्धौ तदुभयाम्नातवासिष्ठ्यादिगुणानामप्येवंशब्दान्वयस्तथै- वोपपद्यत इति पूर्वपक्षयुक्तेरनवतारप्रसंगात् । न ह्येकशाखान्तर्गतप्रदेशान्तराम्नातगुणानां शाखान्तराम्नातगुणानां चासन्निधानाविशेषे विद्यैक्येन निमित्तेन एवंशब्दः पूर्वान्परा- मृशति नोत्तरानिति नियन्तुं शक्यते । तस्मा 'दथातो निःश्रेयसादान' मिति सन्दर्भा- म्नातैवंशब्दादन्यत्र प्राणविद्याम्नाताञ्श्रैष्ठ्यवासिष्ठ्यादिगुणान्न परामृशतीत्येव पूर्वः पक्षः कर्तुं युक्तः । एवमेव शाङ्करभाष्ये पूर्वपक्षो दृश्यत इति तथैवात्रापि भाष्यवाक्यानि नेत- व्यानि । सूत्रे 'समान एवञ्चाभेदा' दिति वक्तव्ये 'सर्वाभेदा' दिति वचनं यदेकशाखायां प्रदेशान्तरे शाखान्तरे वा समाम्नातं श्रेष्ठत्वादिगुणके प्राणोपासनं तेन सर्वेणा 'प्यथातो निः- श्रेयसादान' मित्यादिसन्दर्भाम्नातप्राणोपासनस्याभेदादित्यर्थपर्यवसितं न तु शाखान्तरा- म्नानतः प्रदेशान्तराम्नाने विशेषाभावं सूचयति । तेनेयं शङ्का व्यावर्तते । 'यो ह वै ज्येष्ठं च श्रेष्ठं चे' त्यारभ्य शाखाभेदेनाम्नातं सर्वमपि प्राणोपासनमेकमेव वैरूप्याभावादिति युक्तस्तत्र परस्पराम्नातगुणोपसंहारः । 'अथातो निःश्रेयसादान'मित्यादिसंदर्भाम्नातं तु ततो भिन्न- मेव । तत्र सर्वत्रापि वागादीनामेकैकस्योत्क्रमणे सत्यपि शरीरस्येंद्रियाणां च यथापूर्व- मवस्थानेन प्राणस्योत्क्रमणप्रसक्तौ तेषां शैथिल्यापत्त्या च प्राणस्य श्रैष्ठ्यनिर्द्धारणम् । इह प्राणसहितेषु वागादिषु सहोत्क्रांतेषु मृतकल्पतया शयितस्य शरीरस्य वागादिप्रवेशे तस्या- प्यनुत्थानतः प्राणप्रवेशमात्रेणोत्थानतश्च श्रैष्ठ्यनिर्धारणमित्युपाख्यानभेदादिति । शङ्का- व्यावर्तनप्रकारस्तु श्रैष्ठ्यं श्वशकुनिपर्यन्तसर्वप्राण्यन्नत्वमाचमनीयसलिलवासस्त्वमित्युपा- स्यगुणसारूप्ये सत्यनुपास्यगुणवैरूप्यं न भेदावहम् । सादृश्यनिर्णयार्थेषु मुख्यसादृश्यमेव स्वकार्यकरं न त्वमुख्यवैसादृश्यमिति । अयं न्यायोऽधिकरणान्तरे विवक्षितत्वादिह भाष्य- कृता नोद्धाटित इत्यलमतिविस्तरेण ॥ इति सर्वाभेदाधिकरणम् ॥ ९ ॥

## नयमणिमालायाम्

### अथ सर्वाभेदाधिकरणम् ॥ ५ ॥

सू० ॥ सर्वाभेदादन्यत्रेमे ॥ १० ॥

वासिष्ठ्यादि न कौषीतकिनां प्राणस्य वेदनेऽपेक्ष्यम् । तत्परिपठितगुणानामेवैवंशब्दविषयत्वात् ॥ २०९ ॥
शाखान्तरगतमपि तद्गुणिना प्राणेन बुद्धिमानीतम् । एवंशब्दार्थत्वं यातीत्युपहार्यमेवमत्रापि ॥ २१० ॥

इति सर्वाभेदाधिकरणम् ॥ ५ ॥

## सूत्रार्थचन्द्रिकायाम्

### अथ सर्वाभेदाधिकरणम् ॥ ५ ॥

सू ॥ सर्वाभेदादन्यत्रेमे ॥ १० ॥

**भगवत्पादमते,** पूर्वमोंकारस्य उद्गीथत्वविशेषणात्सर्ववेदव्याप्तिव्यावृत्तिवत् 'एवं विद्वा' निति प्रकृतगुणमात्रमाहैकैवं- शब्दाच्छाखान्तरगुणव्यावृत्तिरिति दृष्टान्तसंगत्येदमाह-**सर्वाभेदादिति** । अत्र वाजसनेयके छान्दोग्ये च प्राणविद्यायां

## अथानन्दाद्यधिकरणम् ॥ ६ ॥

### आनन्दादयः प्रधानस्य ॥ ११ ॥

अभेदादिति शेषः । 'सत्यं ज्ञानमनन्तं ब्रह्म' आनन्दो ब्रह्म' 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्' 'आकाशशरीरं ब्रह्म, सत्यात्म प्राणारामं मनआनन्दम्, शान्तिसमृद्धम्' इत्यादिष्वानन्दादयो गुणाः परविद्यासु प्रधानस्य ब्रह्मणः श्रूयन्ते। ते सर्वासु परविद्यासूपसंहार्या न वा ॥

इति संशये नोपसंहार्याः, ब्रह्मण एकस्यानन्दाद्यनेकगुणविशिष्टत्वेऽनेकत्वप्रसङ्गात्, विशेष्यभेदकत्वात्, अथवा-तत्रतत्रोक्तगुणमात्रेणापि तदुपासनसंभवात् इत्येवं प्राप्तेऽभिधीयते। गुणिनो ब्रह्मण एकत्वात् सर्वासु परविद्यासूपसं-

---

## अथ आनन्दाद्यधिकरणम् ॥ ६ ॥

सू ॥ आनन्दादयः प्रधानस्य ॥ ११ ॥ पूर्वसूत्रादपेक्षितांशानुवृत्तिं दर्शयति–अभेदादिति। सिद्धान्तसूत्रेऽस्मिन्नपेक्षितांशपूरणस्य सिद्धान्तोपक्रमस्य व्याख्यानसमये कर्तव्यत्वेऽप्यत्र तत्कारणं कार्याख्यानाधिकरणे करिष्यमाणस्य प्राणविद्याविषयविचारान्तरस्य पूर्वाधिकरणसंगतत्वात्ततः प्राङ्मध्ये विचारान्तरकरणमयुक्तमित्याशङ्कानिराकरणाय सौत्रपदानुवृत्तिलिप्सया मध्ये कृतमिति संगतिसूचनार्थम्। एवमेव हि जैमिनिना 'चिकीर्षया च संयोगा'दित्युपक्रान्तमहावेद्यधिकरणपूर्वपक्षसिद्धान्तमध्ये संयोगादित्यस्यानुवृत्तिलिप्सया 'तथा प्रधानेने'त्यैष्टिकिवेद्यधिकरणपूर्वपक्षसूत्रं कृतम्। आनंदादीनां ब्रह्मगुणानां सकलेतरविलक्षणत्वेन प्रतीतावुपयोगानुपयोगाभ्यां संशये पूर्वः पक्षः। आनन्दादयः सर्वासु विद्यासु किमर्थमुपसंहार्याः किमेते सकलेतरविलक्षणब्रह्मस्वरूपप्रतीत्यनुबंधिन इति तत्प्रतीत्यर्थमुपसंहार्याः उत विद्योपकारार्थम्। नाद्यः। घटत्वादिवदेकस्यैव स्वरूपनिरूपकधर्मस्य सकलेतरविलक्षणधर्मिस्वरूपप्रतीतिसाधनत्वेन तावद्गुणोपसंहारवैयर्थ्यात्। न च ब्रह्मणस्तावन्तोऽपि गुणाः स्वरूपनिरूपकाः। स्वरूपनिरूपकधर्मानेकत्वे घटपटादिरीत्या ब्रह्मणोऽप्यनेकत्वप्रसंगात्। लोकवेदयोरेकस्मिन्धर्मिण्यनेकधर्मसमावेशस्य बहुलमुपलंभेऽपि स्वरूपनिरूपकासाधारणधर्मभेदे धर्मिभेदस्य नियतत्वात्। न द्वितीयः। तत्तद्विद्याप्रकरणाम्नातगुणैरेव विद्योपकारसिद्धेः। अन्यथा विद्याभेदेऽपि केषाञ्चिद्गुणानामुपसंहारे विनिगमनाविरहात्सर्वगुणानामपि पारिप्लवत्वप्रसंगात्। इति। सिद्धान्तस्तु–नित्यानपायिज्ञानानन्दादि-

---

वागादयो वसिष्ठत्वादिगुणाः श्रूयन्ते न कौषीतक्यादिशाखासु। तत्र किं वसिष्ठत्वादिगुणाः अन्यत्रोक्ता अन्यत्र नोपसंहर्तव्या उतोपसंहर्तव्या इति **संदेहः**। नोपसंहर्तव्या इति **पूर्वपक्षः**। **सिद्धान्तस्तु**, **अन्यत्र**=वसिष्ठत्वादिगुणानामश्रवणस्थले। **इमे**=वसिष्ठत्वादयो गुणा उपसंहर्तव्याः। कस्मात्। **सर्वाभेदात्**=सर्वासु शाखासु प्राणसंवादस्थायाः प्राणविद्यायाः अभिन्नत्वात्। अत एव प्रकृतगुणानामिवाप्रकृतगुणानामपि बुद्धिस्थतयैवंशब्दग्राह्यत्वात्सर्वे सर्वत्रोपसंहर्तव्या इति सिद्धम्॥

**श्रीकण्ठमते**, तथा **रामानुजमते** च सर्वं संदेहपूर्वपक्षादिकमविशिष्टं पूर्वस्मादिति न तत्प्रतन्यते।

**आनन्दतीर्थमते**, उभयोः कर्तव्यत्वस्याधिकारिभेदेन व्यवस्थितौ अल्पगुणोपासकानामपि मुक्तिसत्त्वे सर्वगुणोपासनं केषांचिद्व्यर्थं न वेति **संदेहः**। व्यर्थमिति **पूर्वपक्षः**। **सिद्धान्तस्तु**, सर्वगुणोपसंहारेणोपासकानां ब्रह्मादीनामुत्तमफलभाक्त्वेन फलतारतम्यसंभवान्न व्यर्थमिति। **सूत्रार्थस्तु**, सू॥ **सर्वाभेदादन्यत्रेमे** ॥ ११ ॥ **इमे**=सर्वगुणोपसंहर्तृब्रह्मादयः **अन्यत्र**=तदनुपसंहर्तृभ्योऽन्यत्र तत्फलविलक्षणमहाफले भवन्ति। तद्भाजो भवन्ति। कुतः। **सर्वाभेदात्**=सर्ववेदोक्तगुणानामविभागेनोपसंहर्तृत्वेनोपासनादित्यर्थः। **इति सूत्रार्थचन्द्रिकायां सर्वाभेदाधिकरणम्** ॥ ५॥

हार्या आनन्दादयः। नीलो धवलो रक्तः खण्डः पूर्णश्रृङ्ग इत्यादीनां विरुद्धधर्माणामेव धर्मिभेदावहत्वम्, न तु नीलं सुगन्धि महदुत्पलमित्यत्र नीलिमादीनाम्। अतो ब्रह्मणो गुणानामविरोधान्न भेदावहत्वम्। तस्माद्गुणिनो ब्रह्मणः सर्वत्राभेदादुपसंहार्या आनन्दादय इति ॥ इत्यानन्दाद्यधिकरणम् ॥ ६ ॥

## अथ प्रियशिरस्त्वाधिकरणम् ॥ ७ ॥

## सू ॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

'तस्य प्रियमेव शिरः' इत्यादौ प्रियशिरस्त्वादयो ब्रह्मधर्मत्वेन श्रूयन्ते।

गुणविग्रहविशेषवत्त्वं ब्रह्मणः स्वरूपलक्षणमित्युक्तं जन्मादिसूत्रे। न हि ब्रह्मविष्ण्वादिसकलेतरविलक्षणं ब्रह्म श्रृंगग्राहिकयानुभवारूढं भवति। यथा प्रकृष्टप्रकाशेन सकलग्रहनक्षत्रतारकादिविलक्षणश्चंद्रः तथाभूतस्वरूपलक्षणशालि ब्रह्मैकमेव सर्वासु विद्यासूपास्यमिति। चन्द्रदर्शने सर्वत्र प्रकृष्टप्रकाशानुवृत्तिवत् ज्ञानानंदादिगुणविग्रहविशेषानुवृत्तिस्सर्वास्वपि ब्रह्मविद्यासु भवेदेव। न च स्वरूपनिरूपकतद्धर्मभेदाद्धर्मिभेदश्शङ्कनीयः। न हि स्वरूपनिरूपकत्वं धर्माणां भेदकत्वे प्रयोजकं किं तु विरुद्धधर्मत्वं नीलत्वधवलत्वादिषु तथा दृष्टेः। अत एव 'यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान्ग्रहान्गृह्णीयात्' इति वाक्ये रथन्तरसामत्वरूपस्य सोमविशेषणस्य तद्विरुद्धबृहत्सामत्वरूपज्योतिष्टोमप्रयोगान्तरादेव भेदकत्वं न तु तदविरुद्धगायत्रमहायवादिसामयुक्तज्योतिष्टोमक्रतुसामान्याद्भेदकत्वमिति व्यवस्थापितं रथन्तराधिकरणे। इह श्रुतिप्रतिपन्नसमावेशानामुदाहृतगुणविशेषविग्रहविशेषाणां नास्ति विरोधशङ्का। अतस्सर्वास्वपि विद्यास्वेतेषामुपसंहारः कार्य इति ॥

॥ इति आनन्दाद्यधिकरणम् ॥ ६ ॥

## अथ प्रियशिरस्त्वाधिकरणम् ॥ ७ ॥

सू ॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥ प्रियादीनामानंदविशेषत्वात्तेषां शिरःप्रभृतिरूपत्वस्योपचयापचयाद्यापादकत्वाच्च संशयपूर्वपक्षज्ञानावान्तरविशेषसत्यसंकल्पत्वादिवदानंदावांतरविशेषाः प्रियशिरस्त्वादयोऽप्युपसंहर्तव्याः। न च प्रियादीनामानंदभेदत्वेऽपि तेषां शिरस्त्वात्मत्वादिकं विद्याविशेषे ब्रह्मणो निरतिशयानंदरूपत्व-

---

### नयमणिमालायाम्

### अथ आनन्दाद्यधिकरणम् ॥ ६ ॥

सू ॥ आनन्दादयः प्रधानस्य ॥ ११ ॥

आनन्दाद्या न गुणा स्समस्तविद्योपसंहार्याः। इतरगुणेभ्यस्तेषां व्यवस्थितेभ्यो विशेषः कः ॥ २११ ॥
धर्मिस्वरूप एते निरूपकाः खण्डमुण्डतादिवत्। इति चेत्तर्हि ब्रह्मानेकं प्रसज्यते खण्डमुण्डवदेव ॥ २१२ ॥
धर्मिनिरूपकभेदे निरूप्यभेदस्य नियतत्वात्। धर्मिणि धियमारूढे चैकेनान्यगुणवैफल्यम् ॥ २१३ ॥
मैवं ब्रह्मालौकिकमेकेन गुणेन न धियमारोहेत्। न च खण्डतादिवदिमे विरोधिनो येन धर्मिभेदः स्यात् ॥ २१४ ॥
तत्सच्चिदादिधर्मास्समस्तविद्योपसंहार्याः। एवं निखिलनरामरविलक्षणं ब्रह्म धीपदं भवति ॥ २१५ ॥
सदिति सकलप्रपञ्चाकारजुषा संगतं शक्त्या। चिदिति सकलावभासकमनस्समाख्यातबोधघनम् ॥ २१६ ॥
नित्यविभुसर्वभावात्त्रिविधपरिच्छेदलंघ्यनंतमिति। आनन्द इति तथायुतमनतिशयानन्दरूपया शक्त्या ॥ २१७ ॥
दिव्याद्भुततरविग्रहशोभि विरूपाक्षमित्युदितम्। तत्कृष्णपिंगलमिति प्रोक्तं शक्त्या तया धवलदेहम् ॥ २१८ ॥
आकाशशरीरमिति प्रथितं तच्छक्त्यभिन्नमित्येतत्। तस्यामेव तु रक्तिमत्प्राणाराममिति संकथितम् ॥ २१९ ॥
तामपि न बाह्यकरणैरुपभुंक्ते किं तु मनसैव। लीलैव तनुपरिग्रह इति मन आनन्दमित्युदितम् ॥ २२० ॥

### इति आनन्दाद्यधिकरणम् ॥ ६ ॥

तेऽप्यानन्दादय इव परविद्यासूपसंहार्या न वा ॥

इति संशये तेषामपि सत्यसंकल्पत्वादिवदुपसंहारे को विरोधः ।

इति प्राप्ते ब्रूमः—नास्ति प्रियशिरस्त्वादीनामुपसंहारः परविद्यासु, सत्यसंकल्पत्वादिवत् तेषां ब्रह्मगुणत्वाभावात् । उपसंहारे तेषां ब्रह्मणः सावयवत्वेनोपचयापचयप्रसक्तिः । भेदो हि प्रियशिरस्त्वादीनां स्वाभाविकत्वे ब्रह्मणो भवति । अतस्तेषां नोपसंहारः ॥

आनन्दादीनामिव सर्वज्ञत्वादीनां ब्रह्मस्वरूपान्तर्भूतगुणत्वादविरोध इत्याह—

सू ॥ इतरे त्वर्थसामान्यात् ॥ १३ ॥

इतरे सर्वज्ञत्वनित्यतृप्तत्वादयो ब्रह्मस्वरूपान्तर्गततया अर्थसामान्यात् सर्वत्रोपसंहार्याः । प्रियशिरस्त्वादीनामनन्तर्भावान्नोपसंहार इति ॥

इति प्रियशिरस्त्वाधिकरणम् ॥ ७ ॥

---

प्रतिपत्तिसौकर्यार्थं कल्पितं न तु तात्विकं ब्रह्मानंदस्य तत्वतः शिरःप्रभृतिरूपत्वे क्वचित्स्थौल्यं क्वचित्कार्श्यमिति तस्योपचयापचयप्रसंगादिति वाच्यम् । ब्रह्मानन्दरूपायाः परिणामिन्याश्चिच्छक्तेरुपचयापचययोः परिणामविशेषवृत्त्योरदोषावहत्वादिति । सिद्धांतस्तु, उपचयापचयौ शिरःपक्षपुच्छादिरूपतया स्थूलत्वकृशत्वरूपौ प्रसज्येयाताम् । तौ हि जडपरिणामेष्वेव संभवतो नानंदभेदेषु प्रियादिषु । आनंदमयस्य पुच्छत्वेन निरूपिताद्ब्रह्मणो भेदश्च प्रसज्यते । अतोऽन्नमयादीनामिवानन्दस्यापि शिरःप्रभृतिकल्पनामात्रमिति न तेषामुपसंहार इति । सूत्रे हेतुवाची हिशब्दः काकाक्षिन्यायेनोभयत्र संबध्यते । तथा चोपचयापचयप्रसंगात् भेदप्रसंगाच्चेत्यर्थः । सर्वज्ञत्वनित्यतृप्तत्वादिकं ज्ञानानन्दविशेषत्वेऽपि यदुपसंहार्यमभिमतं तत्र हेतुं प्रियशिरस्त्वादिवैषम्यं दर्शयितुमुत्तरसूत्रमवतारयति—आनंदादीनामिवेति । सू ॥ इतरे त्वर्थसामान्यात् ॥ १३ ॥ स्वरूपान्तर्गततया यथा ब्रह्मस्वरूपलक्षणतया तथा अर्थसामान्यात् अनपायित्वेन ब्रह्मरूपधर्मिसादृश्यात् । ननु किं यावदनपायि ब्रह्मणि धर्मजातं तत्सर्वं सर्वविद्यासूपसंहार्यम् ? नेति ब्रूमः । यद्ब्रह्मस्वरूपप्रतीत्यनुबंधि ज्ञानानंदादिकं यच्च मुक्तावुपासकेन प्राप्यं सर्वज्ञत्वसत्यकामत्वसत्यसंकल्पत्वाप्तकामत्वादिकं तत्सर्वमुपसंहार्यम् । तत्र प्रतीत्यनुबन्धिगुणजातस्योपसंहार्यत्वं पूर्वाधिकरणे वर्णितमिह मुक्तप्राप्यगुणजातस्योपसंहार्यत्वं वर्णितं तदेतदर्थसामान्यादित्यस्य मुक्तानां ब्रह्मणा सह गुणाष्टकाविर्भावादिफलसाम्यादित्यर्थान्तरगर्भीकारेण विवक्षितम् । इदश्चाग्रिमाधिकरणे 'तदनुसंधाननैरंतर्याद्धि तत्सारूप्यापत्तिर्मुक्तिः अतो यथोपासनं फल'मिति भाष्यकृदेव स्पष्टयिष्यति ॥ इति प्रियशिरस्त्वाधिकरणम् ॥ ७ ॥

नयमणिमालायाम्

अथ प्रियशिरस्त्वाधिकरणम् ॥ ७ ॥

सू० ॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥ इतरे त्वर्थसामान्यात् ॥ १३ ॥

जीवस्यानंदभिदाः किं न स्युः प्रियशिरस्त्वाद्याः । नैव ब्रह्मगुणास्ते सावयवं ब्रह्म हि तथा स्यात् ॥ २२१ ॥

ज्ञानानन्दविशेषा ये त्वितरे स्युः शिवागमेऽपि मिताः । सार्वज्ञ्यतृप्तिमुख्यास्संग्राह्यास्तासु तेऽथैक्यात् ॥ २२२ ॥

इति प्रियशिरस्त्वाधिकरणम् ॥ ७ ॥

## सूत्रार्थचन्द्रिकायाम्

### अथ आनन्दाद्यधिकरणम् ॥ ६ ॥ ७ ॥

**सू ॥ आनन्दादयः प्रधानस्य ॥ ११ ॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥ इतरेत्वर्थसामान्यात् ॥ १३ ॥**

**भगवत्पादमते,** अत्र निर्गुणश्रुतिषु आनन्दस्वरूपत्वादयो धर्माः क्वचित्क्वचिच्छ्रूयन्ते,. ते किं सर्वत्रोपसंहार्या उत नेति **संदेहः**। नोपसंहर्तव्या इति **पूर्वपक्षः**। **सिद्धान्तस्तु,** सर्वशाखासु वेद्यस्य ब्रह्मण एकत्वेन विद्याया एकत्वात् आनन्दस्वरूपत्वादयो धर्माः सर्वत्रोपसंहर्तव्या इति ।

ननु यदि ब्रह्मण एकत्वादानन्दाद्युपसंहारस्तर्हि प्रियशिरस्त्वाद्युपसंहारोऽपि स्यादित्याशंक्याह—**सू॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२॥ प्रियशिरस्त्वादिधर्माणां न सर्वत्र प्राप्तिः। हि**=यस्मात् प्रियमोदप्रमोदानन्दानां परस्परापेक्षया **उपचयापचयौ**=वृद्धिह्रासावनुभूयेते । तौ च धर्मिभेदे सत्येव स्वाभाविकौ भवतः । ब्रह्मणस्तु, निर्भेदत्वात् ।

ज्ञानोपयोगित्वादानन्दादीनां संयद्वामत्वादिधर्मेभ्यो वैषम्यमाह—**सू॥ इतरे त्वर्थसामान्यात् ॥ १३ ॥ इतरे तु**= उपास्यधर्मापेक्षया इतरे त्वानन्दादयो धर्माः ज्ञानैकफलास्सर्वत्रोपसंह्रियन्ते । कुतः । **अर्थसामान्यात्**=प्रतिपाद्यस्य ब्रह्मण एकत्वादित्यर्थः । अन्तरेण गुणोपसंहारं यावद्ब्रह्मस्वरूपविषयकमहावाक्यार्थज्ञानसाध्याया अविद्यानिवृत्तेरसंभवात्सर्वत्रानन्दादय उपसंहर्तव्या इति सिद्धम् ॥ **इत्यानन्दाद्यधिकरणम्** ॥ ६ ॥

**श्रीकण्ठमते,** "आनन्दादयः प्रधानस्य" इतीदमेकं सूत्रमानन्दाद्यधिकरणमितरत्सूत्रद्वयमधिकरणान्तरमिति भेदः। आनन्दाद्यधिकरणे परविद्यासु, प्रधानस्य ब्रह्मणः श्रूयमाणा, आनन्दादयो गुणाः सर्वासु परविद्यासूपसंहार्या न वेति **संशयः**। एकस्य ब्रह्मण आनन्दाद्यनेकगुणविशिष्टत्वे विशेषणानां विशेष्यभेदकत्वेनानेकत्वप्रसंगात्, तत्रतत्रोक्तगुणमात्रेणापि तदुपासनसंभवाच्च नोपसंहार्या इति **पूर्वपक्षः**। गुणिनो ब्रह्मण एकत्वात् 'नीलो धवल' इत्यादिविरुद्धधर्माणामेव धर्मिभेदावहत्वात् आनन्दादीनां ब्रह्मगुणानामविरोधेन 'नीलं सुगन्धि महदुत्पल' मित्यादौ नीलिमादीनामिव भेदानावहत्वाच्च सर्वासु परविद्यासूपसंहार्या आनन्दादय इति ॥ **श्रीकण्ठमते आनन्दाद्यधिकरणम्** ॥ ६ ॥

### अथ प्रियशिरस्त्वाद्यधिकरणम् ॥ ७ ॥

**सू ॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥** 'तस्य प्रियमेव शिरः' इत्यादयो ब्रह्मधर्मत्वेन श्रूयन्ते तेऽप्यानन्दादय इव परविद्यासूपसंहार्या न वेति **संदेहे** सत्यसंकल्पत्वादिवदुपसंहार्या एवेति **पूर्वपक्षः**। **सिद्धान्तस्तु,** प्रियशिरस्त्वादीनामुपसंहारो नास्त्येव परविद्यासु । सत्यसंकल्पत्वादिवत्तेषां ब्रह्मगुणत्वाभावात् । तेषामुपसंहारे ब्रह्मणस्सावयवत्वेनोपचयापचयप्रसक्तिः । प्रियशिरस्त्वादीनां स्वाभाविकत्वे भेदो हि ब्रह्मणो भवेत् । अतस्तेषां नोपसंहारः । आनन्दादीनामिव सर्वज्ञत्वादीनां ब्रह्मस्वरूपान्तर्भूतगुणत्वात्तेषामुपसंहारे न विरोध इत्याह—**सू॥ इतरे त्वर्थसामान्यात् ॥ १३ ॥ इतरे**=सर्वज्ञत्वनित्यतृप्तत्वादयो गुणास्तु अर्थसामान्यात्सर्वत्रोपसंहार्याः । प्रियशिरस्त्वादीनां तदनन्तर्भावान्नोपसंहारः इति ॥ **इति प्रियशिरस्त्वाद्यधिकरणम्** ॥ ७ ॥

**रामानुजमते तु,** 'आनन्दादय' इत्यादीनि सप्त सूत्राण्येकमधिकरणम् । तत्र ज्ञानानन्दामलत्वादयो ब्रह्मस्वरूपनिरूपकधर्माः सर्वासु परविद्यासूपसंहर्तव्या न वेति **संशयः**। अप्रकरणाधीतानामुपसंहारे प्रमाणाभावाद्ब्रह्मगुणानामसंख्येयत्वेनोपसंहाराशक्तेश्च नोपसंहर्तव्या इति **पूर्वपक्षः**। **सिद्धान्तस्तु,** आनन्दादयस्सर्वासु परविद्यासूपसंहर्तव्याः । प्रधानस्य गुणिनो ब्रह्मणस्सर्वासु विद्यास्वभेदात् । 'सर्वाभेदा' दिति पूर्वसूत्रा'दभेदा'दित्येकदेशानुवृत्त्या लभ्यते ॥

**सू ॥ प्रियशिरस्त्वादीत्यादि ॥१२॥** आनन्दादीनां प्राप्तावपि प्रियशिरस्त्वादीनां ब्रह्मस्वरूपगुणत्वाभावादप्राप्तिरेव । ब्रह्मणः शिरःपक्षादिभेदे स्वरूपे सति ब्रह्मण उपचयापचयौ प्रसज्येयाताम् ॥

**सू ॥ इतरे त्वर्थसामान्यात् ॥ १३ ॥ इतरे तु**=आनन्दादयः । **अर्थसामान्यात्**=ब्रह्मस्वरूपसामान्यात्सर्वास्वनुवर्तन्ते ॥

ननु प्रियशिरस्त्वादीनां ब्रह्मस्वरूपधर्मत्वाभावे किमर्थं तदभिधानमित्यत आह—**सू ॥ आध्यानाय प्रयोजनाभावात ॥ १४ ॥** प्रयोजनान्तराभावादनुचिन्तनार्थं तदभिधानम् । वेदितव्यतयोपदिष्टमानन्दमयं ब्रह्म ध्यानार्थं तथा बुद्धावारोप्यत इत्यर्थः ॥

**सू ॥ आत्मशब्दाच्च ॥ १५ ॥** 'अन्योऽन्तर आत्मानन्दमय' इत्यात्मशब्दाच्च प्रियशिरस्त्वादयो न ब्रह्मस्वरूपधर्माः । शिरःपक्षादीनामात्मधर्मत्वाभावादित्यर्थः ॥

**सू ॥ आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥** 'अन्योऽन्तर आत्मे' त्यात्मशब्देन परमात्मन एव ग्रहणम्

## अथाध्यानाधिकरणम् ॥ ८ ॥

## सू ॥ आध्यानाय प्रयोजनाभावात् ॥ १४ ॥

**इह पूर्वोक्तानन्दमयात्मानुसन्धानवदन्नमयादीनामप्यनुसन्धानं नियतमस्ति न वेति संशयः ॥**

**अन्नमयादिसर्वान्तरस्यानन्दमयस्यान्नमयाद्यनुसंधानक्रममन्तरेण तदन्तरत्वेनानुसंधानायोगात् तेषामनुसंधानं नियतम् ॥**

## अथ आध्यानाधिकरणम् ॥ ८ ॥

**आध्यानाय प्रयोजनाभावात् ॥ १४ ॥** संगतिसूचनपूर्वकं संशयं दर्शयति–**इहेति।** 'स एको ब्रह्मण आनन्द' इत्यानंदवल्ल्यां श्रुतस्य निरतिशयानन्दस्य सर्वविद्यास्वनुसन्धेयत्वव्यवस्थापनादानंदमय आत्मा सर्वविद्यास्वनुसंधेय इति फलितम् । तदनुसंधाने तदीयं प्रियशिरस्त्वादिकमपि सर्वत्रानुसंधातव्यमिति शङ्का पूर्वाधिकरणे निराकृता । माभूदानंदमयसम्बन्धि शिरःपक्षादिकमनुसंधेयम् । आनन्दमयस्य यस्मिन्नन्नमयादिकोशचतुष्टये निगूढत्वमुक्तं तदनुसंधेयमेव तस्याकल्पितत्वादिति शङ्कानिराकरणार्थमेतदधिकरणमिति संगतिः । अन्नमयादिकीर्तनस्यानंदमयगतान्नमयादिसर्वांतरत्वरूपगुणानुसंधानार्थत्वानंदमयप्रतिपत्तिसौकर्यार्थत्वान्यतरानवधारणात्संशय इति भावः । **अन्नमयादीति ।** अयमाशयः । अन्नमयादिषूत्तरोत्तरस्य पूर्वपूर्वांतरत्वप्रतिपादनमानंदमयस्य सर्वांतरत्वरूपानुसं-

---

कुतः । 'आत्मावा इदमेक एवे' त्यत्र यथा परमात्मनो ग्रहणं तद्वत् । कथमिदमवगम्यते इति चेत् **उत्तरात्**='सोऽकामयत बहु स्या' मिति तदेकार्थादुत्तरवाक्यादित्यर्थः ॥

**सू ॥ अन्वयादिति चेत्स्यादवधारणात् ॥ १७ ॥** 'अन्योऽन्तर आत्मा प्राणमय' इत्यादिपूर्ववाक्येषु अनात्मस्वात्मशब्दान्वयात्कथमुत्तरवाक्यान्निर्णय इति चेत् 'तस्माद्वा एतस्मादात्मन आकाश' इति प्रकृतस्यात्मन एव आनन्दमयपर्यन्तेष्ववधारणात् स्यादेव निर्णयः । अतः प्रियशिरस्त्वादीनामनात्मधर्मत्वात् ज्ञानानन्दादीनामात्मस्वरूपनिरूपकधर्मत्वाच्च तेषामेव सर्वत्रोपसंहार इति ॥ **इति रामानुजमते आनन्दाद्यधिकरणम् ॥ ६ ॥**

**आनन्दतीर्थमते,** इमानि त्रीणि सूत्राणि त्रीण्यधिकरणानीति वेद्यम् । **सू ॥ आनन्दादयःप्रधानस्य ॥ १२ ॥** अत्र सर्वमुमुक्षूणां कियन्तो गुणाः नियमेनोपास्या इति यः कोऽपि गुणो नियन्तुं शक्यते वा न वेति **संदेहे** प्रमाणाभावान्न शक्यते इति **पूर्वपक्षः । सिद्धान्तस्तु, आनन्दादयः**=आनन्दो ज्ञानं सच्छब्दोदितं निर्दोषत्वं आत्मशब्दोदितं स्वामित्वं चेति चत्वारो गुणाः । **प्रधानस्य**=प्रधानफलस्य मोक्षस्यार्थे सर्वमुमुक्षूपास्याः। मोक्षस्य निर्दोषज्ञानानन्दरूपत्वात् । 'तं यथा यथोपास्ते' इति श्रुतेरित्यर्थः । आत्मत्वमपि तुरीये वक्ष्यमाणं संगृह्यते इति यावत् ॥ **इत्यानन्दाद्यधिकरणम् ॥६॥**

**सू ॥ प्रियशिरस्त्वादीत्यादि ॥१३॥** 'तस्य प्रियमेव शिरः'इत्यादिना श्रुताः प्रियशिरस्त्वादयोऽपि गुणाः **किं** सर्वमुमुक्षूपास्या वाच्याः उत नेति **संदेहः** । तेषामानन्दभेदत्वात्सर्वमुमुक्षूपास्या वाच्या एवेति **पूर्वपक्षः । सिद्धान्तस्तु,** सर्वेषां प्रियशिरस्त्वादिगुणोपासनयोग्यता नास्ति किं तु केषांचिदेव । कुतः । **हि**=यस्मात् । **भेदे**=निमित्तसप्तमी । फलभेदसिद्ध्यर्थम् । **उपचयापचयौ**=उपासने वृद्धिह्रासौ । तारतम्यमिति यावत् । अपेक्षितौ । तस्मादित्यर्थः ॥ **इति प्रियशिरस्त्वाद्यधिकरणम् ॥ ७ ॥**

**सू ॥ इतरे त्वर्थसामान्यात् ॥ १४ ॥** इह उक्तेभ्यश्चतुर्भ्य इतरे मध्यमगुणाः देवादिभिरुपासकैरुपसंहार्या वा न वेति **संदेहे** अनर्हगुणोपासनस्यानर्थफलत्वान्नोपसंहार्या इति **पूर्वपक्षः । सिद्धान्तस्तु, इतरे**=उक्तेभ्य आनन्दादिभ्यश्चतुर्भ्यः अन्ये मध्यमगुणाः । **अर्थसामान्यात्**=स्वस्वप्राप्यमोक्षरूपफलसाम्यात् । तुशब्द एवार्थे । ल्यब्लोपे पञ्चमी । स्वगुरोरन्यस्माद्वा कुतश्चित्सर्वज्ञात् भाविस्वस्वमुक्तिफलस्वरूपज्ञानसंभवेन फलतारतम्यमपेक्ष्य इतरेऽपि मध्यमगुणा अप्युपसंहार्या एवेति ॥ **इति इतरगुणाधिकरणम् ॥ ८ ॥ सूत्रार्थचन्द्रिकायामानन्दाद्यधिकरणम् ॥ ६ ॥**

इति प्राप्तेऽभिधीयते—अन्नमयादीनामनुसंधानं न नियतम्, प्रयोजनाभावात् । तस्यानन्दमयब्रह्मसिद्धिर्हि प्रयोजनम् । अतस्तत्सिद्धिपर्यन्तमेवान्नमयादीनामनुसंधानमिति तेषामनियतमनुसंधानम् ॥

### सू ॥ आत्मशब्दाच्च ॥ १५ ॥

'एतमन्नमयमात्मानमुपसंक्रम्य' इत्यादिषु प्रत्येकमात्मशब्दादन्नमयादीनामन्नाद्यधिष्ठातृचेतनत्वमवगम्यते । ब्रह्मव्यतिरिक्तानां चेतनानां मुमुक्षुध्येयत्वनिषेधात् ध्यानकाले तेषां नानुसंधानम् । तथाऽथर्वशिखायाम् 'शिव एको ध्येयः शिवंकरः सर्वमन्यत् परित्यज्य' इति शिवव्यतिरिक्तानां मुमुक्षुध्येयत्वं निषिध्यते । ततोऽन्नमयादीनामनुसंधानानियमः ॥

### सू ॥ आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥

इह 'अन्योऽन्तर आत्माऽऽनन्दमयः' इत्यात्मगृहीतिः परमात्मविषया, न प्रत्यगात्मविषया, 'आत्मन आकाशः संभूतः' इत्यत्रात्मशब्दवत् । तदिदमुत्तरात् 'आनन्दमयमात्मानमुपसंक्रम्य' इत्येतस्मादवगम्यते । तस्मादानन्दमया-

---

धेयगुणप्रतिपादनार्थम् । तथा सत्येवैकवाक्यतालाभात् । आन्यपर्येण प्रवृत्तेऽपि वाक्ये अन्नमयादिवेदनफलवर्णनं भूमविद्यायां नामादिवेदनफलवर्णनमिव युक्तम् । अन्नमयाद्यान्तरत्ववेदनं च नान्नमयाद्यनुसंधानं विना शक्यते कर्तुम् । अतो यथा दहरविद्यायां ब्रह्मपुरमध्यवर्त्तिदहरपुण्डरीकाभ्यन्तरत्वेन ब्रह्मानुसंधानार्थं ब्रह्मपुरदहरपुण्डरीकानुसंधानं नियतं तथान्नमयाद्यनुसंधानमपि नियतमेव । न चान्नमयादयो देवताविशेषा येन देवतान्तराणां मुमुक्षुध्येयत्वनिषेधाच्छिवस्य सर्वोत्तरत्वप्रतिपत्तिसौकर्यार्थमेवान्नमयाद्यनुकीर्तनं न तु तदांतरत्वानुसंधानार्थमिति कल्प्येत । शरीरप्राणमनोविज्ञानात्मानो हि ते तत्तद्वाक्यतः प्रतीयंते । एवञ्चानंदमयस्य सर्वविद्यास्वनुसंधेयत्वे अन्नमयाद्यांतरत्वमपि सर्वत्रानुसंधेयम् । प्रधानानुसारित्वाद्गुणानाम् । यद्यपि विद्यान्तरेषु ब्रह्मप्रतिपत्त्यनुबंधित्वेनानंदमयत्वमात्रमनुसंधातव्यं स्यात्तथाप्यानंदमयविद्यायां प्रकरणपठितगुणत्यागायोगादन्नमयाद्यान्तरत्वानुसंधानार्थमन्नमयाद्यनुसंधानं नियतमिति । आनंदमयब्रह्मसिद्धिरिति । अन्नमयादिभ्य उत्कृष्टत्वेनानंदमयब्रह्मसिद्धिरित्यर्थः । तदेत 'दाध्यानाये'ति सौत्रपदसामर्थ्याल्लभ्यते । आभिमुख्येन ध्यानं ह्याध्यानम् । सर्वोत्कृष्टत्वसिद्धावेवात्यंतादरकृतेनाभिमुख्येन ध्यानं भवति । ननु किमिति प्रतिपत्तिसौकर्यमात्रार्थत्वमुच्यते, गुणानुसंधानार्थत्वमपि किमिति न स्यादिति शङ्कानिराकरणार्थं सूत्रम्—आत्मशब्दाच्च ॥ १५ ॥ अस्मिन्सूत्रे वक्तव्यं सर्वमानन्दमयाधिकरणतृतीयपक्षे भाष्ये व्यक्तं प्रतिपादितम् । ध्यानकाल इति । ध्यानात्पूर्वं शिवस्य ब्रह्मादिपरत्वदृढीकरणार्थमन्नमयाद्यनुसंधानमस्तु नाम । निरंतरशिवैकविषयचिन्तासन्ततिरूपध्यानकाले तु तन्न युक्तमित्यर्थः । नन्वात्मशब्दयोगेऽपि 'येऽन्नं ब्रह्मोपासत' इत्यादिषु ब्रह्मशब्दश्रवणेऽपि उपासनाप्राप्यदेवताविशेषत्वेऽपि यथान्नमयादीनामब्रह्मत्वं तथानंदमयस्यापि स्यादिति मन्दशङ्कानिराकरणार्थं सूत्रम्—आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥ आनन्दमयमात्मानमिति । तदनंतरमुपसंक्रमणीयान्तरानिर्देशान्मुक्तिफलस्य तत्प्राप्तावेव पर्यवसानात्तस्य परब्रह्मतावसीयत इति भावः ।

स्मानुसन्धानं मुख्यं ब्रह्मानुसंधानमिति ॥

## सू ॥ अन्वयादिति चेत् स्यादवधारणात् ॥ १७ ॥

अन्नमयादीनामप्यात्मशब्दान्वयात्परमात्मत्वेन तेषामप्यनुसंधानमविरुद्धमिति चेत्—न, 'अन्योऽन्तर आत्माऽऽनन्दमयः' इत्यानन्दमयस्य परमात्मनः शिवस्यान्नमयादिभ्यो भिन्नत्वावगमात् 'शिव एको ध्येयः शिवंकरः सर्वमन्यत् परित्यज्य' इति सकलेतरपरित्यागपूर्वकं शिवस्यैकस्यैव ध्येयत्वावधारणात् । अत्र हि निरस्तसमस्तकलङ्कतया निखिलमङ्गलभाजनतया च शिवशब्देन परं ब्रह्मोच्यते । यद्विरूपाक्षं कृष्णपिङ्गलं तदनुसंधाननैरन्तर्याद्धि तत्सारूप्यापत्तिर्मुक्तिः । अतो यथोपासनं फलमिति तद्व्यतिरिक्तानां शिवताशून्यानामनुसंधानं न शिवत्वापादकम् । अत आनन्दमयः शिव एक एवानुसंधेय इति ॥

इत्याध्यानाधिकरणम् ॥ ८ ॥

---

अभ्यासादिकं त्वानंदमयाधिकरणे प्रपञ्चितत्वान्नोपात्तम् । तर्ह्यात्मब्रह्मशब्दादिश्रवणादन्नमयादीनामपि ब्रह्मतास्तु । 'अन्योऽन्तर' इति भेदनिर्देशस्य 'ब्रह्म पुच्छं प्रतिष्ठे'ति पुच्छपुच्छवद्भावनिर्देशवदौपाधिकभेदविषयत्वोपपत्तेः । अन्नमयाद्युपासनाभिः क्रमप्राप्यस्थानभेदश्रवणस्य च परमशिवलोकान्तर्गतस्थानभेदविषयत्वोपपत्तेः इत्याशङ्कानिराकरणार्थं सूत्रम्–अन्वयादिति चेत्स्यादवधारणात् ॥ १७ ॥ आत्मशब्दान्वयादित्येतत् ब्रह्मशब्दान्वयस्याप्युपलक्षणम् । 'अवधारणा'दित्येतद्भिन्नत्वनिश्चयपरमिति व्याचष्टे–भिन्नत्वावगमादिति । आनन्दमयस्य ब्रह्मणश्च परब्रह्मत्वमानन्दमयाधिकरणोक्तन्यायैरविचलमिति पुच्छपुच्छवद्भावनिर्देशः कथंचिदौपाधिकविषयत्वेन योज्यते । नात्र तथा 'अन्योऽतर आत्मे'त्यस्य मुख्यार्थापरिग्रहे प्रमाणमस्ति । आत्मशब्दस्य देवताविशेषत्वादुपपत्तेः । ब्रह्मशब्दस्य पञ्चब्रह्ममन्त्रप्रसिद्धेषु ब्रह्मविष्णुरुद्रेन्द्रमहेश्वरेषूपपत्तेरिति भावः।'प्रयोजनाभावा'दिति प्रथमसूत्रोक्तमर्थं प्रपञ्चयति–'शिव एको ध्येय' इत्यादिना 'न शिवत्वापादक'मित्यन्तेन । इति आध्यानाधिकरणम् ॥ ८ ॥

---

### नयमणिमालायाम् अथ आध्यानाधिकरणम् ॥ ८ ॥

सू ॥ आध्यानाय प्रयोजनाभावात् ॥ १४ ॥ आत्मशब्दाच्च ॥ १५ ॥ आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥ अन्वयादिति चेत्स्यादवधारणात् ॥ १७ ॥

आनन्दमयोपास्तावन्नमयाद्या अपि ध्येयाः । स्वातन्त्र्येण क्रमशः स्वस्वगुणैर्योजितास्समाम्नातैः ॥ २२३ ॥
एवं हि तत्तदान्तरविज्ञानमयान्तकोशानाम् । आन्तरतया प्रसिद्ध्येदानन्दमयस्य निध्यानम् ॥ २२४ ॥
मैवं तस्योपास्तौ न ध्येयास्ते (प्रयोजनाभावात् ।) तस्य ध्यानाय हि ते बुद्ध्यवतारार्थमेवोक्ताः ॥ २२५ ॥
किं चात्मशब्दतस्ते शिखयोक्ता ब्रह्मविष्णुरुद्रेंद्राः । आनन्दमयस्त्वात्मा साक्षाच्छिव एव सृष्टिवाक्योक्तः ॥ २२६ ॥
एवं पञ्चस्वपि तेष्विहात्मशब्दे समानेऽपि । शिव एको ध्येयः स्यादन्यान्ब्रह्मादिकान्परित्यज्य ॥ २२७ ॥
एवमथर्वशिखायामन्यत्सर्वं परित्यज्य । शिव एको ध्येय इति स्फुटमेवान्यव्यवच्छेदात् ॥ २२८ ॥

इत्याध्यानाधिकरणम् ॥ ८ ॥

---

( १ ) एतद्रेखांकितं पदं मातृकापुस्तके त्रुटिततया अर्थानुसारेण मया संपूर्य संयोजितमिति वेद्यम् । अनन्तराधिकरणेऽपि ( तद् ) इत्ययमंशो मयैव पूरितः । मदीयपूरणसामञ्जस्यासामञ्जस्यनिर्धारणे पण्डिताः प्रमाणम् ॥

## सूत्रार्थचन्द्रिकायाम्

### अथ आध्यानाधिकरणम् ॥ ७ ॥ ८ ॥

**सू ॥ आध्यानाय प्रयोजनाभावात् ॥ १४ ॥ आत्मशब्दाच्च ॥ १५ ॥ आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥ अन्वयादिति चेत्स्यादवधारणात् ॥ १७ ॥**

**भगवत्पादमते,** अत्र आद्यं सूत्रद्वयमाध्यानाधिकरणमितरत्सूत्रद्वयमात्मगृहीत्यधिकरणमिति विज्ञेयम् । अस्य 'इन्द्रियेभ्यः परा ह्यर्था' इत्यारभ्य 'पुरुषान्नापरं किंचित्सा काष्ठा सा परा गतिः' इत्यन्तं कठवल्लीवाक्यं विषयः । तत्र किमिमानि वाक्यानि भिन्नानि, उत आत्मपरमेकमेव वाक्यमिति **संदेहः** । प्रतिपाद्यभेदाद्भिन्नानीति **पूर्वपक्षः । सिद्धान्तस्तु, आध्यानाय**=ध्यानसाध्यसाक्षात्काराय पुरुष एवार्थादिभ्यः परत्वेन प्रतिपाद्य इत्येकमेव वाक्यम् । न त्विन्द्रियपरत्वेनार्थादयः प्रतिपाद्याः । कुतः । **प्रयोजनाभावात्** । न हीन्द्रियपरत्वेनार्थज्ञानं किंचित्प्रयोजनं जनयति । अतः प्रतिपाद्यभेदाभावान्न वाक्यभेदः ॥

अपूर्वत्वमपि लिङ्गान्तरमस्तीत्याह—**सू ॥ आत्मशब्दाच्च ॥ १५ ॥** 'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥' इति प्रकृतपुरुषे आत्मशब्दश्रवणाच्चात्मपरमेवेदं वाक्यम् । तस्यात्मनः श्रुत्या मानान्तरावेद्यत्वरूपापूर्वत्वप्रतिपादनादिति भावः ॥ **इति भगवत्पादमते आध्यानाधिकरणम् ॥ ७ ॥**

### अथ आत्मगृहीत्यधिकरणम् ॥ ८ ॥

अत्राधिकरणे वर्णकद्वयं वर्णितम् । तयोराद्यं वर्णकमिदम्—यथा पूर्वं वाक्यभेदभिया अर्थादीनां पृथक्प्रतिपाद्यत्वं नास्तीत्यभिहितम् । तद्वदैतरेयवाक्ये 'प्रजापते रेतो देवाः' इति पूर्ववाक्ये हिरण्यगर्भस्य प्रकृतत्वाद्वाक्यभेदभिया स एवात्मशब्देनाभिधीयतामिति दृष्टान्तसंगत्येदमारभ्यते—**आत्मगृहीतिरित्यादि** । अस्य वर्णकस्य 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्' इत्याद्यैतरेयकवाक्यं विषयः । तत्र किमात्मशब्देन हिरण्यगर्भ उच्यते उत परमात्मेति **संदेहः** । हिरण्यगर्भ इति **पूर्वपक्षः । सिद्धान्तस्तु,** अस्मिन्सृष्टिवाक्ये **आत्मगृहीतिः**=आत्मशब्देन परमात्मन एव ग्रहणं नान्यस्य । किंवत् । **इतरवत्**=यथा इतरेषु सृष्टिवाक्येषु 'आत्मन आकाशः संभूतः' इत्यादिषु आत्मशब्देन परमात्मन एव ग्रहणं तद्वदत्रापि । कुतः । **उत्तरात्**='स ईक्षत लोकान्नु सृजा इति' 'स इमाँल्लोकानसृजते' ति ईक्षणपूर्वकस्रष्टृत्वरूपोत्तरविशेषणादित्यर्थः । तच्च विशेषणं परमात्मन्येव मुख्यत्वेनावगतमिति भावः ॥

पूर्वपक्षबीजमनूद्य दूषयति—**अन्वयादिति चेदित्यादि । अन्वयादिति चेत्**=लोकसृष्टिवाक्यपर्यालोचनया हिरण्यगर्भ एव वाक्यान्वयान्न परमात्मग्रहणं युक्तमिति चेत् । **स्यात्**=परमात्मन एव ग्रहणं युक्तं स्यात् । कुतः । **अवधारणात्**='आत्मा वा इदमेक एवाग्र आसीत्' इति सृष्टेः प्रागेकत्वावधारणस्य परमात्मन्येव सामञ्जस्यात् । ततश्चात्र शाखान्तरोक्तभूतसृष्टिरुपसंहर्तव्येत्यदोषः ॥ **इत्यात्मगृहीत्यधिकरणे प्रथमं वर्णकम् ॥**

अथ द्वितीयं प्रस्तूयते—पूर्वत्र वाक्यैक्यबलादर्थादिपरत्वं परित्यज्य विद्यैक्यमुक्तम् इह तूपक्रमभेदेन वाक्यभेदाद्विद्यैक्यं न स्यादिति प्रत्युदाहरणसंगत्येदमारभ्यते—**आत्मगृहीतिरितरवदित्यादि** । बृहदारण्यके 'कतम आत्मा' इत्यात्मशब्देनोपक्रम्य 'स वा एष महानज आत्मा' इत्यात्मशब्देनोपसंहृतम् । छान्दोग्ये तु 'सदेव सोम्येदमग्र आसी' दिति विनैवात्मशब्दं सन्मात्रत्वेनोपक्रम्य 'स आत्मा तत्त्वमसि' इत्युपसंहृतम् । तत्र किमनयोर्वाक्ययोस्तुल्यार्थत्वमुत भिन्नार्थत्वमिति **संशयः** । भिन्नार्थत्वमिति **पूर्वः पक्षः । सिद्धान्तस्तु, आत्मगृहीतिः**=छान्दोग्ये सत्पदेनात्मन एव ग्रहणम् । **इतरवत्**=बृहदारण्यके आत्मपदेनात्मग्रहणवत् । कुतः । **उत्तरात्**='स आत्मा' इत्युपसंहारबलात् । अत उभयत्र तुल्यार्थत्वमित्यर्थः ॥

**सू ॥ अन्वयादिति चेत्स्यादवधारणात् ॥ १७ ॥ अन्वयादितिचेत्**=उपसंहारस्योपक्रमान्वयेनोपक्रमपरतन्त्रत्वात् उपसंहारबलात्सत्पदेनात्मगृहीतिरित्यसंगतमिति चेत् तत्राह—**स्यात्**=सत्पदेनात्मगृहीतिर्युक्ता स्यात् । कुतः । **अवधारणात्**='सदेवे' त्यद्वितीयत्वावधारणादित्यर्थः ॥ **इति द्वितीयं वर्णकम् ।**

### इति भगवत्पादमते आत्मगृहीत्यधिकरणम् ॥ ८ ॥

**श्रीकण्ठमते,** 'आध्यानाये' त्यादीनि चत्वार्यपि सूत्राण्याध्यानाधिकरणमिति विशेषः ॥ अत्र पूर्वोक्तानन्दमयात्मानुसंधानवदन्नमयादीनामप्यनुसंधानं नियतमस्ति वा न वेति **संशयः** । अन्नमयादिसर्वांतरस्यानन्दमयस्यान्नमयाद्यनुसंधानक्रममन्तरेण तदान्तरत्वेनानुसंधानायोगात्तेषामनुसन्धानं नियतमिति **पूर्वपक्षः । सिद्धान्तस्तु,** अन्नमयादीनामनुसंधानं न नियतम् । **प्रयोजनाभावात्** । आभिमुख्येन ध्यानं ह्याध्यानम् । आनन्दमयस्य सर्वोत्कृष्टत्वसिद्धावेवात्यन्तादरकृतेनाभिमुख्येन ध्यानं भवति । अन्नमयाद्यनुसंधानस्य आनन्दमयब्रह्मसिद्धपर्यन्तत्वात्तेषामनियतमनुसंधानमिति ॥

**सू ॥ आत्मशब्दाच्च ॥ १५ ॥** 'एतमन्नमय' मित्यादिषु प्रत्येकमात्मशब्दश्रवणेन चेतनत्वानवगमात् ब्रह्मव्यतिरिक्तानां मुमुक्षुध्येयत्वनिषेधात् तथाथर्वशिखायां 'शिव एको ध्येयः शिवंकरस्सर्वमन्यत्परित्यज्ये'ति शिवव्यतिरिक्तानां मुमुक्षुध्येय-

## अथ कार्याख्यानाधिकरणम्. ॥ ९ ॥

## सू ॥ कार्याख्यानादपूर्वम् ॥ १८ ॥

---

## अथ कार्याख्यानाधिकरणम् ॥ ९ ॥

**सू० ॥ कार्याख्यानादपूर्वम् ॥ १८ ॥ छांदोग्ये वाजसनेयकशाखयोश्च काण्वमाध्यं-**

---

त्वनिषेधाच्च अन्नमयादीनामनुसंधानमनियतमिति ॥

**सू ॥ आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥** 'अन्योऽन्तर आत्मानन्दमयः' इत्यात्मगृहीतिः परमात्मविषया न प्रत्यगात्मविषया । किंवत् । 'आत्मन आकाशस्संभूत' इत्यत्रात्मशब्दवत् । कथमिदमवगम्यते इति चेत् **उत्तरात्**='आनन्दमयमात्मानमुपसंक्रम्ये' त्युत्तरवाक्यादवगम्यते । तस्मादानन्दमयात्मानुसंधानं मुख्यं ब्रह्मानुसंधानमिति ॥

**सू ॥ अन्वयादिति चेत्स्यादवधारणात् ॥ १७ ॥ अन्वयादितिचेत्**=अन्नमयादीनामप्यात्मशब्दान्वयात्परमात्मत्वेन तेषामप्यनुसंधानमविरुद्धमिति चेन्न । **स्यात्**=विरुद्धमेव स्यात् । कुतः । **अवधारणात्**='अन्योऽन्तरआत्मानन्दमय' इत्यानन्दमयस्य परमात्मनः शिवस्यान्नमयादिभ्यो भिन्नत्वावगमात् 'शिव एको ध्येयश्शिवंकरस्सर्वमन्यत्परित्यज्य' इति सकलेतरपरित्यागपूर्वकं शिवस्यैकस्यैव ध्येयत्वावधारणाच्च । अत आनन्दमयः शिव एक एव ध्येय इति ॥

### इत्याध्यानाधिकरणम् ॥ ८ ॥

**रामानुजमते,** 'आध्यानाये'त्यादीनि चत्वार्यपि सूत्राणि पूर्वाधिकरणशेषत्वेन आनन्दाद्यधिकरण एव व्याख्यातानीत्यतो नात्र पुनःप्रपञ्चनीयतामर्हन्ति ॥

**आनन्दतीर्थमते,** अत्राधिकरणे उपसंहाराधिकरणोक्तमुपसंहारानुपसंहारप्रमाणद्वयमाक्षिप्य समर्थ्यते—**आध्यानायेत्यादिना ।** पूर्वमुपसंहाराधिकरणे सर्वविद्यानां भगवन्नामत्वेन तद्गुणाभिधायकत्वमुपसंहारे प्रमाणं प्रकरणभेदोऽनुपसंहारे प्रमाणमित्युभयं वैकल्पिकत्वेन सिद्धान्तितम् । गुणाभिधानस्य तत्तद्गुणश्रवणद्वारा जनलोकादिफलत्वसंभवेनोपासनार्थत्वाभावात् तदर्थत्वे सर्वगुणानामेकत्रैवोक्तिप्रसंगाच्च प्रकरणेष्वेतावन्त एवोपास्या इत्युक्त्यभावाच्च तदुभयमयुक्तमिति **पूर्वपक्षः । सिद्धान्तस्तु,** गुणाभिधानस्याध्यानार्थत्वान्निःश्रेयसोपयोगितया महाफलत्वेनाभिहितस्य तस्य जनलोकादिक्षुद्रफलार्थत्वायोगात् 'आत्मेत्येवोपासीते' ति गुणान्तरव्यवच्छेदपूर्वकमात्मत्वस्योपासनाविधानाच्चोभयमपि अधिकारिव्यवस्थया युक्तमेवेति । **सूत्रार्थस्तु,** वेदेषु सर्वगुणोक्तिरुपसंहारश्च **आध्यानाय**=सम्यग्ज्ञानार्थं क्लृप्तो भवेत् । कुतः । **प्रयोजनाभावात्**=गुणोक्तेस्तदुपसंहारस्य च सम्यग्ज्ञानं विना प्रयोजनाभावादित्यर्थः ॥

**सू ॥ आत्मशब्दाच्च ॥ १५ ॥** 'आत्मेत्येवोपासीते' त्यात्मशब्दघटितश्रुतिसद्भावादधिकारिभेदेन सर्वगुणोपसंहारश्चाकर्तव्य इत्यर्थः ॥ अतस्तदुभयं युक्तमिति । **इत्यानन्दतीर्थमते आध्यानाधिकरणम् ॥ ८ ॥**

### अथात्मगृहीत्यधिकरणम् ॥ ९ ॥

**सू ॥ आत्मगृहीतिरितरवदुत्तरात् ॥ १७ ॥** अत्र यद्येव 'मात्मेत्येवे'त्यवधारणेनानन्दादीनामपि व्यवच्छेदा- 'दानन्दादयः प्रधानस्ये' त्युक्तमयुक्तं स्यादिति **पूर्वपक्षः । सिद्धान्तस्तु,** आनन्दादीनां चतुर्णामपि स्वामित्ववाचिनात्मशब्देनैव 'विज्ञानमानन्दं ब्रह्मे' त्यादिवाक्येनेव परिगृहीतत्वात् उत्तरवाक्याच्च युक्तमेवेति । **सूत्रार्थस्तु, इतरवत्**=सत्यज्ञानादिवाक्ये सत्यादिपदैरन्येषां गुणानामिव । **आत्मगृहीतिः**='आत्मैवे' ति वाक्येऽपि आत्मशब्देन चतुर्णां गुणानां ग्रहणं संभवति । कुतः । **उत्तरात्**='अत्र ह्येते' इत्युत्तरवाक्याच्च । अतश्चतुर्गुणोपास्त्युक्तेर्नास्ति विरोध इति ॥

### इत्यात्मगृहीत्यधिकरणम् ॥ ९ ॥

### अथान्वयाधिकरणम् ॥ १० ॥

**सू ॥ अन्वयादिति चेत्स्यादवधारणात् ॥ १८ ॥** अत्र 'आपूर्व्याप्तेरात्मशब्दः परमस्य प्रयुज्यते' इत्यात्मशब्दस्य सर्वगुणाभिधायकत्वश्रवणा 'दात्मेत्येवे' ति वाक्यस्यानुपसंहारप्रमाणत्वं युक्तं न वेति **संदेहः ।** न युक्तमिति **पूर्वः पक्षः । सिद्धान्तस्तु,** तस्यानुपसंहारप्रमाणत्वं युक्तमेवेति । **सूत्रार्थस्तु, अन्वयादिति चेत्**=आत्मशब्दे सर्वगुणानामन्वयादिति चेत् । **स्यात्**=यत्परोक्तं तत्तथा स्यादेव । तथापि नानुपपत्तिः । कुतः । **अवधारणात्**='आत्मेत्येवे' त्यवधारणात् । आत्मशब्दो हि ब्रह्मादीन्प्रत्येव सर्वगुणान्वदति नान्यान्प्रतीति निर्णयोपपत्तेरित्यर्थः । ततस्सर्वेषामुपासनसिद्धिः । अतस्तस्यानुपसंहारप्रमाणतोपपन्नेति सिद्धम् ॥ **इति आनन्दतीर्थमते अन्वयाधिकरणम् ॥ १० ॥**

### इति सूत्रार्थचन्द्रिकायामाध्यानाधिकरणम् ॥ ७ ॥ ८ ॥

'यो ह वै ज्येष्ठं च श्रेष्ठं च वेद' इत्यारभ्य 'किं मे वासः' इति वागादीन् प्रति प्राणप्रश्नस्योत्तरमपां प्राणवासस्त्वमुक्त्वा 'तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते' इति श्रूयते । अत्राचमनं प्राणवासस्त्वं चेत्युभयं विधीयते उत प्राणवासस्त्वमेव ॥

इति संशये विशेषाभावादुभयमपीति प्राप्ते—आचमनस्य स्मृत्याचारेण प्राप्तत्वादप्राप्तं प्राणवासस्त्वमेवापूर्वं विधीयते । अप्राप्तस्यैव विधेयत्वाख्यानादनुवादसरूपे विधिकल्पना । तस्मादपूर्वं प्राणवासस्त्वानुसंधानमेव विधेयमिति

---

दिनसंज्ञयोः प्राणविद्यायामन्नं वासश्च पृष्टवते प्राणाय वागादीनामुत्तरे श्वपक्ष्यादिपर्यन्तं प्राणिजातमन्नमुक्तम् । तत्र तावद्दृष्टिविधिरसंदिग्धः । सर्वप्राण्योदनत्वस्याशाब्दत्वादशक्यत्वाच्च । 'न हवा एवंविदि किंचनानन्नं भवति न हवा अस्यानन्नं जग्धं भवति नानन्नं प्रतिगृहीतं य एवमेतदन्नस्यान्नं वेदे'ति तद्वेदनफलार्थवादश्रवणाच्च । तदनन्तरमाचमनीयानामपां प्राणवासस्त्वमुक्तम् । तत्रापि दृष्टिविधिरेव । दृष्टिविधिसाहचर्यात् । छांदोग्ये 'लंभुको हवा भवत्यनग्नो भवती'ति तद्वेदनफलार्थवादश्रवणाच्च । तदनन्तरं 'यद्यप्येतच्छुष्काय स्थाणवे ब्रूयाज्जायेरन्नेवास्मिन्शाखाः प्ररोहेयुः पलाशानी'ति फलार्थवादान्तरश्रवणाच्च । एवं काण्वशाखायामप्याचमनीयानामपां प्राणवासस्त्वमात्रमुक्तम् । माध्यंदिनशाखायां तु 'तस्मादेवंविदशिष्यन्नाचामे'दित्याद्यधिकं श्रूयते । तत्राचमनमपि विधीयते न वेति तत्र श्रुतस्याचमनस्याप्राप्तिप्राप्तिभ्यां संशये पूर्वपक्षः—'आचामे' दित्यसंदिग्धविधिविभक्तिश्रवणादाचमनेऽपि विधिः । न च सर्वकर्मांगत्वेनाचमनस्य स्मृत्याचारप्राप्तत्वादेवंविदिति विशेषणे विधिसंक्रमो वाच्यः । स्मार्ताचारव्यतिरेकेणाचमनान्तरस्याप्राप्तस्य विधिसंभवात् । चातुर्मास्ये 'द्वयोः प्रणयती' त्यत्र प्रकृतिप्राप्तप्रणयनव्यतिरेकेण प्रणयनान्तरविधिरिति विधिसार्थकत्वायाभ्युपगतत्वाच्च । अप्राप्तविधौ च लब्धे दृष्टिविधिराचमनविधिश्चेति वाक्यभेदो न दोषः । 'अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयती'त्यत्रेव स्पष्टे विधिद्वये वाक्यभेदस्य न्याय्यत्वात् । न च तर्ह्याचमन एव विधिरस्तु अपां वासस्त्वश्रवणमर्थवादोऽस्त्विति शङ्कनीयम् । अन्नदृष्टिविधिसाहचर्येण फलार्थवादश्रवणेन छांदोग्ये काण्वशाखायाञ्चाचमनदृष्टिश्रवणेन दृष्टिविधेरप्यावश्यकत्वादिति । सिद्धांतस्तु प्रसिद्धानुवादेनाप्रसिद्धविधिनैकवाक्यत्वे संभवति न वाक्यभेदो न्याय्यः । 'द्वयोः प्रणयति तस्माद्वाभ्यामेती'ति सार्थवादो विधिः । न च तस्यान्यत्र संक्रमणं संभवतीति प्रणयनान्तरे विधिराश्रितः । उपरि धारणेऽप्यप्राप्तत्वादनुवादानर्हो विधिराश्रितः । इह तु सर्वकर्मांगत्वेन स्मृतितः प्राप्तमाचमनमनुवादार्हमस्तीति तदनुवादेन दृष्टिमात्रविध्युपपत्तेः न तत्रापि वाक्यभेदावहो विधिराश्रयणीयः । न चाचमनविधिप्रापको दृष्टिविध्यननुगुणः कश्चिदर्थवादः श्रूयते प्रत्युत वासस्त्वदृष्ट्यर्थवाद एव तत्रापि श्रूयते 'एतमेव तदनमनग्नं कुरुत' इति । तस्मादपां वासस्त्वानुचिंतनमात्रे विधिरिति । सूत्रे कार्यशब्दः कार्यत्वपरः । अपूर्वं वासस्त्वचिंतनं विधेयमपूर्वस्यैव कार्यत्वाख्यानात् विधेयत्वप्रतिपादना'दप्राप्ते शास्त्रमर्थव'दित्यादिषु । अतो यद्यपि 'य एवं विद्वान्साम्ना स्तुवीते'त्या-

युक्तम् ॥ इति **कार्याख्यानाधिकरणम्** ॥ ९ ॥

## अथ समानाधिकरणम् ॥ १० ॥

## सू ॥ समान एवं चाभेदात् ॥ १९ ॥

**अग्निरहस्ये बृहदारण्यके च शाण्डिल्यविद्याऽऽम्नायते । एकत्र 'आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपं सत्यसंकल्पमाकाशात्मानम्' इति । इतरत्र**

---

**दिष्विव विद्यांशेऽनुवादरूपत्वं प्रतीयते तथापि प्राप्ताप्राप्तविवेकेन तत्रैव विधिसंक्रमो वाच्य इति भावः ॥ इति कार्याख्यानाधिकरणम् ॥ ९ ॥**

## अथ समानाधिकरणम् ॥ १० ॥

**समान एवञ्चाभेदात् ॥ १९ ॥** वाजसनेयिनां शतपथब्राह्मणे प्रथममग्निरहस्ये 'स-आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमाकाशात्मानं कामरूपिणं मनोजवसं सत्यसङ्कल्पं सत्यधृतिं सर्वगन्धं सर्वरसं सर्वा अनुदिशः प्रभूतं सर्वमिदमभ्यात्तमवाक्यमनादर' मिति शाण्डिल्यविद्या श्रूयते । तदनन्तरं बृहदारण्यकेऽपि श्रूयते 'मनोमनोऽयं पुरुषो

---

### नयमणिमालायाम्

### अथ कार्याख्यानाधिकरणम् ॥ ९ ॥

**सू ॥ कार्याख्यानादपूर्वम् ॥ १८ ॥**

आचमने विधिरष्टे स्मार्तादन्यद्विधेयं तत् । वासस्त्वमपूर्वं चे (त्तद्) ष्टा वपि विधिर्भवतु ॥ २२९ ॥

प्राप्तमनूद्याचमनं तस्याप्सु प्राणवासस्त्वम् । एकं विधेयमुचितं तदेव चोपक्रमेऽवगतम् ॥ २३० ॥

### इति कार्याख्यानाधिकरणम् ॥ ९ ॥

---

### सूत्रार्थचन्द्रिकायाम्

### अथ कार्याख्यानाधिकरणम् ॥ ९ ॥

**सू ॥ कार्याख्यानादपूर्वम् ॥ १८ ॥ भगवत्पादमते,** अत्र बृहदारण्यकच्छान्दोग्ययोरुभयत्र 'एवंविदशिष्यन्नाचामेदशित्वाचामेदेतमेव तदनमनग्नं कुरुते' इति वाक्यं विषयः । तत्राचमनमनग्नताचिन्तनं च प्रतीयते । उभयविधाने वाक्यभेदभयादेकमेव विधेयम् । तदेकं किमाचमनम् । उतानग्नताचिंतनमिति **संशयः** । प्राणविद्याङ्गत्वेनापूर्वमाचमनमेवात्र विधेयमिति **पूर्वपक्षः । सिद्धान्तस्तु,** अपूर्वमनग्नताचिन्तनमेवात्र विधेयं नाचमनम् । कुतः । **कार्याख्यानात्**=स्मार्तविधिना सकलकर्मानुष्ठानांगत्वेन शुद्ध्यर्थं **कार्यस्या**चमनस्य प्राणविद्यायामपि विधिप्राप्तस्या**ख्याना**दनग्नताचिन्तनार्थानुवादादित्यर्थः ॥

**श्रीकण्ठमते** तथा **रामानुजमते च** विषयवाक्यादिकं प्रायस्समानमेव । तत्र आचमनं प्राणवासस्त्वमित्युभयं विधेयं वा उत प्राणवासस्त्वमिति **संदेहः ।** विशेषाभावादुभयमिति **पूर्वपक्षः । रामानुजमते** तु भगवत्पादमतवदाचमनं विधेयं वा उत प्राणवासस्त्वानुसंधानमिति संशयस्वरूपनिरूपणे विशेषः । **सिद्धान्तस्तु,** आचमनस्य स्मृत्याचारप्राप्तत्वादप्राप्तं प्राणवासस्त्वानुचिन्तनमेव विधेयम् । कुतः । **कार्याख्यानात्**=अप्राप्तस्यैव विधेयत्वाख्यानादित्यर्थः ॥

**आनन्दतीर्थमते,** 'परमतस्सेतून्माने' त्यधिकरणे भगवद्गुणानामलौकिकत्वमभिहितम् । तद्युक्तं न वेति **संदेहः ।** अलौकिकस्याननुभूतत्वेन ध्यानकाले बुद्ध्यनारोहात् तेषां लौकिकत्वमेव ध्यानान्यथानुपपत्त्या कल्पनीयम् । अतो **भगवद्गुणा**नामलौकिकत्वनिर्णयो न युक्त इति **पूर्वपक्षः । सिद्धान्तस्तु, अपूर्वम्**=अलौकिकमेव भगवद्गुणजातं ध्यातव्यम् । **कुतः । कार्याख्यानात्**=कार्यस्य ध्यानकार्यस्य मोक्षस्यालौकिकत्वात् फलानुसारिध्यानकर्तव्यतानियमात् इन्द्रादेरिव **गुरूपदेशादि**भिरलौकिकानामपि तेषां बुद्ध्यारोहोपपत्तेश्च । अतस्तेषामलौकिकत्वनिर्णयो युक्त एवेति ॥

### इति सूत्रार्थचन्द्रिकायां कार्याख्यानाधिकरणम् ॥ ९ ॥

**'मनोमयोऽयं पुरुषो भास्सत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति' इति । उभयत्र विद्या भिन्ना न वेति संशयः ॥**

**एकत्राकाशात्मकत्वेन महत्त्वम्, इतरत्र यवसादृश्येनाल्पत्वम्, एकत्र सत्यसंकल्पत्वम्, इतरत्र वशित्वादिकम्, इति धर्मभेदाद्भिन्ना ॥**

---

भास्सत्यस्तस्मिन्नंतर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिस्सर्वमिदं प्रशास्ति यदिदं किञ्चे'ति । तत्र किमुभयत्र विद्या भिद्यते न वेति महत्त्वाणीयस्त्वादिरूपभेदाभेदात्संशये पूर्वः पक्षः—एकत्राकाशसाम्यरूपं महत्त्वमीशानत्वादिकं च श्रूयते । अन्यत्राणीयस्त्वं सत्यसंकल्पत्वादिकं च श्रूयते । अतो रूपभेदाद्विद्याभेदः । ननु मनोमयत्वभारूपत्वगुणप्रत्यभिज्ञानाद्विद्यैक्ये स्थिते सत्युभयत्रापि परस्परानाम्नातसत्यसङ्कल्पत्वेशानत्वादिगुणानामुपसंहारो भविष्यति । तत्र परस्परविरोधशंकानवकाशात् । महत्त्वाणीयस्त्वयोस्तूदितानुदितहोमवदेकादशकपालद्वादशकपालवच्च विकल्पो भविष्यति । न च महत्त्वमिहाहत्याम्नातम् । 'आकाशात्मान'मित्येतदाकाशवत्स्वच्छतापरत्वेनाप्युपपन्नं ध्येयगुणत्वाभिप्रायं विना स्वाभाविकमहत्त्ववर्णनेन स्तुत्यर्थतया वोपपन्नम् । यथा छांदोग्ये शाण्डिल्यविद्यायामेवाणीयस्त्ववर्णनानन्तरं ज्यायस्त्वकीर्तनम् । तस्मादिह न विद्याभेदशंकावकाशः इति चेदुच्यते । उभयत्रा 'ध्युपासीतेति' विधिः श्रूयते । न चैकस्यां शाखायां प्रतिपत्तृभेदेन विधिद्वयं सार्थक्यमश्नुते । न चा 'ग्निहोत्रं जुहोति' 'दध्ना जुहोती'ति वाक्ययोरिवैकत्र धात्वर्थविधिरन्यत्र तदनुवादेन गुणमात्रविधिरित्यत्र विनिगमकमस्ति । एकत्र सत्यसंकल्पत्वकामरूपत्वमनोजवसत्वादिकमन्यत्रेशानत्वादिकमित्युभयत्राप्यपुनरुक्तगुणश्रवणात् । न चेशानत्वादिकं सत्यसंकल्पत्वांतर्गतमेव । अतस्सत्यसंकल्पत्वस्याग्निरहस्ये संक्षेपेणोक्तस्य समासोक्तस्य विग्रहवाक्येनेव प्रतिपत्तिसौकर्याय 'सर्वस्येशान'इत्यादिना विवरणार्थं बृहदारण्यकेऽनुवादः स्यादिति वाच्यम् । विकल्पासहत्वात् । किमीशानत्वादिकं सत्यसंकल्पविशेष इत्युच्यते उत तद्व्याप्यमिति । नाद्यः । ईशानत्वं हि ईशानशक्तिमत्त्वमीशनशीलत्वं वा । ताच्छील्यवयोवचनशक्तिषु चानशो विधानात् । प्रशासितृत्वमधिपतित्वं रक्षितृत्वम् । पातेर्डतिप्रत्ययविधानात् । रूढ्या स्वामित्वरूपं शेषित्वं वा । न चैते सत्यसंकल्पत्वावान्तरविशेषाः । न च सामान्याकारस्य ध्येयत्वविधानेन विशेषाकाराणामपि ध्येयत्वमुक्तं भवति । येनात्र तद्विवरणमात्रं स्यात् । एतेन द्वितीयपक्षोऽपि निरस्तः । तद्व्याप्यत्वमात्रेण तस्य ध्येयत्वाविधानात् । ध्येयत्वसिद्धौ कामरूपत्वादीनामत एव तत्सिद्ध्या पुनर्ग्रहणवैयर्थ्यापत्तेश्च । न चेशानत्वादीनां सत्यसंकल्पत्वशब्दार्थत्वाभावेऽपि 'सर्वस्येशान' इत्यादेस्तद्विवरणरूपत्वात्सत्यसंकल्पत्वशब्दस्य तदनुसारादीशानत्वादिषु पर्यवसानं स्यात् 'अभ्यंजनं वाव स्त्रिया अन्न'मिति विवरणानुसारादिवान्नशब्दस्याभ्यंजन इति वाच्यम् । अन्योन्याश्रयापत्तेः । न ह्यभ्यञ्जनवाक्यस्यान्नशब्दविवरणरूपत्वमिव ईशानादिवाक्यस्य संकल्पविवरणरूपत्वं सम्प्रतिपन्नं किं तु समासव्यासवाक्यवदर्थैक्यात्कल्पनीयं, तच्चासिद्धमेव । तस्माद्विनिगमनाविरहेणोभयत्र विधानादभ्यासन्यायतो विद्याभेदो युक्तः । अविशेषपुनःश्रव-

**इति प्राप्ते ब्रूमः—सर्वत्र मनोमयत्वादिके समाने आकाशात्मेत्यस्याकाशवत् स्वच्छतापरत्वेन माहात्म्यपरतया स्तावकत्वेन वोपपत्तेः वशित्वादेः सत्यसंकल्पत्वविशेषरूपत्वेन तदभेदाच्च विद्यैक्यम् ॥ इति समानाधिकरणम् ॥ १० ॥**

---

णाभावेऽप्यभ्यासन्यायमूलस्यानर्थक्यस्य तुल्यत्वात् । एवं चावर्जनीये सति विद्याभेदे ना 'काशात्मान' मित्यस्या 'काशवत्सर्वगतश्च नित्य' इति श्रुत्यंतरप्रसिद्ध्यनुसारिमहत्त्वपरत्वं त्यक्तव्यमिति । ततोऽपि विद्याभेद ईशानत्वादितश्चेत्यभ्युच्चय इति । सिद्धान्तस्तु नोभयत्र विद्याविधिः । विनिगमनाविरहासिद्धेः । यत्र भूयांसो गुणास्तत्राग्निरहस्ये विद्याविधिः अन्यत्र गुणविधिरिति व्यवस्थायां गुणभूयस्त्वस्य विनिगमकस्य सत्त्वात् । लोकेऽपि हि यत्र छत्रचामरध्वजगजतुरगादिबाहुल्यं तत्र राजा अन्यत्रामात्यादिस्तद्गुण इत्यवधार्यते । पूर्वतन्त्रेऽपि 'भूयस्त्वेनोभयश्रुति' रित्यधिकरणे दर्शितोऽयं न्यायः । एवञ्चाग्निरहस्यविहित-विद्यानुवादेनानेकगुणविधाने वाक्यभेदः स्यादतस्तत्रापि विधिराश्रयणीय इति शङ्का तु 'सर्वत्र प्रसिद्धोपदेशा'दि(ब्र० १-२-१ )त्यधिकरणे प्रपञ्चितेनावाक्यभेदोपपादनप्रकारेण समाधेया । 'एवमपि विद्याभेदः स्यात् यदि विरुद्धगुणश्रवणं किंचित्स्यात् न चैतदस्ती'ति सूत्रभाष्ययोर्दर्शितम् । अभेदादित्यत्र हेतोरैक्यादिति नार्थः । 'आकाशात्मान'मित्यस्य केनचिदैक्यं वक्तुं प्रतियोग्यभावात् तत्रैव च विरोधशंकोन्मेषेण समाधानापेक्षणात् । किंत्वविरोधादित्यर्थः । 'राज्ञामंतर्भेदो वर्तत'इत्यादिव्यवहारे भेदशब्दस्य विरोधार्थप्रसिद्धेः । भाष्ये 'सत्यसंकल्पत्वविशेषरूपत्वेने'त्यत्र विशेषशब्दो न तदवान्तरभेदत्वपरः । ईशानत्वादीनां सत्यसंकल्पविशेषत्वाभावात् । तद्विशेषत्वेऽपि तस्य ध्येयत्वोक्त्या तेषां ध्येयत्वसिद्ध्यभावाच्च । किं तु विशेषकत्वपरः । ततश्च सत्यसंकल्पोपपादकत्वपरतया तदनुगुणत्वादित्यर्थः । भाष्ये बृहदारण्यकवाक्योदाहरणे 'सर्वस्य वशी'ति पाठोऽस्तीति चेत् न शाखान्तरपाठः । काण्वशाखायां तु षष्ठाध्यायगतविद्यान्तर एव 'सर्वस्य वशी सर्वस्येशान' इति पाठः । सप्तमाध्याये शाण्डिल्यविद्यायां नास्ति 'सर्वस्य वशी'ति विशेषणम् । यद्यपि छान्दोग्येऽपि शाण्डिल्यविद्या श्रूयते । तथाप्येकशाखागतयोरेव वाक्ययोरुदाहरणमभ्यासन्यायमूलोऽत्र पूर्वपक्ष इति विभावयितुमिति सर्वमनवद्यम् । सूत्रकृता चैवं शाब्देनाभ्यासन्यायपरिहारो दर्शितः । यथा शाखाभेदे विद्यैक्यं गुणोपसंहारश्च । एवं शाखैक्येऽपि भूयस्त्वस्य विनिगमकस्य सत्त्वेनाभ्यासन्यायाप्रवृत्तेरिति तस्य तात्पर्यम् । चकारस्त्वभेदाच्चेत्येवंसंबंधेनाकाशात्मत्वादिविरोधपरिहारसमुच्चयार्थ इति सर्वमनवद्यम् ।

**इति समानाधिकरणम् ॥ १० ॥**

---

## नयमणिमालायाम् अथ समानाधिकरणम् ॥ १० ॥

**सू० ॥ समान एवञ्चाभेदात् ॥ १९ ॥**

साम्येऽपि बहुगुणानां वशितादेर्भेदकत्वविरहेऽपि । महदणुतयोर्विरोधाद्भिन्ना शाण्डिल्यविद्या स्यात् ॥ २३१ ॥
स्वगतोपाधिगताभ्यामविरुद्धे ते ततो न विद्याभेदः । शाखैक्येऽपि विधिद्वयभेदविधौ नियामकस्याभावात् ॥ २३२ ॥

**इति समानाधिकरणम् ॥ १० ॥**

## अथ संबंधाधिकरणम् ॥ ११ ॥

### सू ॥ संबन्धादेवमन्यत्रापि ॥ २० ॥

बृहदारण्यके 'य एष एतस्मिन् मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्' इत्युपक्रम्य सत्यस्य ब्रह्मणो व्याहृतिशरीरत्वेनादित्यमण्डलेऽक्षणि चोपास्यत्वमुक्त्वा 'तस्योपनिषदहः इत्यधिदैवतं' 'तस्योपनिषदहम् इत्यध्यात्मम्' इति द्वे रहस्यनामनी आम्नायेते। ते उभयत्रोपसंहार्ये न वा ॥

इति संशये सत्युपास्यैक्याद्विद्यैक्यम्। अत उभयत्रापि द्वे नामनी इति पूर्वः पक्षः ॥

---

## अथ संबंधाधिकरणम् ॥ ११ ॥

**सू० ॥ संबन्धादेवमन्यत्रापि ॥ २० ॥** अहरहमित्युपनिषदौ रेहस्यनामनी उभयत्राप्यनियतविकल्पेन समुच्चयेन वोपसंहार्ये उत यथानिर्देशं व्यवस्थिते इति नामविधानवाक्यश्रुतयोस्तस्येतिशब्दयोः केवलपुरुषपरामर्शित्वस्थानविशेषविशिष्टपुरुषपरामर्शित्वान्यतरानवधारणात्संशये व्याहृतिशरीरत्वविशिष्टब्रह्मरूपोपास्यैक्याद्विद्यैक्ये सति विद्यैक्यादुभयत्रोपसंहार्ये इति पूर्वपक्षः। ननु 'तस्योपनिषदह'रिति 'तस्योपनिषदह'मिति च

---

## सूत्रार्थचन्द्रिकायाम्

### अथ समानाधिकरणम् ॥ १० ॥

**सू ॥ समान एवं चाभेदात् ॥ १९ ॥**

**भगवत्पादमते,** वाजसनेयकशाखायामग्निरहस्ये शाण्डिल्यविद्यायां 'स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूप'मित्यादि श्रूयते। तत्रैव बृहदारण्यके पुनः सैव श्रूयते—मनोमयोऽयं पुरुषो भास्सत्य' मिति। तत्र किमनयोर्विद्ययोर्भेदः उतैक्यमिति **संशयः**। भेद इति **पूर्वपक्षः**। **सिद्धान्तस्तु, एवं च**=यथा भिन्नासु विद्यैक्यं गुणोपसंहारश्च भवति एवं **समाने**=समानायामपि शाखायां भवितुं युक्तम्। कुतः। **अभेदात्**=उपास्यस्य मनोमयादिगुणकस्योभयत्राप्यभेदेन प्रत्यभिज्ञानात्। एवं च उभयत्र शाण्डिल्यविद्यैक्यमिति सिद्धम् ॥

**श्रीकण्ठमते, तथा रामानुजमते** च, विषयवाक्यपूर्वपक्षादिकं सर्वं प्रायस्समानमेव। सूत्रार्थवर्णने परमस्ति कियान्भेदः पूर्वस्मात्। इतरदविशिष्टम्। सूत्रार्थ एवम्—**समाने**=मनोमयत्वादिके समाने सति विद्यैक्यं सिद्धम्। **एवं चाभेदात्**=वशित्वादिगुणेनाप्यभेदात्। वशित्वादेस्सत्यसंकल्पत्वविशेषरूपत्वेनाभेदाद्विद्यैक्यं सिद्धमिति भावः ॥

**आनन्दतीर्थमते,** उत्तरसूत्रेण सह सूत्रद्वयात्मकमिदमधिकरणम्। फलानुसारि ध्यानमित्येतद्युक्तं न वेति **संदेहः**। वाणीब्रह्मणोर्हि मुक्तौ स्थानैक्यस्य फलतारतम्यस्य च सत्त्वेन फलं समविषमम्। विरुद्धत्वात्तयोरुपासनं तु समविषमं न संभवति। तस्मा 'दितरे त्वर्थसामर्थ्यादि'त्यत्र कृतः फलानुसारिगुणोपासननिर्णयोऽप्ययुक्त इति **पूर्वपक्षः**। **सिद्धान्तस्तु,** वाणीब्रह्मणोः फलं समविषममुपासनमपि समविषममेव। तथा हि—सरसिजासनस्तावदसंकोचेन वेदोक्तसमस्तगुणक्रियोपेततयानन्तरूपं हरिमुपास्ते। सरस्वत्यपि सकलगुणोपेततयानन्तरूपं हरिमुपास्त एव। क्रियास्तु संकोचयति यतस्सामान्यक्रियोपसंहारमेव करोति न तु सरसिजासनवत्त्रिविक्रमत्वादिकदाचिदभिव्यक्तिमत्क्रियोपसंहारमपि करोति। किं तु तासां नित्यविक्रान्त्यादिसामान्यक्रियास्वन्तर्भावमेव। सरस्वत्या नित्यं पृथक्त्रिविक्रमत्वाद्युपासनयोग्यत्वाभावात्। ननु ब्रह्मणो वा कथं नित्यं तदुपासनयोग्यता। उपासनकाले तदभावात्। अविद्यमानोपासनस्यायोगादिति चेत् न, त्रिविक्रमत्वादीनामपि तादात्म्येन परमात्मसंबन्धितया नित्यत्वात् नित्यं तस्य तदुपासनोपपत्तेरिति। **सूत्रार्थस्तु,** एवं च एवमपि ब्रह्मगुणानामलौकिकत्वेऽपि वाण्याः समाने योग्यगुणविषय एवोपसंहारः न त्वयोग्यक्रियासु। तत्र तु **अभेदात्**=अभेदमपेक्ष्य त्रिविक्रमत्वादिकादाचित्कक्रियास्तत्सजातीयनित्यविक्रान्त्यादिष्वन्तर्भाव्योपसंहारो भवेदित्यर्थः। अतो वाणीब्रह्मणोः फलतुल्यमुपासनमित्यतः फलानुसारिगुणोपासननिर्णयो युक्त इति ॥

**सू ॥ संबन्धादेवमन्यत्रापि ॥ २१ ॥ हिरण्यगर्भस्य तु अन्यत्रापि**=त्रिविक्रमत्वादिक्रियाविशेषेऽपि एवं सर्वदोपसंहारो युज्यते। कुतः। **संबन्धात्**=क्रियाणां ब्रह्मणा तादात्म्यरूपसंबन्धेन नित्यत्वादित्यर्थः ॥

**इति सूत्रार्थचन्द्रिकायां समानाधिकरणम् ॥ १० ॥**

सिद्धान्त उच्यते—

## सू ॥ न वा विशेषात् ॥ २१ ॥

**नात्र विद्यैक्यम्, आदित्याक्षिस्थानविशेषसंबन्धित्वेनोपास्यभेदात् । अतस्तत्र नियते नामनी ॥ इति संबन्धाधिकरणम् ॥ ११ ॥**

निर्देशभेदान्नामव्यवस्था स्यात् । यथा 'रथन्तरे प्रस्तूयमाने संमीलयेत्' 'बृहति प्रस्तूयमाने समुद्रं मनसा ध्याये'दिति निर्देशभेदाद्धर्मव्यवस्था। न हि तत्रापूर्वीयत्वलक्षणया व्रीहिधर्माणां यव इव बृहद्रथंतरधर्मयोः परस्परसांकर्यमस्ति। विषमो दृष्टान्तः। तत्र रथन्तरबृहच्छब्दोपात्ते सामनी भिन्ने इति युक्ता तत्र निर्देशभेदाद्धर्मव्यवस्था । इह तु तस्येति पदद्वयेनाप्येक एव पुरुष उपात्त इति कथं तस्यैव नामद्वयं तत्र संकीर्णं न भवेत् । ननु 'अग्निर्ज्योतिर्ज्योतिरस्सूर्यः स्वाहे'ति सायं जुहोति 'सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातर्जुहोती'ति निर्देशभेदान्मंत्रव्यवस्था दृष्टा। तथेहापि नामव्यवस्था स्यात्। अयमपि विषमो दृष्टान्तः। तत्रैकस्यापि होमस्य कालभेदेनाभ्यस्यमानस्य तत्तत्कालविशेषे मंत्रविधिरिति व्यवस्था युज्यते। नात्र किञ्चिद्विशेषणमस्ति । नन्वत्रापि स्थानभेदो विशेषणं, नैतद्युज्यते, वस्तुतः स्थानभेदसत्त्वेऽपि नामनिर्देशकयोस्तस्येतिपदयोः प्रधानसत्यब्रह्मरूपपुरुषमात्रपरत्वेन तन्मात्रनामत्वावगमात्। तमिमं पूर्वपक्षमाह सूत्रकारः—'**संबंधादेवमन्यत्रापी**'ति। यथा शांडिल्यविद्यायां शाखैक्येऽप्येकविद्यासंबंधात्परस्परगुणोपसंहारः एवं सत्यविद्यायामपीत्यर्थः । अनेनास्याधिकरणस्य पूर्वाधिकरणेन प्रत्युदाहरणसंगतिरपि दर्शिता। **सू ॥ न वा विशेषात् ॥ २१ ॥** यद्यपि 'सत्यं ब्रह्मे'त्युपक्रांतमेकमेव सत्यं ब्रह्म आदित्यमण्डले अक्षणि चोपास्यं 'तद्यत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्ष'न्नित्युपक्रमात्तस्यैवादित्यमण्डलस्थस्य 'य एष एतस्मिन्मण्डले पुरुषस्तस्य भूरिति शिर'इत्यादिना 'भूरिति शिरोऽक्षरं भुव इत्यक्षरे बाहू सुवरित्यक्षरे पादा'विति व्याहृतिशरीरत्वमुपदिश्या'ह'रिति नामोपदिष्टम्। तस्यैवाक्षिस्थस्य 'योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर' इत्यादिना तथैव व्याहृतिशरीरत्वमुपदिश्याहमिति नामोपदिष्टं, तथापि स्थानात्मकरूपभेदादादित्येऽक्षणि च नैका सत्यविद्या यथोद्गीथविद्या अध्यसनीयहिरण्मयपुरुषप्राणाकाशाद्यात्मकरूपभेदात्। अतो विद्याभेदान्नोपसंहारः । अथाप्युपसंहारः शंक्येत यदि तस्येतिशब्दः केवलस्य ब्रह्मणः परामर्शकः स्यात्। स तु स्थानविशेषविशिष्टस्य परामर्शकः । तस्मादेकस्योक्तं नामान्यस्य न भवति । एवमत्र तस्येतिशब्दस्य स्थानविशेषविशिष्टपरामर्शकत्वादेव हि मण्डलस्थस्योपदिष्टं व्याहृतिशरीरत्वमक्षिस्थस्य न भवेदिति तस्यापि तत्पृथगुपदिष्टम्। लोके चा'सीन आचार्ये तमित्थमुपासीत' 'मार्गं गच्छत्याचार्ये तमित्थमुपासीते'ति वाक्यगततत्पदयोः प्रकृतासनगमनविशिष्टाचार्यपरामर्शकत्वादेवोपासनविशेषव्यवस्था दृश्यते। तस्मादिह नास्त्युपसंहार इति ॥ इति संबंधाधिकरणम् ॥ ११ ॥

नयमणिमालायाम्

**अथ संबंधाधिकरणम् ॥ ११ ॥**

सू ॥ संबंधादेवमन्यत्रापि ॥ २० ॥ न वा विशेषात् ॥ २१ ॥

सत्यं व्याहृतिरूपं ब्रह्मोपास्यं विकर्तनेऽक्षणि च । तदभेदात्तन्नाम्नोरहरहमोर्न व्यवस्था स्यात् ॥ २३३ ॥

ब्रह्मण एकत्वेऽपि स्थानकृतो रूपभेदोऽस्ति । तस्माद्विद्याभेदाद्व्यवस्थिते नामनी भवतः ॥ २३४ ॥

**इति संबंधाधिकरणम् ॥ ११ ॥**

## अथ मण्डलविद्याधिकरणम् ॥ १२ ॥

### सू ॥ दर्शयति च ॥ २२ ॥

छान्दोग्ये तैत्तिरीये च मण्डलविद्याऽऽम्नाता । सैका भिन्ना वा ॥

इति संशये पूर्वः पक्षः । एकत्र 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः' इत्यादि श्रूयते । अन्यत्र 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः' इति त्रयीमयमण्डलान्तर्वर्तिपुरुषान्तर्वर्तितया हिरण्मयं पुरुषं प्रस्तुत्य तस्योपसंहारे 'सर्वो वै रुद्रः' इत्यारभ्य 'नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतये नमो नमः' इत्यन्तेन सर्वात्मत्वं हिरण्यबाहुत्वमुमापतित्वं चाम्नायते । तत्रैकत्र सर्वाङ्गसुवर्णत्वमन्यत्र बाहुमात्रसुवर्णत्वमिति रूपभेदः । एकत्र 'सर्वो वै रुद्रः' इति सर्वात्मत्वं अन्यत्र 'सर्वेषां लोकानामीष्टे' इति सर्वाधिपत्यमिति धर्मभेदः, तस्मान्न विद्यैक्यम् ॥

---

## अथ मण्डलविद्याधिकरणम् ॥ १२ ॥

एकस्यापि वेद्यस्य स्थानभेदाद्विद्याभेद उक्तः स्थानैक्ये तु न विद्याभेदः इति प्रत्युदाहरणसंगत्याधिकरणान्तरम्—सू० ॥ दर्शयति च ॥ २२ ॥ रूपभेदाभेदाभ्यां विद्याभेदाभेदसंशये पूर्वपक्षः—एकत्र सर्वावयवसुवर्णत्वं सर्वेश्वरत्वञ्चान्यत्र बाहुमात्रसुवर्णत्वं सर्वात्मत्वं चेति रूपभेदाद्विद्याभेदो युक्तः । रूपभेदे सति स्थानैक्यमात्रस्य दहरशाण्डिल्यविद्ययोरिवैक्याप्रयोजकत्वादिति । सिद्धान्तस्तु इह स्थानैक्यं विद्यैक्ये गमकमेव । तदपवादकस्य रूपभेदस्याभावात् । तैत्तिरीयकेऽपि 'हिरण्मयः पुरुष' इत्युपक्रमानुसारेणोपसंहारे बाहुग्रहणस्योपलक्षणत्वात्सर्वात्मत्वस्य सर्वशरीरकत्वात्मकत्वे तदेव सर्वेश्वरत्वमित्यभेदात्सर्वोपादानत्वात्मकत्वे तस्य सर्वेश्वरत्वनियतत्वेन तदनुगुणतया विरोधशंकाभावेनोपसंहार्यत्वादिति । ननु छांदोग्ये मण्डलविद्या उद्गीथे हिरण्मयदृष्टिरूपा क्रत्वंतर्गता तैत्तिरीये सा स्वातंत्र्येण हिरण्मयपुरुषानुसंधानरूपा तदनन्तर्गता कथमनयोरैक्यं प्रतिपाद्यते । यदि छांदोग्येऽप्येषा स्वतन्त्रा स्यात्तदा विद्यैक्यं भवेदेव रूपैक्यादिति कृत्वाचिन्तया प्रतिपाद्यते । क्रतुपारतन्त्र्यस्वातन्त्र्याभ्यां विद्याभेदेऽपि मण्डलान्तर्वर्तिपरमेश्वरे तद्गुणविग्रहाणामभेदप्रत्यभिज्ञानाद्विद्याद्वयेऽपि परस्परानाम्नातगुणविशेषोपसंहारं विभावयितुम् । कथं विद्याभेदे गुणोपसंहारः । विद्याभेदेऽप्युपासनास्थानस्य स्थानिनस्तद्गुणविग्रहाणामैक्यप्रत्यभिज्ञानात् । न हि दहरशांडिल्यविद्ययोरिव गुणभेदेन प्रत्यभिज्ञाविच्छेदोऽस्ति । सूत्रकारोऽपि स्वातन्त्र्यपारतन्त्र्यकृतविद्याभेदो न गुणानुपसंहारप्रयोजक इति विभावयितुमेव छांदोग्यतैत्तिरीयाम्नातपुरुषविद्ययोः स्वातन्त्र्यपारतन्त्र्यकृतभेदे स्पष्टे सत्यपि गुणाभेदादैक्यमाशंक्य गुणभेदाद्भेदं साधयिष्यति । सूतसंहितायां चादित्यमण्डलान्तर्वर्तिनः परमेश्वरस्य ध्यानविधाने छांदोग्याम्नातगुणोपसंहारोऽपि दर्शितः—'अथवाकाशमध्यस्थे

इति प्राप्ते ब्रूमः—न भिन्ना विद्या । 'अन्तरादित्ये' इति स्थानैक्यमेव विद्यैक्यं दर्शयति । तैत्तिरीये 'हिरण्मयः पुरुषः' इत्युपक्रमेण बाहुग्रहणस्योपलक्षणत्वादुपसंहारेऽपि सर्वाङ्गसुवर्णत्वमेव विवक्षितम् । जगदीश्वरस्यापि तनुप्रवेशात तदात्मत्वं युक्तमिति निरूपितम् । तस्मादुभयत्रैकस्य प्रतिपाद्यत्वादुभयत्राप्युमापतित्वादिकमुपसंहार्यम् ॥ इति मण्डलविद्याधिकरणम् ॥ १२ ॥

भ्राजमाने सुशोभने । आदित्यमण्डले पूर्णे लक्षयोजनविस्तृते । सर्वलोकविधातारमीश्वरं हिमरूपिणम् । हिरण्यश्मश्रुकेशं च हिरण्मयनखं तथा । कप्यासांबुजवन्नेत्रं नीलग्रीवं विलोहितम् । आगोपालप्रसिद्ध्यर्थमंबिकार्धशरीरिणम् । सोऽहमित्यनिशं ध्यायेत्संध्याकालेषु वा नरः ।' इति । अत्र 'नेत्र' मित्यन्तेन छांदोग्यगतगुणोपसंहारस्सूचितः । तदुपरिपादद्वयेन 'असौ योऽवसर्पती'ति मन्त्रार्थोपसंहारः । अन्तिमपादेन तैत्तिरीयोपनिषदर्थोपसंहारः । वायुसंहिताख्यामपि—'सर्वो रुद्रो नमस्तस्मै पुरुषस्सत्परो महान् । हिरण्यबाहुर्भगवान् हिरण्यपतिरीश्वरः । अंबिकापतिरीशानः पिनाकी वृषवाहनः ।' इत्यारभ्य 'हिरण्यकेशः पद्माक्षो ह्यरुणस्ताम्र एव च । योऽसं सर्पत्यसौ देवो नीलग्रीवो विलोहित' इत्यंतेनादित्यमण्डलान्तर्वर्तिनि परमेश्वरे प्रागुदाहृतश्रुतित्रयार्थोपसंहारो दर्शितः । तस्माद्युक्तमेतद्गुणोपसंहारसिद्ध्यर्थं कृत्वाचिन्तया विद्यैक्यप्रसाधनमिति सूत्रे चकारः स्थानैक्यं विद्याभिन्नां दर्शयति परस्परानाम्नातगुणजातं चोपसंहार्यं दर्शयतीति समुच्चयार्थः । विद्यैक्ये सति तत्फलस्योपसंहारस्य ततस्सिद्धिसंभवेऽपि विद्यैक्यसाधकात्स्थानाद्यैक्यादेव तत्सिद्धिप्रदर्शनं कृत्वाचिन्तयापि सिसाधयिषितस्य विद्यैक्यस्य वस्तुतस्सिद्ध्यभावेऽपि गुणोपसंहारसिद्धिरप्रत्यूहेति सूचनार्थमिति सर्वं समञ्जसम् । इति मण्डलविद्याधिकरणम्॥१२॥

## नयमणिमालायाम् अथ मण्डलविद्याधिकरणम् ॥ १२ ॥

सू० ॥ दशर्यति च ॥ २२ ॥

सर्वांगबाहुमात्रगसुवर्णता रूपभेदेन । छांदोग्यतैत्तरीयगमण्डलविद्याविभेदः स्यात् ॥ २३५ ॥

दर्शयति स्थानैक्यं सर्वात्मकत्वं च विद्यैक्यम् । बाहुग्रहणं त्वेकं सर्वावयवोपलक्षणं युक्तम् ॥ २३६ ॥

ऐक्यमिह विद्ययोः कथमेका ह्यंगाश्रिता स्वतंत्रान्या । सत्यं तत्र विवक्षितमुभयो रूपैक्यमात्रमिह साध्यम् ॥ २३७ ॥

यः खलु सवितरि शंभोश्छंदोगैर्दिव्यविग्रहोऽधीतः । याजुषिकैरपि सैव स्थानैक्यादेर्न तत्र भेद इति ॥ २३८ ॥

इति मण्डलविद्याधिकरणम् ॥ १२ ॥

## सूत्रार्थचन्द्रिकायाम्

### अथ संबन्धाधिकरणम् ॥ ११ ॥

सू ॥ संबन्धादेवमन्यत्रापि ॥ २० ॥ न वा विशेषात् ॥ २१ ॥ दर्शयति च ॥ २२ ॥

**भगवत्पादमते,** बृहदारण्यके सत्यविद्यायामाधिदैविकपुरुषस्यादित्यस्य 'अह' रित्येतन्नाम ध्यानायोपदिष्टम् आध्यात्मिकस्य त्वक्षिपुरुषस्य'अहं' मित्येतन्नामेति । तत्र किमस्यां सत्यविद्यायां नाम्नोर्व्यवस्थया ध्यानं कर्तव्यमुत नामद्वयस्य प्रतिस्थानं ध्यानमिति **संशयः** । यथा शाण्डिल्यविद्यायामेकशाखायां विभागेनाधीतायामेकविद्यात्वसंबन्धादन्योन्यं गुणोपसंहारः पूर्वमुक्तः एवमन्यत्रापि सत्यविद्यायां भवितुं युक्तम् एकविद्यात्वसंबन्धादिति **पूर्वपक्षः । सिद्धान्तस्तु, सू ॥ न वा विशेषात्॥ २१॥ न वा**=नैवोभयोरुभयत्रोपसंहारः । कुतः । **विशेषात्**=तस्याहरिति तस्याहमिति चायतनव्यपाश्रयेणैवोपनिषदोर्विशेषोपदेशात् ॥

किं च **सू ॥ दर्शयति च ॥ २२ ॥** विद्यान्तरे 'हिरण्यश्मश्रु' रित्यादिना आदित्यपुरुषस्य रूपमुक्त्वा तद्रूपमक्षिपुरुषेऽतिदिशति—'तस्यैतस्य तदेव रूपं यदमुष्य रूपमिति' । सोऽयमतिदेशो विद्यास्थले स्थानभेदान्नोपसंहार इति दर्शयति । इतरथायमतिदेशो निरर्थक एव स्यात् अतो नाम्नोर्व्यवस्थेति सिद्धम् ॥

**श्रीकण्ठमते,** इदमधिकरणं सूत्रद्वयात्मकं 'दर्शयतिचे'ति सूत्रं त्वधिकरणान्तरमिति भेदः । अत्र संबन्धाधिकरणे विषयवाक्यपूर्वपक्षादिकमविशिष्टं पूर्वस्मात् । उभयत्रोभे नामनी विद्यैक्यादनियते इति **पूर्वपक्षः** । स्थानभेदाश्रयेणोपास्यभेदाद्विद्यैक्याभावान्नियते नामनी इति **सिद्धान्तः** । अतोऽविशिष्टमेव पूर्वस्मात् ॥

**इति श्रीकण्ठमते संबन्धाधिकरणम् ॥ ११ ॥**

## अथ संभृत्यधिकरणम् ॥ १३ ॥

## संभृतिद्युव्याप्त्यपि चातः ॥ २३ ॥

**राणायणीयानां खिलेषु श्रूयते । 'ब्रह्म ज्येष्ठा वीर्या संभृतानि । ब्रह्माग्रे ज्येष्ठं दिवमाततान । ऋतस्य ब्रह्म प्रथमोत जज्ञे । तेनार्हति ब्रह्मणा स्पर्धितुं कः' इति । यानि लोके त्रिपुरदहनकालकूटकबलनादीनि, तानि निरतिशयानि ज्येष्ठान्यनन्यसुकराणि श्रीकण्ठमूर्त्यादिभिः संभृतानि परं ब्रह्म आततान संपादितवत्, ज्येष्ठं हरिहरहिरण्यगर्भादिभ्योऽप्युत्कृष्टं ब्रह्मेति । अग्रे तेषामपि सृष्टेः प्रागिदं परमाकाशपदमाततान व्याप्याध्यास्तेति । तेषां महतां वीर्याणां संभृतिर्द्युव्याप्तिश्च सर्वासु परविद्यासूपसंहार्या न वा ॥**

**इति संशये ब्रह्मगुणत्वाविशेषादनारभ्याधीतत्वाच्च सर्वासु परविद्यासूपसंहार्या ॥**

---

## अथ संभृत्यधिकरणम् ॥ १३ ॥

विद्यैक्यभेदौ चानपेक्ष्य स्वतंत्रोपसंहारानुपसंहारनिरूपणप्रसंगादिदमधिकरणान्तरम्— **सू० ॥ संभृतिद्युव्याप्त्यपि चातः ॥ २३ ॥** वेदान्तेष्वक्रियाशेषस्य ब्रह्मगुणविभूतिवर्णनस्य तदुपासनैकफलत्वादनारभ्य तदाम्नानस्यापि तत्तत्प्रकरणश्रुतोपासनार्थत्वे संभवति तत्र तत्रोपासनान्तरविधिकल्पनागौरवायोगाच्च तत्तत्प्रकरणश्रुतोपासनासु संभृत्यादेरुपसंहारे कर्तव्ये किं सर्वासूपासनासूपसंहारः उत कासुचिदेवेति संशये विशेषाभावात्सर्वासूपसं-

---

**अथ मण्डलविद्याधिकरणम् ॥ १२ ॥**

**सू ॥ दर्शयति च ॥ २२ ॥** छान्दोग्ये तैत्तिरीयके च मण्डलविद्याम्नाता । सैका भिन्ना वेति **संशयः** । एकत्र 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः' इत्यादि श्रूयते । अन्यत्र 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः' इति त्रयीमयमण्डलान्तर्वर्तितया हिरण्मयं पुरुषं प्रस्तुत्य तस्योपसंहारे 'सर्वो वै रुद्र' इत्यारभ्य 'नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतये नमो नमः' इति सर्वात्मत्वं हिरण्यबाहुत्वमुमापतित्वं चाम्नायते । तत्र सर्वांगसुवर्णत्वबाहुमात्रसुवर्णत्वादिरूपभेदात् सर्वात्मत्वसर्वाधिपतित्वादिधर्मभेदाच्च न विद्यैक्यमिति **पूर्वपक्षः** । **सिद्धान्तस्तु,** न भिन्ना विद्या । 'अन्तरादित्ये' इति स्थानैक्यमेव विद्यैक्यं दर्शयति । 'हिरण्यबाहवे' इत्यत्र बाहुग्रहणस्योपलक्षणत्वेन तत्रापि सर्वाङ्गसुवर्णत्वस्यैव विवक्षितत्वात् जगदीश्वरस्यापि तदनुप्रवेशेन सर्वात्मत्वस्य युक्तत्वाच्च उभयत्रैकस्यैव प्रतिपाद्यत्वेनोभयत्राप्युमापतित्वादिकमुपसंहार्यमिति ॥ **इति श्रीकण्ठमते मण्डलविद्याधिकरणम् ॥ १२ ॥**

**रामानुजमते** तु इदमधिकरणं सूत्रत्रयात्मकमेव । विषयवाक्यपूर्वपक्षादिकं सर्वमविशिष्टमेव शांकरमतात् । अस्मिन्मते प्रायः श्रीकण्ठमतानुयायित्वेऽपि अस्मिन्नधिकरणे परमधिकरणरचनादिकं सर्वमनुकरोति शांकरमतमेवेति विशेषोऽवधेयः । श्रीकण्ठमते' दर्शयतिचे' त्यधिकरणान्तररचनायाः शिवपरत्वेनास्य मतस्यातिदवीयस्त्वात् शांकरमतप्रक्रियैवात्रानुसृतेति वेद्यम् ॥

**आनन्दतीर्थमते,** आद्यसूत्रस्य पूर्वाधिकरणेऽन्तर्भावात्तत्रैव तद्व्याख्यातम् । **सू ॥ न वाविशेषात् ॥** पूर्वं 'आत्मेत्येवोपासीते' त्यत्रात्मशब्दस्य ब्रह्माणं प्रति सकलगुणाभिधायकत्वमन्यान्प्रति कतिपयगुणाभिधायकत्वं चोक्तम् । तन्न युज्यते । प्रमाणाभावात् । किं तु ब्रह्माणं प्रति सकलगुणाभिधायकत्वमेव युज्यते अन्यत्र युज्यते इति **पूर्वपक्षः** । **सिद्धान्तस्तु** नास्त्यविशेषेण सर्वान्प्रति सर्वगुणाभिधायकत्वम् । नाप्यनियतगुणाभिधायकत्वम् । किंत्वधिकारिविशेषेण तत्तद्योग्यगुणाभिधायकत्वमेव । अतो यस्य यावन्तो गुणा आत्मशब्देन युगपत्प्रतीयन्ते तस्य तावन्त उपास्या इति निर्णयोपपत्तिः । **सूत्रार्थस्तु, नवा**='आत्मे'ति वाक्यस्यात्मशब्देन सर्वगुणानां ग्रहणं न वाभ्युपगम्यते । कुतः । **विशेषात्**=अधिकारियोग्यताविशेषमपेक्ष्य तस्य तद्योग्यगुणाभिधायकत्वात् इत्यर्थः ॥

**सू ॥ दर्शयति च ॥ २३ ॥** 'सर्वान्गुणानात्मशब्द' इति भाल्लवेयश्रुतिः स्वोक्तार्थं प्रतिपादयतीत्यर्थः ॥

**इति सूत्रार्थचन्द्रिकायां संबन्धाधिकरणम् ॥ ११ ॥**

इति प्राप्तेऽभिधीयते—न सर्वासूपसंहार्या व्याप्तिः । सामर्थ्यादल्पस्थानव्यतिरिक्तेषूपसंहार्या । 'देवा ह वै स्वर्गं लोकमगमंस्ते देवा रुद्रमपृच्छन् को भवानिति' इति निरतिशयसुखास्पदतया स्वर्गशब्दवाच्यं ब्रह्मादिपदेभ्योऽपि महत्तरं महास्थानं हि श्रूयते । ततः स्वल्पस्थानव्यतिरिक्तेषु वैश्वानराद्युपासनेषु द्युव्याप्तिरुपसंहार्येति । तत्सहचारान्महावीर्यसंभृतिरपि तत्रैवोपसंहार्या ॥

इति संभृत्यधिकरणम् ॥ १३ ॥

हारः । न चाल्पस्थानासु दहरशाण्डिल्यादिविद्यासु द्युव्याप्तिरुपसंहर्तुमशक्येति तत्साहचर्यात्संभृत्यादिकमपि तासु नोपसंहार्यमिति वाच्यम् । दहरादिविद्यास्वपि 'यावान्वा अयमाकाशो ज्यायान्दिव' इत्यादिश्रवणेन तद्वद्द्युव्याप्तेरप्युपसंहारसंभवादिति पूर्वपक्षः । वस्तुसामर्थ्यरूपाद्विशेषादल्पस्थानव्यतिरिक्तास्विव वैश्वानरोपासनादिषूपसंहार्या । 'यावान्वा' इत्यादिकमुपास्यमहिमख्यापनार्थं नोपास्यगुणसमर्पणार्थमिति न विरोधः । 'सत्यं ज्ञानमनन्त' मित्यत्र सत्ताज्ञानयोरेव ब्रह्मस्वरूपप्रतीत्यनुसंबंधित्वेन सर्वविद्यासूपसंहारः न तु-त्रिविधपरिच्छेदराहित्यरूपस्यानन्तत्वस्यापीति न विरोध इति सिद्धान्तः । भाष्यकृतव्याख्यानानुसारेण विषयवाक्ये 'संभृतानी'त्यस्य श्रीकण्ठादिभिरिति कर्त्रध्याहारो 'ब्रह्मे'त्यस्या 'तताने' त्यग्रिमक्रियापेक्षणं च द्रष्टव्यम् । सूत्रे 'संभृतिद्युव्याप्ति'इति समाहारद्वंद्वः । अल्पस्थानव्यतिरिक्तोपासनेष्वित्यध्याहारः । उपसंहार्यमिति पूर्वाधिकरणसूत्रे चशब्द सामर्थ्यलब्धस्यानुषंगः । अत इत्यनेन व्यवहितसूत्रोपात्तस्य 'विशेषा'दित्यस्य परामर्शः । वस्तुसामर्थ्यरूपाद्विशेषादित्यर्थः । इति संभृत्यधिकरणम् ॥ १३ ॥

नयमणिमालायाम् अथ संभृत्यधिकरणम् ॥ १३ ॥

**सू० ॥ संभृतिद्युव्याप्त्यपि चातः ॥ २३ ॥**

संभृत्यादिगुणौघः प्रकरणपाठस्य वैधुर्यात् । अविशेषात्सर्वास्वपि परविद्यासूपसंहार्यः ॥ २३९ ॥
द्युव्याप्तेरघटनमस्त्यल्पस्थानासु विद्यासु । तत्सहपठनात्संभृत्याद्या अपि तासु नोपसंहार्याः ॥ २४० ॥

इति संभृत्यधिकरणम् ॥ १३ ॥

## सूत्रार्थचन्द्रिकायाम्

अथ संभृत्यधिकरणम् ॥ १२ ॥

**सू ॥ संभृतिद्युव्याप्त्यपि चातः ॥ २३ ॥**

**भगवत्पादमते**, राणायणीयानां खिलेषु पठ्यते—'ब्रह्म ज्येष्ठा वीर्या संभृतानि । ब्रह्माग्रे ज्येष्ठं दिवमाततान' इति । तत्र श्रूयमाणं संभृतिद्युव्याप्त्यादिकं तदीयोपनिषद्विहितशाण्डिल्यादिब्रह्मविद्यासूपसंहर्तव्यं न वेति **संदेहः** । उपसंहर्तव्यमिति **पूर्वपक्षः** । **सिद्धान्तस्तु**, वीर्यसमृद्धिद्युलोकव्याप्त्यादिकं नोपसंहर्तव्यम् । कुतः । **अतश्च**=नाम्नोरिव व्यवस्थापकस्थानविशेषादेव । अतस्संभृत्यादिगुणविशिष्टमुपासनान्तरं तत्र विधेयमिति सिद्धम् ॥

**श्रीकण्ठमते** तथा **रामानुजमते** च प्रायो नास्ति विशेषः पूर्वस्माद्विषयवाक्यादिषु । तत्रापि संभृतिद्युव्याप्त्यादीनां किं सर्वासु विद्यासूपसंहारः उत स्थानविशेषोपासनेषु नियम इति **संशये** अनारभ्याधीतत्वात्तेषां सर्वासूपसंहार इति पूर्वपक्षमुद्राव्य द्युव्याप्तिसामर्थ्यात्तस्य हृदयाद्यल्पस्थानेषूपसंहारायोगात्तत्साहचर्याच्चेतरेषामल्पस्थानविहितासु विद्यासु नोपसंहार इति सिद्धान्तितत्वादस्ति किंचिदिव वैलक्षण्यं सिद्धान्तस्वरूपे । **सूत्रार्थस्तु**, **संभृतिद्युव्याप्त्यपि**=समाहारद्वन्द्वैकवद्भावः । संभृतिप्रभृति गुणजातमपि **अत एव**=स्थानविशेषसंबन्धनियमान्नियतं न सर्वत्रोपसंहर्तव्यमिति भावः ॥

**आनन्दतीर्थमते** पूर्वमानन्दादिगुणचतुष्टयमेव सर्वमुमुक्षूपास्यमित्युक्तं युक्तं न वेति **संदेहः** । संभृतिद्युव्याप्त्योः 'उक्षा स द्यावापृथिवी'ति श्रुतयोस्सकलमुमुक्षूपास्यत्वात्सर्वापेक्षितत्वेन फलानुसार्युपासनस्य कर्तव्यत्वान्मोक्षे तयोस्सत्वाच्च न युक्तं गुणचतुष्टयोपासनं मुमुक्षूणामिति **पूर्वपक्षः** । **सिद्धान्तस्तु**, न संभृतिद्युव्याप्ती सर्वोपास्ये किं तु देवाद्युपास्ये एव । योग्यतायां विशेषसद्भावात् । योग्यत्वाभावे च फलापेक्षा नोपासनप्रयोजिका, अनर्थप्राप्तिप्रसंगात् । इति । **सूत्रार्थस्तु**, अपिपदेन नञः समाकर्षः । चशब्द एवार्थे । **संभृतिद्युव्याप्ति**=सम्यग्भरणप्रकाशव्याप्ती न सर्वोपास्ये । किं तु देवाद्युपास्ये एव । कुतः । **अत एव**=अधिकारियोग्यतायां विशेषसद्भावत एव । इति ॥

इति सूत्रार्थचन्द्रिकाया संभृत्यधिकरणम् ॥ १२ ॥

## अथ पुरुषविद्याधिकरणम् ॥ १४ ॥

### सू ॥ पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॥ २४ ॥

छान्दोग्यतैत्तिरीयकयोः पुरुषविद्याऽऽम्नाता । 'पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि तत् प्रातःसवनम्' इत्यादिरेकत्र । 'तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिः' इत्यादिरन्यत्र । सोभयत्राभिन्ना भिन्ना वेति संशयः ॥

उभयत्र पुरुषविद्येति नामाभेदाद्यज्ञावयवकल्पनासाम्याच्च अभिन्ना ॥

इति प्राप्तेऽभिधीयते—तैत्तिरीये समाम्नातानां यजमानपत्न्यादीनां यज्ञावयवानां सवनत्रयादीनां च छान्दोग्येऽनाम्नानात्, तत्रान्यथैव सवनत्रयादिकल्पनाच्च भिन्नैवोभयत्र पुरुषविद्या । तैत्तिरीयके हि 'यत् सायं प्रातर्मध्यन्दिनं च तानि सवनानि' इति सवनत्रयकल्पनम् । छान्दोग्ये पुरुषायुषं त्रेधा विभज्य

---

## अथ पुरुषविद्याधिकरणम् ॥ १४ ॥

देशभेदसंबन्धिविद्यासु गुणानुपसंहारनिरूपणप्रसङ्गेन चतुर्विंशतिवर्षादिकालभेदसंबन्धिविद्यायां गुणानुपसंहारं दर्शयतुमधिकरणान्तरम्—सू ॥ पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॥२४॥ छान्दोग्ये पुरुषस्य यज्ञत्वकल्पनामुपक्रम्य यज्ञावयवास्सम्पादिताः षोडशोत्तरवर्षशतमिते पुरुषायुषे चतुर्विंशतिर्वर्षाणि प्रातस्सवनं चतुश्चत्वारिंशद्वर्षाणि माध्यन्दिनं सवनमष्टाचत्वारिंशद्वर्षाणि तृतीयसवनं यदशिशिषति पिपासति न रमते ता दीक्षाः यदश्नाति पिबति रमते ता उपसदः यद्धसति भक्षयति मिथुनीभवति तानि स्तुतशस्त्राणि यत्तपो दानमार्जवमहिंसा सत्यवचनं ता दक्षिणाः यन्मरणं तदवभृथ इति तत्तत्सवनतया विभक्ते वयसि रोगादिप्रादुर्भावे सति स ब्रूयात् 'प्राणा वसव इदं मे प्रातस्सवनं माध्यन्दिनं सवनमनुसंतनुते'त्यादयस्तन्निवृत्तये जप्तव्या मन्त्रा विहिताः । 'प्रह षोडशं वर्षशतं जीवती'त्यायुःप्राप्तिरस्याः पुरुषविद्यायाः फलमुक्तम् । इमां विद्यामाङ्गिरसोऽघोरनामा ऋषिः कृष्णाय देवकीपुत्रायोपदिदेश स इमां विद्यां लब्ध्वा विद्यान्तरवितृष्ण एवैतद्विद्यानिष्ठो बभूवेति विद्याप्रशंसा च कृता । तैत्तिरीयके तु विद्वत्संबन्धियज्ञानुवादेन यज्ञावयवास्सम्पादिताः न तु विदुषो यज्ञत्वकल्पनमुपक्रान्तम् । विद्वान्यज्ञ आत्मा यजमान इति तादर्थ्येन पृथग्वाक्यान्तराभावात् । विद्वत्सम्बन्धिनः कस्यचिद्यज्ञस्य प्रागनुक्तत्वेऽपि वक्ष्यमाणामात्मादिषु यजमानादिकल्पनामालोच्य तदर्थसमूहस्य यज्ञत्वेन प्रकरणलब्धेन विद्वत्संबन्धित्वेन चानुवादतः प्रतीतैकवाक्यतानिर्वाहोपपत्तेश्च । यज्ञावयवाः—स्वात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदश्शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमश्शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद्यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यत्सञ्चरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधो यत्प्रातर्मध्यन्दिनꣳ सायं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मा-

सवनत्रयकल्पनम्। तैत्तिरीये फलाश्रवणात् 'ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीत' इति ब्रह्मविद्यामभिधाय 'ब्रह्मणो महिमानमाप्नोति' इति तत्फलं चाभिधाय 'तस्यैवं विदुषः' इत्यादिनाऽऽम्नाता पुरुषविद्या प्रस्तुतब्रह्मविद्याङ्गमिति तत्फलं ब्रह्मप्राप्तिरेव। छान्दोग्ये 'प्र ह षोडशं वर्षशतं जीवति' इति फलं श्रुतम्। ततः फलभेदादवयवभेदाच्च न विद्यैक्यमिति ॥

इति पुरुषविद्याधिकरणम् ॥ १४ ॥

---

स्यानि य ऋतवस्ते पशुबन्धा ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणास्सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथ' इति । इदं तु 'ब्रह्मणो महिमानमाप्नोती'ति पूर्वप्रस्तुतब्रह्मविद्यासंबन्ध्येवानूदीतम्। शमयिता भोज्यानां संस्कर्ता। सर्ववेदसं दक्षिणेति भट्टभास्करेण व्याख्यातम्। इत्थं पुरुषविद्याद्वये सवनत्रयादिकल्पनं फलं चेत्येतत्सर्वमपि परस्परविलक्षणमिति स्पष्टमेव। एवमाम्नायपाठादेव स्पष्टभेदे यथैकस्यां पुरुषविद्यायां सवनत्रयादिकल्पनं फलं चाम्नायते न तथान्यत्राम्नायत इत्येवं सूत्रकृता व्युत्पादनीयम्। नात्र किंचिदस्ति। यथाकथंचित्सवनत्रयादिकल्पनं यत्किंचित्फलश्रवणं चास्तीत्येतावता विद्यैक्यशङ्का तु सर्वत्रातिप्रसक्ता। सर्वास्वपि हि विद्यासु यत्किंचिद्रूपविशिष्टं यत्किंचिदुपास्यं यत्किंचित्फलं चास्त्येव। निराकृता च यथाकथंचित्साम्यावलम्बनानामैक्यावलम्बना च विद्यैक्यशङ्का 'अन्यथात्वं च शब्दादिति चे'दित्यधिकरणे। तत्र बहुसाम्ये सत्यप्येकत्रोद्गीथावयवत्वे प्राणदृष्टिरन्यत्र कृत्स्नोद्गीथे तदुद्गानकर्तरि वेत्येतावन्मात्रवैषम्येण विद्याभेद उक्तः। इह सवनत्रयकल्पनादेस्सर्वस्यापि वैषम्ये कथं तत एव विद्याभेदो न सिद्ध्येत्। न च सर्वस्यापि वैलक्षण्ये मरणावभृथत्वमात्रमभेदसाधकं तस्मान्निष्प्रयोजनमिदमधिकरणमिति चेत् उक्तमस्य प्रयोजनं मण्डलविद्याधिकरणे 'पुरुषविद्ययोः फलवैलक्षण्यं रूपवैलक्षण्यं च परस्परगुणानुपसंहारप्रयोजकं न स्वातन्त्र्यपारतन्त्र्यवैलक्षण्यमिति विभावनमस्य प्रयोजन'मिति तदेवानुसंधेयम्। 'तैत्तिरीयके फलाश्रवणा'दिति भाष्यस्याग्रिमसाध्ये हेतुनिर्देशकस्य प्रधानभूतब्रह्मविद्याफलव्यतिरेकेण फलान्तराश्रवणादित्यर्थः। अन्यथा पूर्वानुवाकान्ते ब्रह्मविद्याफलत्वेन श्रुताया ब्रह्ममहिमावाप्तेः 'स्तस्यैवं विदुष' इत्याद्यनुवाकान्तेऽपि श्रुतत्वेन फलाश्रवणहेतोरसिद्धिप्रसङ्गात्। न चोभयत्रापि 'ब्रह्मणो महिमानमाप्नोती'ति फलश्रवणेन पूर्वोत्तरानुवाकविहितयोर्ब्रह्मविद्यापुरुषविद्ययोस्समप्राधान्यं शङ्कनीयम्। 'तस्यैवं विदुष' इत्यादिना प्रागुक्तब्रह्मविद्यावतः पुरुषविद्याविधानेनोपक्रम एव तस्यास्तदङ्गत्वावगमात्। 'सोमापौष्णं त्रैतमालभेत पशुकाम' इति श्रुतस्य प्रधानफलस्य तदङ्गे यूपोदुम्बरत्वइवात्रापि प्रधानफलस्याङ्गेऽनुवादोपपत्तेश्च। सूर्याचन्द्रमःप्राप्तिपूर्वकत्वविशेषप्रतिपादनार्थत्वेनानुवादसाफल्योपपत्तेश्च ॥ इति पुरुषविद्याधिकरणम् ॥ १४ ॥

---

नयमणिमालायाम् अथ पुरुषविद्याधिकरणम् ॥ १४ ॥

सू ॥ पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॥ २४ ॥

एकत्वात्संज्ञाया यज्ञावयवप्रकल्पनासत्त्वात्। फलभेदानाम्नानान्नैकत्वं पुरुषविद्ययोर्युक्तम् ॥ २४

संज्ञैकत्वे सत्यपि यज्ञावयवप्रकल्पनावैरूप्यात्। परविद्याशेषत्वस्वातन्त्र्याभ्यां च भिन्नतैव तयोः ॥ २४२ ॥

इति पुरुषविद्याधिकरणम् ॥ १४ ॥

## अथ वेधाद्यधिकरणम् ॥ १५ ॥

### सू ॥ वेधाद्यर्थभेदात् ॥ २५ ॥

**तैत्तिरीयाणामुपनिषदुपक्रमे श्रुतौ 'शं नो मित्रः शं वरुणः' 'सह नाववतु' इति मन्त्रौ विद्याङ्गभूतौ न वा ॥**

**इति संशये विद्यासन्निधिवशाद्विद्याङ्गभूताविति प्राप्ते उच्यते—यथा आथ-**

---

## अथ वेधाद्यधिकरणम् ॥ १५ ॥

अथ तैत्तिरीयके ब्रह्मविद्याप्रकरणपाठात् 'तस्यैवं तिदुषो यजमानस्ये'ति विद्यासमभिव्याहाररूपाद्वाक्याच्च पुरुषविद्याया इव 'शं नो मित्र' इत्यादिमन्त्रयोर्ब्रह्मविद्यासन्निधिपाठाद्विद्याविषयब्रह्मप्रकाशनसामर्थ्यरूपलिङ्गाच्च ब्रह्मविद्याङ्गत्वं स्यादिति शङ्कानिराकरणार्थमधिकरणान्तरम्—सू० ॥ वेधाद्यर्थभेदात् ॥ २५ ॥ अयमत्र पूर्वपक्षाभिप्रायः । 'वदिष्यामि अधीतमस्त्वि'त्यध्ययनप्रकाशनसामर्थ्यरूपालिङ्गादध्ययन इव विद्यासन्निधिपाठरूपात्स्थानप्रमाणादग्रे विधास्यमानासु विद्यास्वपि विनियोगः स्यात् । क्वचिद्विनियुक्तानां मन्त्राणामन्यत्रापि विनियोगस्य बहुलमुपलम्भेन विरोधाभावात् । विरोधाभावे च प्रबलविनियुक्तस्य दुर्बलेनापि विनियोगसंभवात् । विद्यासु विनियोगाभावे तत्सन्निध्याम्नानस्यानर्थक्यप्रसङ्गेनात्र स्थानस्य लिङ्गेन समानबलत्वाच्च । अतएव 'अथातोऽग्निमग्निष्टोमेनानुयजन्ती'ति वाक्यविनियुक्ताऽप्यवरुद्धेऽपि क्रतावुत्तरवेद्याः क्रतुप्रकरणाम्नानवैयर्थ्यपरिहाराय तस्या अपि क्रत्वङ्गत्वमाश्रितम् । अस्ति च सन्निध्यनुगुणं लिङ्गमपि विद्यासंबन्धिब्रह्मप्रकाशनसामर्थ्यरूपम् । तस्मादुदाहृतमन्त्रयोर्विद्यास्वपि विनियोग इति । सिद्धान्ताभिप्रायस्त्वयम्—साक्षादध्ययनप्रकाशनसामर्थ्यरूपालिङ्गाद्विनियोजकश्रुतिमात्रकल्पनया शीघ्रमध्ययनविनियोगे सति तत एव मन्त्रयोर्नैराकाङ्क्ष्यात्सन्निधानेन स्वस्वप्रकरणाम्नाताङ्गैर्निराकाङ्क्षाणामपि विद्यानामाकाङ्क्षामुत्थाप्य तया मन्त्रयोर्विद्याभिरेकवाक्यतां परिक-

---

## सूत्रार्थचन्द्रिकायाम्

### अथ पुरुषविद्याधिकरणम् ॥ १४ ॥

**सू ॥ पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥**

**भगवत्पादमते,** अत्र पैङ्गिरहस्ये 'पुरुषो वाव यज्ञ' इति पुरुषविद्या श्रूयते । तत्राशीर्मन्त्रप्रयोगादयो धर्माश्च श्रूयन्ते । तैत्तिरीयेऽपि 'तस्यैवं विदुषो यज्ञस्यात्मा' इत्यादि । तत्र पैङ्गिरहस्योक्ताः पुरुषयज्ञधर्मास्तैत्तिरीयकेऽप्युपसंहार्या वा न वेति **संदेहः** । उपसंहार्या इति **पूर्वः पक्षः** । **सिद्धान्तस्तु, पुरुषविद्यायामिव**=यथा पैङ्गिनां पुरुषविद्यायां पुरुषो यज्ञत्वेन कल्पितः तदीयमायुस्त्रेधा विभज्य सवनत्वेन कल्पितम्, अशिशिषादीनि च दीक्षादिभावेन कल्पितानि, तथा **इतरेषां**=तैत्तिरीयकाणां पुरुषविद्यायां सवनत्वादीनामनाम्नानात् । तेषां हि पुरुषविद्यायां पुरुषसंबन्धियज्ञोऽनुक्रान्तः । अतो विद्यैक्याभावान्नोपसंहर्तव्या इति सिद्धम् ॥

**श्रीकण्ठमते,** तथा **रामानुजमते** च पूर्ववदेव संदेहपूर्वपक्षादिकं प्रायस्सर्वमविशिष्टमेवेति नात्र पृथग्विस्तरः ॥

**आनन्दतीर्थमते,** पूर्वोक्तो गुणोपसंहारः कर्तव्यो वा उत न कर्तव्यः । इति **संशये** बहल्पगुणोपासनयोग्याधिकारिणां बहल्पगुणविधायकविद्याविशेषपरिग्रहेणाभिमतार्थसिद्धेर्निरर्थको गुणोपसंहार इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** कचिदपि विद्यायां सर्वगुणानामनुक्तत्वात्सर्वविद्योत्तमायां पुरुषसूक्तविद्यायामपि केषांचिदेवोक्तत्वादन्येषां च गुणानामनाम्नानाच्च सर्वगुणोपासकैर्ब्रह्मादिभिरवश्यं कर्तव्य एव सर्वविद्यागुणोपसंहारः । अन्यैरपि स्वस्वापेक्षितफललाभाय एकस्यामेव विद्यायां स्वापेक्षितसर्वगुणोक्तिनियमाभावाद्गुणोपसंहारः कर्तव्य एवेति ॥

**इति सूत्रार्थचन्द्रिकायां पुरुषविद्याधिकरणम् ॥ १४ ॥**

वेणिकानामुपनिषदारम्भे पठितः 'शुक्रं प्रविध्य हृदयं प्रविध्य' इत्यादिमन्त्रो हृदयवेधादिप्रकाशनसामर्थ्यरूपाल्लिङ्गादभिचारशेषः । यथा वा ऐतरेयिणां वाजसनेयिनां चोपनिषदारम्भे पठितं महाव्रतं प्रवर्ग्यरूपं च कर्म श्रुत्यादिविनियोगात् क्रतुशेषः । तथेमावपि मन्त्रौ 'ऋतं वदिष्यामि···तेजस्विनावधीतमस्तु' इत्यादिलिङ्गादध्ययनशेषभूतावेव न विद्याङ्गभूतौ, प्रयोजनभेदात्, श्रुतिलिङ्गवाक्येभ्यः सन्निधेर्दुर्बलत्वात् ॥

इति वेधाद्यधिकरणम् ॥ १५ ॥

---

ल्प्यैकवाक्यतानिर्वाहाय मन्त्रयोर्ब्रह्मप्रकाशनद्वारा तद्विद्याप्रकाशनसामर्थ्यमपि कल्पयित्वा तद्विनियोजकश्रुतिकल्पनापूर्वकं विद्यासु विनियोगः कार्य इत्येवं विलम्बितप्रतीतिकेन विनियोगान्तरं न कर्तव्यम् । आकाङ्क्षामूलत्वादेवंविधकल्पनायाः । मन्त्रयोर्विद्यासन्निध्याम्नानं तु विद्याभागवदरण्येऽनुवाक्यत्वलाभार्थं भविष्यतीति । सूत्रे वेधाद्युपादानं दृष्टान्तार्थमिति भाष्य एव व्याख्यातम् । यद्यपि वेधमन्त्रादीनामप्यविशिष्टस्तत्तदुपनिषदारम्भे समाम्नायः । तथापि 'हृदयं प्रविध्य धमनीः प्रविध्ये'त्याद्यर्थपर्यालोचनायामाथर्वणिकमन्त्रसमाम्नायस्याभिचारिककर्मस्वेव लिङ्गाद्विनियोग इति स्पष्टम् । तथा प्रवर्ग्यस्य ज्योतिष्टोमादिषु महाव्रताख्यस्य कर्मणो गवामयनादिषु च यथायथं श्रुत्यादिभिर्विनियोग इति स्पष्टमिति तदंशो दृष्टान्ततया योजितः । प्रयोजनभेदादिति ॥ अध्ययनप्रकाशनरूपप्रयोजनभेदादित्यर्थः । श्रुतिलिङ्गादीत्यत्र वाक्येभ्य इति प्रवर्ग्यमहाव्रतादिसर्वाभिप्रायम् ॥

इति वेधाद्यधिकरणम् ॥ १५ ॥

---

## नयमणिमालायाम् अथ वेधाद्यधिकरणम् ॥ १५ ॥

सू ॥ वेधाद्यर्थभेदात् ॥ २५ ॥

शं नो मित्रस्सहनाविति मन्त्रौ तैत्तिरीयकाम्नातौ । विद्यासंनिधिपठनाद्विद्याङ्गत्वेन गम्येते ॥ २४३ ॥
अध्ययनलिङ्गवत्त्वात्तदङ्गभूताविमौ मन्त्रौ । वेधादिवत्तु विद्यासंनिधिरारण्यकत्वकृतः ॥ २४४ ॥

इति वेधाद्यधिकरणम् ॥ १५ ॥

## सूत्रार्थचन्द्रिकायाम्

### अथ वेधाद्यधिकरणम् ॥ १४ ॥

सू ॥ वेधाद्यर्थभेदात् ॥ २५ ॥

**भगवत्पादमते,** अत्र आथर्वणिकानामुपनिषदारम्भे 'सर्वं प्रविध्य हृदयं प्रविध्ये'त्यादयो मन्त्राः पठिताः । काण्वानामुपनिषदादौ 'देवा ह वै सत्रं निषेदु'रित्यादि प्रवर्ग्यब्राह्मणं पठितम् । तत्र किमेते 'सर्वं प्रविध्ये'त्यादयो मन्त्राः प्रवर्ग्यादीनि कर्माणि च विद्यासूपसंह्रियेरन्न वेति **संशयः** । उपसंह्रियेरन्निति **पूर्वः पक्षः** । **सिद्धान्तस्तु, वेधाद्यर्थभेदात्**='सर्वं प्रविध्ये'त्यादिमन्त्रप्रकाशितानां वेधादीनामर्थानामाभिचारिककर्मादिसमवेतानां भेदात् विद्यास्वसमवेतत्वादित्यर्थः । एवं मन्त्राणां विद्याङ्गत्वाभावात्प्रवर्ग्यादिकर्मणां विद्याशेषत्वाभावाच्च नोपसंह्रियेरन्निति ॥

**श्रीकण्ठमते,** तथा **रामानुजमते** च प्रायोऽविशिष्टमेव पूर्वस्मात्संदेहपूर्वपक्षादिकम् । विषयवाक्यनिरूपणे परं 'शं नो मित्रः शं वरुणः' इत्यादयो मन्त्रा अप्युदाहृता इत्यतो नास्ति विशेषः पृथक्प्रपञ्चनार्ह इति वेद्यम् ॥

**आनन्दतीर्थमते,** अत्र 'अग्ने त्वचं यातुधानस्य भिन्धि, तं प्रत्यञ्चमर्चिषा विध्य मर्मन्' इत्यादि **वाक्यं विषयः** । अत्रोक्ता दुष्टनिग्रहफला वेधादयो गुणास्सर्वमुमुक्षूपास्या न वेति **संशये** दुष्टनिग्रहस्य सर्वापेक्षितत्वात्सर्वमुमुक्षूपास्या एव । अत आनन्दादिगुणचतुष्टयमेव सर्वमुमुक्षूपास्यमित्युक्तमयुक्तमिति **पूर्वपक्षः** । **सिद्धान्तस्तु, वेधादि**=भिन्धिविध्यतृणीहीत्यादिकं न सर्वोपास्यम् । कुतः । **अर्थभेदात्**=वेधादीनां यत्याद्युपास्यत्वाभावात् वेधाद्युपासनफलस्य हिंसादेर्यत्यादियोग्यफलाद्विलक्षणत्वात् । अतो वेधादिकं न सर्वोपास्यमानन्दादि चतुष्टयमेव सर्वमुमुक्षूपास्यमिति सुस्थमिति सिद्धमिति ॥

इति सूत्रार्थचन्द्रिकायां वेधाद्यधिकरणम् ॥ १४ ॥

## अथ हानोपायनाधिकरणम् ॥ १६ ॥

**सू ॥ हानौ तूपायनशब्दशेषत्वात्कुशाछन्दस्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥**

**विदुषो ब्रह्म प्राप्नुवतः पुण्यपापयोर्विमोचनमेकस्यां शाखायामाम्नातम् । विमुक्तयोः पुण्यस्य प्रवेशस्थानं सुहृदः, पापस्य प्रवेशस्थानं शत्रव इति एकस्यां शाखायामाम्नातम् । अन्यस्यां विमोचनं प्रवेशस्थानं चेत्युभयमाम्नातम् । सर्वं चिन्तनार्थमेव । इह विमोचनं प्रवेशस्थानं चेत्यनयोः समुच्चयेन सर्वत्र चिन्तनम्? उत विकल्पेनेति संशयः ॥**

---

## अथ हानोपायनाधिकरणम् ॥ १६ ॥

सू० ॥ हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥ ताण्डिशाखायामथर्वणिकशाखायां च पुण्यपापयोः केवलं हानं श्रुतम् । शाठ्यायनिशाखायां केवलमुपायनं श्रुतम् । कौषीतिकशाखायामुभयमपि श्रुतम् । सर्वमिदमनुचिन्तनार्थं न केवलं विद्यामहिमप्रख्यापनार्थम् । विद्याप्रकरणपाठस्य स्थानगुणादिपाठवदनुचिन्तनार्थत्वस्यैवोचितत्वात् 'ज्यायान्दिव' इत्यादाविव विरोधाभावाच्च । न च स्थानगुणादिपाठ एवानुचिन्तनार्थः फलपाठस्तु तद्वत्तावोधनैकप्रयोजन इति वाच्यम् । शाण्डिल्यविद्यायां 'एतमितः प्रेत्याभिसंभवितास्मी'ति फलभूताया एव ब्रह्मप्राप्तेरनुचिन्तनीयत्वोक्तिदर्शनात् । किंचा'श्वइव रोमाणी'ति ताण्डिशाखायामन्ते ब्रह्मप्राप्त्या सह हानस्यानुचिन्तनीयत्वमुच्यते । तत्समानार्थतया कौषीतकिशाखायामपि हानस्यानुचिन्तनीयत्वसिद्धौ तत्साहचर्यादुपायनस्याऽपि तत्सिध्यति । तदेवोपासनासु शाठ्यायनशाखायां श्रूयत इति तत्राऽपि तत्सिध्यति । एवं हानोपायनयोरनुचिन्तनीयत्वसिद्धौ किं तयोरेकैकमुभयं च विकल्पेनानुचिन्तनीयमुतोभयमपि सर्वत्रोपसंहरणीयमित्युपायनस्य हानं प्रत्यशेषत्वशेषत्वाभ्यां संशये पूर्वपक्षः । यथा विद्यासन्निधौ श्रुतं वेधमन्त्रादिकं विद्यासु नोपसंहार्यं तथा क्वचिच्छाखायां हानसन्निधौ श्रुतमुपायनमन्यत्र केवलहानश्रुतौ नोपसंहार्यम् । एवं केवलोपायनश्रुतौ हानमपि नोपसंहार्यम् । उपसंहारप्रयोजकस्य विद्यैक्यस्याभावात् । ननु हानोपायनयोः परस्परापेक्षतयोपसंहारः स्यात् । उपायनं हि हानमन्तरेणानुपपन्नं हानमपेक्षते । हानमप्युपायनमपेक्षत एव । अवश्यं हि कुतश्चित्प्रहीणं किंचिदुपैति यथाश्वात्प्रहीणं रोमबृन्दं भूभागमिति चेत् । सत्यम् । अर्थस्वभावपर्यालोचनया तथैवानुचिन्तनं त्वेकैकस्योभयस्य च विकल्पेनैव कर्तव्यम् । न समुच्चयेन । समुच्चयस्य सर्वत्र कौषीतकिवाक्येनैव प्राप्तिसंभवे शाखान्तरेष्वेकैकाम्नानस्य विकल्पार्थत्वाभाववैयर्थ्यप्रसङ्गात् । न च शाखान्तराधिकरणोक्तरीत्याध्येतृभेदेन सार्थकत्वमुपपादयितुं शक्यम् । अविशेषपुनःश्रवणे हि तथा वक्तुं युक्तमिह तु शाखाभेदेनैकैकस्योभयस्य च श्रवणमुदितानुदितहोमश्रवणवद्विकल्पार्थमित्येव न्याय्यमिति भाष्ये हानश्रुतावुपायनस्यानुपसंहार्यत्वोक्तिरुपायनश्रुतौ हानानुपसंहार्यत्वस्याप्युपलक्षणम् । सिद्धान्तस्तु एकैकश्रुतावप्यन्यदप्युपसंहार्यम् । शाठ्यायनिशाखायां दायसंक्रमणदृष्टान्तेन ह्येवमवगम्यते । यथा मुच्यमानस्य धने तं प्रति यथेष्टविनियोगार्हता हीयते पुत्रान्प्रति च सा सम्पद्यते । एवं तस्य पुण्यपापयोस्तं

**किं तावत् प्राप्तम्? 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इति शाट्यायनके श्रूयते। ताण्डिशाखायाम् 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य' इति श्रूयते 'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इति चाथर्वणे। अत्र विदुषः पापपरित्यागप्रतिपादकश्रुतौ परित्यक्तयोः पुण्यपापयोः प्रवेशस्थानं नोपसंहार्यम्, परित्यागश्रुतावश्रुतत्वात्॥**

---

प्रति फलजननार्हता हीयते, प्रियाप्रियान्प्रति च सम्पद्यत इति श्रुतिषु हानोपायनशब्दाभ्यां विवक्षितमिति तत्र हानं ब्रह्मप्रेप्सोर्मुच्यमानस्य फलरूपत्वाद्यथोपासनं फलमिति तत्क्रतुन्यायतस्सर्वासु विद्यास्वनुचिन्तनीयतयोपसंहर्तव्यम्। एवञ्च तस्य फलस्योपपादकतया तच्छेषत्वेन फलभूतमुपायनमपि सर्वत्रोपसंहार्यम्। पुण्यपापयोः फलजननार्हत्वस्यान्यविषयसंक्रान्तौ हि हानमुपपन्नं भवति। संकीर्तनप्रायश्चित्तादिभिरनष्टतया विद्यमानयोस्तयोः फलजनकत्वावश्यंभावादिति सूत्रे हानावुपायनमुपसंहर्तव्यम्। तस्य हानोपपादकतया फलरूपं हानं प्रति शेषत्वेन फलकोटिनिविष्टत्वादित्युक्तेरुपायनेऽपि हानमुपसंहर्तव्यम्। हानस्य तदुपपादनीयफलरूपत्वादिति सहेतुकसाध्यान्तरस्याप्युपलक्षणम्। शाखान्तरोक्तार्थापेक्षितस्य शाखान्तराद्ग्रहणे दृष्टान्ताः कुशाच्छन्द इत्यादिसौत्रपदेनोक्ताः कुशाः। उद्गातॄणां प्रस्तावकर्मणि विनियुक्ता उदुम्बरदारुशलाकाः। छन्दांसि देवप्रकाशका असुरप्रकाशकाश्च कर्मविशेषे क्रमेण प्रयोक्तव्या मन्त्राः। स्तुतिरुक्थ्यस्तोत्रानन्तरं सूर्यास्तमयसन्निहिते काले समारम्भणीयं स्तोत्रम्। उपगानमुद्गातृषु स्तुवत्सु अध्वर्युव्यतिरिक्तैः कैश्चन ऋत्विग्भिः कर्तव्यं हो इति शब्दोच्चारणम्। एतेषामुक्तो विशेषः शाखान्तरवाक्यैकवाक्यतया लब्ध इति दृष्टान्तीकरणम्। ननु हानोपायनयोः क्वचिदेकं क्वचिदन्यत्क्वचिदुभयमित्याम्नानभेदवैयर्थ्यपरिहाराय विकल्पस्समाश्रयणीयो न समुच्चय इति शङ्कानिराकरणार्थं तदुक्तमिति सूत्रशेषः। शाखान्तराम्नातोपसंहारे सर्वास्वपि शाखासु हानोपादानशब्दवत्त्वाविशेषो लभ्यत इत्यविशेषपुनःश्रवणमध्येतृभेदेन परिहर्तुं शक्यम्। अतोऽदृष्टदोषदुष्टो विकल्पो न समाश्रयणीयः। एवं शाखान्तरगतशब्दोपसंहारेणाऽपि परिहर्तुं शक्ये विकल्पेन विकल्पस्समाश्रयणीय इत्येतज्जैमिनिनापि 'अपि तु वाक्यशेषः स्या'दित्यादि सूत्रेणोक्तमिति सूत्रशेषस्याभिप्रायः। 'यज्ञेषु येयजामहं करोति नानूयाजे'ष्वित्यनारभ्य श्रूयते। तत्र सामान्यतस्सर्वयज्ञेषु येयजामहस्य विधिश्रुतौ विशिष्यानूयाजेषु तन्निषेध इति पर्युदासाधिकरणे पूर्वपक्षः कृतः। तथा सत्यनूयाजेषु येयजामहतन्निषेधयोरुभयोरपि श्रुतितः प्राप्तत्वेनातिरात्रे षोडशिग्रहणाग्रहणयोरिव विकल्पो भवेत्। न चात्र पदाहवनीयशास्त्रन्यायः प्रवर्तते। पदशास्त्रं ह्याहत्य होमविशेषविषयत्वाद्धोमसामान्यद्वारा तद्विषयेऽपि होमे प्राप्तव्यपर्यवसानादाहवनीयशास्त्रात्प्रागेव प्रवर्तत इति शीघ्रप्रवृत्तिकेन पदशास्त्रेणापहृतविषयविशेषमाहवनीयशास्त्रं तदितरविशेषविषयतया व्यवतिष्ठत इति युक्तम्। युक्तञ्च विशेषशास्त्रतया शीघ्रप्रवृत्तेन 'शरमयं बर्हिरि'ति शास्त्रेणापहृतबर्हिरङ्गं कल्पनीयचोदकशास्त्रं तदितराङ्गविषयतया व्यवतिष्ठत इति। इह तु सामान्यविषयमपि विधिशास्त्रमेवानूयाजानपि क्रोडीकृत्य प्रथमं प्रवर्तत इति वक्तव्यम्। अ-

इति प्राप्ते ब्रूमः—हानिर्विमोचनं, उपायनं प्रवेशः। केवलहानावाम्नातायां केवलोपायने चाम्नाते इतरेतरसमुच्चय एव न्याय्यो न विकल्पः । उपायनशब्दस्य हानिवाक्यशेषत्वात् तच्छेषत्वम्, त्यक्तयोः प्रवेशस्थानवाचित्वेन तदपेक्षत्वात्। प्रदेशान्तराम्नातवाक्यस्य प्रदेशान्तरवाक्यं कथं शेषभूतमिति चेत्—यथा 'वानस्पत्याः कुशाः' इत्येतद्वाक्यशेषभूतं 'औदुम्बर्याः कुशाः' इत्येतत् तद्विशेषकं प्रदेशान्तरस्थम्। यथा 'देवासुराणां छन्दोभिः' इत्येतच्छेषभूतं 'देवच्छन्दांसि पूर्वम्' इति प्रदेशान्तरस्थम्। यथा 'षोडशिनः स्तोत्रमुपाकरोति' इत्येतच्छेषभूतं 'समयाविषिते सूर्ये षोडशिनः स्तोत्रम्' इति। यथा 'ऋत्विज उपगायन्ति' इत्येतच्छे-

---

न्यथा प्रसक्त्यभावेन निषेधायोगात्। अतः पदशास्त्रस्याहवनीयशास्त्रादिव न निषेधशास्त्रस्य विधिशास्त्राद्बलवत्ता शक्या वक्तुम्। नापि लिङ्गाच्छ्रुतेरिव निषेधशास्त्राद्विधिशास्त्रस्य बलवत्ता वक्तुं शक्या। निषेधशास्त्रस्यात्यन्तबाधप्रसङ्गात्। तस्मादुभयोरपि विरुद्धयोस्तुल्यबलत्वाद्विकल्पः प्रसज्येतैव। एवं विकल्पः प्रसज्यमानोऽष्टदोषदुष्टत्वादन्याय्य इति तत्परिहाराय नञः पर्युदासवृत्तिमाश्रित्यानूयाजव्यतिरिक्तेषु यज्ञेषु येयजामहं करोतीत्येवमर्थसमर्पकतया 'नानूयाजे'ष्वित्यस्य पूर्ववाक्यशेषतैवाङ्गीकरणीयेति सिद्धान्तव्यवस्थापनार्थमिदं सूत्र'मपि तु वाक्यशेषः स्या'दित्यादि प्रदेशान्तरस्थवाक्यशेषताप्रतिपादनपरम्। अपित्विति पूर्वपक्षव्यावृत्त्यर्थम्। ननु नेदं सूत्रं प्रदेशान्तरस्थशब्दस्य प्रदेशान्तरस्थवाक्यशेषताप्रतिपादकतायामुदाहरणं किंतु 'दीक्षितो न जुहोती'ति ज्योतिष्टोमप्रकरणाम्नातं वाक्यं क्रत्वर्थपुरुषार्थसाधारण्येन सर्वेषामपि होमानां प्रतिषेधकमथवा क्रत्वर्थेषु प्रत्यक्षशिष्टान्विहायातिदेशप्राप्तानां बहूनां पुरुषार्थानां च होमानां प्रतिषेधकमिति पूर्वपक्षनिराकरणार्थं प्रवृत्त'मपि तु वाक्यशेषत्वादितरपर्युदासः स्यात्प्रतिषेधे विकल्पः स्या'दिति सूत्रमिहोदाहरणम्। तेन हि सूत्रेणाग्निहोत्रादिहोमानां स्वस्वविधितः क्रतुमध्ये कर्तव्यत्वेन नदीक्षितवचनेन अकर्तव्यत्वेन पर्युदासाधिकरणपूर्वपक्षन्यायाद्विकल्पप्राप्तौ तत्परिहाराय नदीक्षितवाक्यस्याग्निहोत्रादिवाक्यशेषत्वमभ्युपगम्य नञः पर्युदासवृत्तिराश्रयणीया। तेनादीक्षितो यावज्जीवमग्निहोत्रं जुहोतीत्यग्निहोत्रादिवाक्यानामर्थस्सम्पद्यत इति प्रतिपादितमतस्तदेवेहोदाहर्तव्यमिति चेत्सत्यमेतत्। तथा हि—तत्र प्रतिषेधाश्रयणे वस्तुतो विकल्पो न प्रसज्यते। होमनिषेधः क्रत्वर्थः होमः पुरुषार्थ इति विधिनिषेधयोर्विषयभेदादुभयोरपि क्रत्वर्थत्वेन विषयैक्ये हि षोडशिग्रहणाग्रहणरीत्या तयोरन्यतरस्य यस्य कस्यचित्परिग्रहेऽपि क्रतोस्साद्गुण्याद्विकल्पो भवेत्। इह तु होमनिषेधएव क्रत्वर्थ इति होमपक्षे क्रतोर्वैगुण्याद्वस्तुतो विकल्पस्य न प्रसक्तिः। कृत्वाचिन्तया तु तत्सूत्रं प्रवृत्तम्। यदि प्रतिषेधाश्रयणे पर्युदासाधिकरणपूर्वपक्षरीत्या विकल्पः प्रसज्यते तदा तत्परिहाराय न दीक्षित इत्यस्याग्निहोत्रादिवाक्यशेषत्वमङ्गीकृत्यापि विकल्पः परिहरणीयः किंचित्प्रकरणाम्नातस्यैकस्य शब्दस्य प्रदेशान्तराम्नातानेकवाक्यशेषभावादपि पापीयान्विकल्प इति न्यायं व्युत्पादयितुम्। अतः प्रदेशान्तराम्नातशब्दस्य प्रदेशान्तराम्नातवाक्यशेषत्वं कुशादिषूदाहृतमेव। 'तदुक्त'मिति सूत्रांशस्तु वस्तुतः प्राप्नुवन्विकल्पस्सति संभवे सर्वथा परिहरणीय इत्येतावन्मात्रे पूर्वमीमांसकसंमतिप्रदर्शनार्थ इत्यभिप्रेत्य 'नानूयाजे'ष्वित्यत्र विधिप्रतिषेधयोरुभयोरपि क्रत्वर्थत्वेन ब-

षभूतं 'नाध्वर्युरुपगायेत्' इति पर्युदासवाक्यम्। एवमुपायनवाक्यस्य हानिवाक्यशेषतया संभवन्त्यां गतौ न विकल्पो न्याय्यः। तदुक्तं प्रथमतन्त्रे 'अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य' इति स्तुत्यर्थं प्रकर्षार्थं वेति। नन्वर्थवादः कथं देशान्तरस्थार्थवादसापेक्ष इति चेत्—'न, सामोपास्तिस्तावकत्वेन श्रुतस्य 'एकविंशो वा इतोऽसावादित्यः' इत्यर्थवादस्यैकविंशत्वनिर्णयाय तैत्तिरीयकगतसत्रप्रकरणस्थार्थवादापेक्षत्वदर्शनात्। 'द्वादशमासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः' इति हि तत्र संख्यानिर्वाह उक्तः। ततोऽर्थवादत्वेऽप्युपायनमुपसंहार्यम्। हानोपायनयोरेकत्राप्यवगतिरस्ति कौषीतकिश्रुतौ 'तत् सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृतम्' इति। अतस्तयोः समुच्चयः॥

इति हानोपायनाधिकरणम् ॥ १६ ॥

---

स्तुतो विकल्पप्राप्तिरस्तीति तत्प्रदर्शनाय पर्युदासाधिकरणसिद्धान्तसूत्रमुदाहृतम्। सूत्रे हानं प्रत्युपायनस्य शेषत्वोक्त्यैव केवलोपायनश्रुतौ हानोपसंहारसिद्ध्यर्थं हानस्योपायनं प्रति शेषित्वहेतुरपि सिद्ध एवेति न पृथगुक्तिः। उपायनस्य शेषत्वादित्येतावति वक्तव्ये शब्दग्रहणमविशेषपुनःश्रवणाभावाद्विकल्प एव न्याय्य इति पूर्वपक्षशङ्कानिराकरणाय सर्वत्र हानोपायनशब्दवत्त्वाविशेषं दर्शयितुम्। एवमनुचिन्तनार्थं हानोपायनयोः परस्परोपसंहार इति प्रतिपादनार्थत्वेन सूत्रं योजितम्। अथ स्तुत्यर्थत्वेनोपसंहार इति प्रतिपादनार्थमिदं सूत्रमिति मतान्तरमुपन्यस्यति—स्तुतिप्रकर्षेति। ननु तत्रादित्यस्यैकविंशत्वनिर्धारणार्थमर्थवादान्तरापेक्षा नात्रोपायनापेक्षया निर्णेयं किंचिदस्तीत्याशङ्क्यार्थनिर्णयार्थमपेक्षाभावेऽपि स्तुतिप्रकर्षार्थं तदपेक्षेत्येतावता साम्यमस्तीत्यभिप्रेत्योपसंहरति—ततोऽर्थवादत्वेऽपीति। स्तुत्यर्थत्वपक्षेऽपि हानोपादाने पारमार्थिके एव। वैश्वानरेष्टिफलन्यायेन वचनबलात्। 'यदेनश्चकृमा वयं, यद्वान्यकृत मारिम, ता मामुञ्चतांहसः, यदन्यकृत मारिमे'त्यादिष्वन्यकर्मफलस्यान्यत्र संभवात् 'क्षीयन्ते चास्य कर्माणी'त्यादिकं परमात्मदृष्ट्यनन्तरं तद्द्रष्टारं प्रति कर्मणां फलजननशक्तिक्षयपरं प्रियाप्रियगतफलार्पणानन्तरं तत्क्षयपरं वेति न कश्चिद्विरोधः॥

इति हानोपायनाधिकरणम् ॥ १६ ॥

---

नयमणिमालायाम्

अथ हानोपायनाधिकरणम् ॥ १६ ॥

सू० ॥ हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥

हानोपायनतद्द्वयमनुसंधेयं विकल्पेन। परविद्यासु यथारुचि पृथगाम्नानार्थवत्त्वाय ॥ २४५ ॥

हानोपायनवाक्ये ह्यपेक्षया शेषशेषितापन्ने। तस्मात्समुच्चयः स्यात् पृथगाम्नानस्य वैधुर्यात् ॥ २४६ ॥

इति हानोपायनाधिकरणम् ॥ १६ ॥

सूत्रार्थचन्द्रिकायाम्

अथ हान्यधिकरणम् ॥ १५ ॥

सू ॥ हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥

भागवत्पादमते, अस्याधिकरणस्य 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' 'अश्व इव

रोमाणि विधूय पापम्' 'तथा विद्वान्पुण्यपापे विधूय' इत्यादीनि क्रमेण शाट्यायनिताण्ड्याथर्वणवाक्यानि **विषयः।** अत्र **वर्णकद्वयमुपन्यस्तम्।** आद्ये वर्णके शाट्यायनिश्रुतौ पुण्यपापयोरुपादानमात्रश्रवणेऽपि त्यागं विनोपादानस्यासंभवात्पुण्यपापत्याग आक्षिप्यते । ताण्ड्याथर्वणवाक्ययोः पुण्यपापत्यागमात्रमुच्यते, त्यक्तयोरुपादानमन्यत्र श्रुतमत्रोपसंहार्यं न वेति **संदेहः।** नोपसंहर्तव्यमिति **पूर्वः पक्षः। सिद्धान्तस्तु,** सूत्रे तुशब्दः कैवल्यवाची । **हानौ तु**=केवलहानौ श्रुतायामुपादानमुपसंहर्तव्यम् । कुतः । **उपायनशब्दशेषत्वात्**='तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृतम् ।' इत्यग्निरहस्ये हानसन्निधौ श्रूयमाणस्य हानशब्देनापेक्षितस्य उपादानात्मकोपायनशब्दस्य हानं प्रति शेषत्वावगमादित्यर्थः । तत्र दृष्टान्तमाह—**कुशाच्छन्दस्तुत्युपगानवत्**=कुशावत् छन्दोवत् स्तुतिवत् उपगानवदित्यर्थः । यथा कुशादिषु श्रुत्यन्तरगतविशेषान्वयः तथा हानावुपायनान्वय इति सिद्धम् । श्रुत्यन्तरगतो विशेषः श्रुत्यन्तरेऽभ्युपेय एव । अन्यथा अष्टदोषदुष्टो विकल्पः स्यात् । **तदुक्तम्**=द्वादशलक्षण्यां जैमिनिना 'विप्रतिषेधे विकल्पः स्या'दित्युक्तमिति ॥

**वर्णकान्तरं** निरूप्यते—उदाहृतश्रुतिष्वेव किं पुण्यपापयोर्विधूननं=हानमभिप्रेतमुत तयोश्चालनमिति **संशयः।** चालनमेवेति **पूर्वः पक्षः। सिद्धान्तस्तु,** हानावेवायं विधूननशब्दो भवितुमर्हति । कुतः । उपायनशब्दसन्निधौ श्रूयमाणस्य विधूननशब्दस्योपायनं प्रति शेषत्वादित्यर्थः । हानं विनोपादानात्मकोपायनस्यासंभवाच्चालनवाचकेनापि विधूननशब्देन हानमेव लक्ष्यमिति भावः । यथा कुशादिस्थले शाखान्तरीयविशेषश्रवणं निर्णायकं तथेहापि क्वचिद्विधूननसंनिधौ श्रूयमाणमुपायनं सर्वत्र हानलक्षकत्वे निश्चायकमिति यावत् । 'तदुक्त'मिति पूर्ववद्व्याख्येयम् ॥ **इति हान्यधिकरणम्॥**

**श्रीकण्ठमते,** तथा **रामानुजमते** च विषयवाक्यमविशिष्टमेव पूर्वस्मात् । पूर्वपक्षसिद्धान्तनिरूपणेतु कियानस्ति विशेषः पूर्वस्मात् । नानयोः परस्परं वैरूप्यम् । अनयोर्मतयोः **संशय** एवम्—किं पुण्यपापयोः केवलहानिचिन्तनं केवलोपायनचिन्तनमुभयचिन्तनं च, सर्वासु विद्यासु विकल्पेनानुष्ठेयमुत समुच्चयेनेति । तथातथाम्नातस्यार्थवत्त्वाय विकल्प एव न्याय्य इति **पूर्वपक्षः। सिद्धान्तस्तु,** केवलहाने केवलोपायने चाम्नाते इतरेतरसमुच्चयो न्याय्यो न विकल्पः । एकस्यां शाखायामुभयविधानं प्रतिपत्तृभेदेन परिहार्यम् । **सूत्रार्थस्तु, हानौत्विति ।** तुशब्दः पक्षव्यावर्तकः । हानाविति प्रदर्शनार्थम् । केवलविमोचने केवले चोपायने श्रूयमाणे तयोरितरेतरसमुच्चयोऽवश्यम्भावी । कुतः । **उपायनशब्दशेषत्वात्**=उपायनशब्दस्य हानिवाक्यशेषत्वादित्यर्थः । प्रदेशान्तराम्नातवाक्यस्य प्रदेशान्तराम्नातवाक्यशेषत्वे दृष्टान्तमाह—**कुशाच्छन्दस्तुत्युपगानवदिति ।** स्पष्टम् । एवमुपायनवाक्यस्य हानिवाक्यशेषतया संभवन्त्यां गतौ न विकल्पो युक्तः । तदुक्तं पूर्वकाण्डे—'अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्ये'त्यादिना । इति ॥

**आनन्दतीर्थमते,** सूत्रद्वयात्मकमिदमधिकरणम् । मुक्तावप्युपासनमस्ति वा न वेति **संदेहः।** मुक्तस्य विधिवश्यत्वे मुक्तेरसंसाराविशेषप्रसङ्गान्मुक्तानामुपासनं नास्तीति **पूर्वपक्षः। सिद्धान्तस्तु,** यद्यपि मुक्तानां विधिनिबन्धनमुपासनं नास्त्यथापि नियतब्रह्मयज्ञानामपि कुशैः स्वेच्छया मन्त्रवत्साध्ययनादिदर्शनात् ऐच्छिकमुपासनं मुक्तानामप्यस्त्येवेति । **सूत्रार्थस्तु,** तुरवधारणे । यतः **हानौ**=बन्धहानिरूपमुक्तौ । तदुक्तम् 'मुक्तानामेतत्समे'तिश्रुतावुपासनमुक्तम् । अतो मोक्षेऽपि तेषामुपासनमस्त्येव । तदपि **कुशाच्छन्दस्तुत्युपगानवदेव**=यथा नियतब्रह्मयज्ञानां द्विजानां नियतसंध्योपासनानन्तरमपि कुशग्रहणपूर्वकमाच्छन्देन स्वेच्छया स्तुत्युपगानं तद्वत् स्वेच्छया मुक्तानामुपासनमस्ति । तदपि न विधितः । तदप्युपासन'मेतत्साम गायन्नास्ते'इत्यादावुक्तमित्यर्थः । विधिनिबन्धनत्वमुपासनस्य कथं न स्यादिति चेत् उपासनविधीनामुपायनशब्दशेषत्वात्=मोक्षवाक्यशेषत्वात् । तथा च मोक्षार्थो उपासनाविधयः कथं मुक्तिविषयाः स्युरिति भावः ॥

**सू ॥ सांपराये तर्तव्याभावात्तथा ह्यन्ये ॥ २८ ॥ सांपराये**=मोक्षे उपासनं स्वेच्छयैवेत्यङ्गीकार्यम् । नत्वनिष्टनिवृत्त्यर्थम् । कुतः । **तर्तव्याभावात्**=मुक्तैः परिहर्तव्यानिष्टस्यैवाभावात् । तदपि कुतः । हि=यस्मादन्ये शाखिनः तथा 'तीर्णो हि तदा सर्वाञ्शोकान्हृदयस्य भवती'ति परिहर्तव्यानिष्टाभावं पठन्ति तस्मादित्यर्थः ॥

**इति सूत्रार्थचन्द्रिकायां हान्यधिकरणम् ॥ १५ ॥**

## अथ सांपरायाधिकरणम् ॥ १७ ॥

### सू ॥ सांपराये तर्तव्याभावात् तथा ह्यन्ये ॥ २७ ॥

पूर्वोक्तं पुण्यपापविमोचनं देहवियोगकाल एव चिन्तनीयं उत मार्गे वा ॥ इति संदिह्य पूर्वपक्षं प्रवर्तयति । तथा हि—'अश्व इव रोमाणि विधूय पापम्···धूत्वा शरीरम्' इति कुत्रचिद्देहवियोगकाल एव श्रुता सुकृतदुष्कृतहानिः । कुत्रचित् 'स आगच्छति विरजां नदीं तां मनसाऽत्येति तत् सुकृतदुष्कृते विधूनुते' इत्यध्वनि श्रुता । एवमुभयश्रुतिसद्भावेऽपि सांपराये देहवियोगकाल एव चिन्तनीया, तदूर्ध्वं ब्रह्मप्राप्तिव्यतिरेकेण प्राप्तव्यस्य कर्मसाध्यस्य सुखदुःखभोगस्याभावात् । तथा ह्यधीयतेऽन्ये 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये' इति देहवियोगादूर्ध्वं ब्रह्म प्राप्तमेव ॥

### सू ॥ छन्दत उभयाविरोधात् ॥ २८ ॥

देहवियोगकाले पुण्यपापविमोचनश्रुतेस्तदूर्ध्वं ब्रह्मप्राप्तिश्रुतेः उभयत्र श्रुत्यविरोधाद्धेतोः 'तत् सुकृतदुष्कृते विधूनुते' इति श्रुतिखण्डश्छन्दतो नेतव्यः, 'एतं देवयानं पन्थानमापद्य' इति वाक्यखण्डात् प्रागुपनेतव्यः ॥

### सू ॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ २९ ॥

देहवियोगकाले सर्वकर्मक्षयेऽपि गतिविधिरुपपन्न एव ब्रह्मोपासकानाम्, तत्र

---

## अथ सांपरायाधिकरणम् ॥ १७ ॥

सू० ॥ सांपराये तर्तव्याभावात्तथा ह्यन्ये ॥ २७ ॥ प्रासङ्गिकीं संगतिं सूचयितुं विशेषयति—पूर्वोक्तमिति । देहवियोगानन्तरं कर्मसाध्यफलाभावाद्द्विविधश्रुतिदर्शनाच्च संशयः । प्राप्तव्यस्येत्यनेन सौत्रं तर्तव्यपदं व्याख्यातम् । तरतिरिह प्राप्त्यर्थः । आगमशासनस्यानित्यत्वादिडागमाभावः । नन्वेवं सति 'तत्सुकृते'त्यादिश्रुतेः का गतिः । न च पाठक्रमादर्थक्रमस्य बलवत्त्वात्तद्वाक्यं प्रागेव नेतव्यमिति वाच्यम् । 'तत्सुकृते'त्यत्र तच्छब्देन तस्मादर्थेन संनिहितस्य विरजानद्यतिक्रमणस्य सुकृतदुष्कृतविधूनने हेतुत्वस्य प्रतिपाद्यमानतयार्थतः प्राङ्नयनासंभवादित्याशङ्कानिराकरणार्थं सूत्रम्—सू० ॥ छन्दत उभयाविरोधात् ॥ २८ ॥ 'पापं विधूय धूत्वा शरीर'मिति 'यावन्न विमोक्ष्ये अथ संपत्स्ये' इति च श्रुतिद्वयस्याविरोधमपेक्ष्य 'तत्सुकृते'त्यत्र तत्पदं सन्निहितस्य विरजानद्यतिक्रमणस्य हेतुत्वं न ब्रवीति किंतु पर्यङ्कविद्याप्रकरणाद्विद्यासामर्थ्यादेव पुण्यपापविधूननस्य श्रुत्यन्तरेषु प्रसिद्धत्वाच्च प्रकृताया विद्यायाः कारणत्वं ब्रवीतीत्यङ्गीकर्तव्यम् । एवञ्च सर्वनामश्रुतिप्राप्तहेतुहेतुमद्भावविरोधाभावा'त्तत्सुकृते'त्यादिवाक्यं यथेष्टं योजयितुं शक्यमिति देवयानपथप्राप्तिवचनात्प्रागेवोचितस्थले तद्वचनं योजनीयमिति भावः । ननु देहवियोगकाल एव सर्वकर्मक्षये कर्ममूलसूक्ष्मशरीरानुवृत्त्यसंभवादर्चिरादिगतिविधिरनुपपन्नः । जीवस्याणुत्वेन स्वतो गतिमात्रसंभवेऽपि शरीरेन्द्रियराहित्ये चन्द्रसंवादाद्यसंभवादित्याशङ्कानिराकरणार्थं सूत्रम्—सू० ॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ २९ ॥ मार्गे यथा चन्द्रसंवादश्शरीरेन्द्रियसाध्यः तथा ब्रह्मप्राप्त्यनन्तरमपि शरीरेन्द्रियसाध्या एव विहा-

तत्र विहाररूपार्थोपलब्धेः । 'स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति' इति दृश्यते । लोकवत्, यथा लोके राजाश्रितानां पुरुषाणामनितरपुरुषसाधारणसर्वार्थसिद्धिः । अतो मार्गश्रुतिरपि न बाध्यते, देहवियोगकाले सकलकर्मक्षयेऽपि विद्यामाहात्म्याल्लिङ्गशरीरावस्थानेन मार्गगतिः, तत्तद्देशविहारचन्द्रसंवादादिसर्वार्थसिद्धिसंभवादिति ॥

एवं प्राप्ते सिद्धान्त उच्यते—

## सू ॥ गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥ ३० ॥

देहवियोगकाले विरजानद्यतिक्रमणकाले च इत्युभयथा कर्मक्षये सत्येव देवयानगतेः प्रयोजनवत्त्वम् । अन्यथा देहवियोगकाल एव सर्वकर्मक्षये तदनन्तरमेवासौ मुक्त इति देवयानगतेर्निष्प्रयोजनत्वात् देवयानगतिश्रवणस्य 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति देवयानेन ब्रह्मप्राप्त्यनन्तरमेव धीविकासादिरूपस्वरूपाविर्भावश्रवणस्य च विरोधः स्यात् । एवं च यद्यपि विद्यासामर्थ्याद्देवयानेन गतिस्तत्तद्देशविहारचन्द्रसंवादादिकमग्रिमविहारादिवदुपपद्यते । तथाऽपि यावद्ब्रह्मप्राप्ति धीसंकोचरूपसंसारानुवृत्तिः विद्यासामर्थ्यान्नोपपद्यत इति तन्मूलभूतकर्मलेशानुवृत्तिरवश्यमेष्टव्या । न च परमेश्वरसंकल्पविशेषादेव तदनुवृत्तिः स्यादिति वाच्यम्, तस्यैवास्माभिः कर्म(मूल)तयोच्यमानत्वात्, न ह्यस्मन्मते विहितनिषिद्धाचरणप्रयुक्तपरमेश्वरसंकल्पव्यतिरेकेण पुण्यपापे स्तः ॥

ननु ब्रह्मप्राप्त्यनन्तरधीविकासादिस्वरूपाविर्भावश्चेत् तावत्पर्यन्तं धीसंकोचहेतुकर्मानुवृत्त्या भाव्यम् । कथं विरजानद्यतिक्रमणानन्तरमेव कर्मक्षयः ॥

उच्यते—प्राकृतप्रपञ्चसीमावध्यतिक्रमणमेव परमाकाशरूपपरमशिवपदप्राप्तिरिति सैव 'परं ज्योतिरुपसंपद्य' इत्यनेन ब्रह्मप्राप्तिर्विवक्षिता । विष्णुपदसंबन्धिनी विरजानदी प्राकृतप्रपञ्चसीमावधिः । तदनुप्रवेशतः प्रक्षीणसर्वकर्मलेपा

---

रादय आम्नायन्ते । ते ब्रह्मविद्यासामर्थ्यलब्धैरप्राकृतैश्शरीरेन्द्रियैरुपपादनीयाः । एवं सर्वकर्मक्षयेऽपि ब्रह्मविद्यासामर्थ्यादेव मार्गगतिपर्यन्तं सूक्ष्मशरीरस्यानुवृत्त्या चन्द्रसंवादादिरुपपन्नः । लोके राजाश्रितपुरुषाणामपि ह्यभिमतार्थसिद्धिसंपादकसकलसाधनसंपत्तिर्दृश्यते । किमुत परंब्रह्मैव शरणं प्राप्तानामिति भावः । सू० ॥ **गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः** ॥ ३० ॥ धीसंकोचानुप्रवृत्त्यर्थं तन्मूलकर्मलेशानुवृत्तिरवश्यमभ्युपगन्तव्येति विद्यासामर्थ्याद्भवदपि कर्मणो हानं कस्यचिद्देहवियोगकाले कस्यचिद्विरजानद्यतिक्रमणानन्तरमिति व्यवस्थापनीयम् । अत'स्तत्सुकृते'त्यादि श्रुतिरपि न पाठक्रमात्प्रच्यावनीया । न हि देहवियोगकाल एव सर्वकर्महानमिति पूर्वपक्षिणापि वक्तुं शक्यम् । केषांचित्कर्मणां विद्योदये सत्येव हानस्य 'तदधिगम उत्तरपूर्वाघयो'रित्यधिकरणे वक्ष्यमाणत्वादिति भावः । **प्राकृतप्रपञ्चसीमावधिरिति** । प्राकृतग्रहणमुपलक्षणम् । प्रकृतिमायाबिन्दूपादानकस्य मलिनमिश्रशुद्धात्मकस्य सांसारिकभोगस्थानविशेषभूतलोकसंघातात्मकस्य प्रपञ्चस्य सीमाया अवधिः समाप्तिभूमिः । ततः परं परमानन्दमयो मुक्तप्राप्यः परमशिवलोकः । ननु

**योगिनो विष्णुपदादूर्ध्वमप्राकृतशिवपदं परमानन्दमयमनुविशन्ति । तथा हि**

परमशिवलोकेऽपि किंचिद्दूरं गत्वा 'विरजां प्राप्ये'ति श्रुतिपर्यालोचनया प्रतीयते। कौषीतकिनामुपनिषदि हि पर्यङ्कविद्याम्नाता । तत्रैवं श्रूयते—'तस्य ह वा एतस्य ब्रह्मलोकस्यारोहदो मुहूर्तान्येष्टिहा विरजानदीकल्पो वृक्ष' इत्यादिकं 'तं पञ्चशतान्यप्सरसः प्रतियन्ति शतं फ[1]लहस्ताश्शतमाञ्जनहस्ताश्शतं वासोहस्ताश्शतं चूर्णहस्तास्तं ब्रह्मालंकारेणालंकुर्वन्ति स ब्रह्मालंकारेणालंकृतो ब्रह्मविद्वान्ब्रह्माभिप्रयाति स आगच्छत्यारं हृदन्तर्मनसात्येति स आगच्छति मुहूर्तान् न्येष्टिहास्तस्मादपद्रवन्ति स आगच्छति विरजानदीं तां मनसैवात्येती'ति परब्रह्मणा प्रेषिताभिरप्सरोभिर्ब्रह्मालंकारैरलंकृतस्यैव ब्रह्मविदो ह्रदविशेषस्य यष्टिभिर्हन्तृणां च प्राप्तिपूर्वकमेव विरजानदीप्राप्तिर्वर्ण्यते। कथं प्राकृतप्रपञ्चसीमावधिरित्युक्तम्? । उच्यते । ह्रदयष्टिहास्सीमासंधिस्थिताः न तु परमानन्दमयशिवलोकान्तर्गताः । विरजानद्यतिक्रमणानन्तरभाविकर्मलेशनिवृत्तेः प्राकृतप्रदेशासंभवात् अप्सरसां नियोगार्थे परब्रह्मवचने'ऽभिधावतममयशसा विरजां वा अयं नदीं प्रापन्नवा अयं जरिष्यती'ति विरजाप्राप्तिकीर्तनेन तस्यास्सीमासंधित्वावगमाच्चेति भाष्याभिप्रायः । अत्र 'न वा अयं जरिष्यती'ति वचनानुसारेण 'विजरे'त्येव नामेति प्रतीयते । उपनिषद्ग्रन्थेषु साम्प्रदायिकतदध्येतृषु च विरजामित्येव पाठो दृश्यते । विरजेति लोकैर्व्यवह्रियमाणं नाम प्रसिद्धम् । **विष्णुपदादूर्ध्वमिति** । विष्णुलोकः परमशिवलोकादव्यवहिताधरलोक इति भावः । ननु कर्मयोगेन शिवमुपासीनानां प्राप्यादपरशिवलोकादव्यवहिताधरलोको विष्णुलोकः । न तु मुक्तप्राप्यात्परमशिवलोकात् । शिवधर्मोत्तरे—'ज्ञेयं विष्णुपदादूर्ध्वं दिव्यं शिवपदं महत् । भोगसंस्थानमतुलं कर्मयोगरतात्मनाम् ॥ अप्रमेयगुणैर्दिव्यैर्विमानैस्सार्वकामिकैः । असंख्यैस्तत्पुरं व्याप्तं सर्वप्राण्युपकारकैः । सहस्रभूमिविस्तीर्णैस्सूर्यकोटिसमप्रभैः॥ रुद्रलोक इति प्रोक्तमशेषगुणसंयुतम् । सर्वेषां शिवभक्तानां तत्पुरं परिकीर्तितम् ॥ रुद्रक्षेत्रमृतानां च जंगमस्थावरात्मना'मित्यादिवचनैरपरशिवलोकं वर्णयित्वा 'इत्येत[2]दपरं प्रोक्तं श्रीमच्छिवपुरं महत्। देहिनां कर्मनिष्ठानां पुनरावर्तनं स्मृत'मिति तद्वर्णनं समाप्य—'ऊर्ध्वं शिवपुराज्ज्ञेयं स्थानत्रयमनुत्तमम् । नित्यं परमशुद्धं च स्कन्दोमाशङ्करात्मकमि'ति तदनन्तरं स्कन्दलोकादुमालोकाच्च परस्य परमशिवलोकस्य वर्णनमुपक्रम्य 'ये संप्राप्ताः परं स्थानं ध्यानयोगरता नराः । न तेषां पुनरावृत्तिर्घोरे संसारमण्डले' इत्यादिना तं प्राप्तानामेवानावृत्तिप्रतिपादनात् । तत्रोक्त उमालोक एव वायुसंहितायामुन्मनालोक इत्युक्तः । 'तदूर्ध्वमुन्मनालोकात्सोमलोकमलौकिकम् । सोमस्सहोमया यत्र नित्यं निवसतीश्वरः' इति । उच्यते । उमालोकसन्निधौ शिवधर्मोत्तरादिप्रतिपादितोऽस्ति गोमातृलोकः । स ताव[3]दुमालोकान्तर्गत एव । तत्रैवोमाया अंशभूतस्य परनारायणस्य स्थानम् । तदेतन्मन्त्रवर्णेनावगम्यते । 'ता वां वास्तून्युश्मसि गमध्यै गावो यत्र भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरी'ति । अस्यार्थः—हे विष्णो ते तानि स्थानानि तच्छब्दाद्बहुवचनस्य 'सुपां सुलुगि'त्यादिना शे आदेशः । ते तव धामानि स्था-

(१) 'मालाहस्ताः' इति पाठान्तरम् । (२) 'इत्येतदुत्तरं प्रोक्तं' इति पाठान्तरम् । (३) 'दुमालोकैकदेश एव' इति ख पाठः ।

**श्रूयते 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' इति । अतो न विरोधः ॥**

**इति सांपरायाधिकरणम् ॥ १७ ॥**

---

**नानि गमध्यै गन्तुमुश्मसि इच्छामः । गमेर्धातो'स्तुमर्थे सेसे'त्यादिसूत्रेण तुमुन्प्रत्ययार्थे अध्यै इति प्रत्ययः । 'उश्मसी'ति 'वश कान्तौ' इति धातोरुत्तमपुरुषबहुवचने 'इदंतो-मसी'रिति सूत्रेणान्तिम इकारादेशः । सांहितो दीर्घः । तान्येव धामानि विशेष्यन्ते । यत्र येषु स्थानेषु अयासः अनपायिन्यः यातेरसुन्प्रत्यये नञ्समासः । भूरिशृङ्गा गावः नन्द्यादयो गोमातरः सन्ति अत्राह अस्मिन्नेव स्थाने । 'अहे'ति निपात एवकारार्थः । तत्प्रसिद्धम् । उरुगायस्य उरुभिर्महद्भिर्गीयमानस्य भूरेः महतो वृष्णः विष्णोस्तव परमम-धस्तनविष्णुलोकापेक्षयोत्कृष्टमवभाति अवमे भाति परमशिवलोकस्याधस्ताद्भातीति । तस्मादुमालोकान्तर्गतवैष्णवपरमपदाभिप्रायं 'विष्णुपदसंबन्धिनी'ति 'विष्णुपदादूर्ध्वमिति चे'ति युज्यत एव ॥**

## इति साम्परायाधिकरणम् ॥ १७ ॥

---

## नयमणिमालायाम्

## अथ साम्परायाधिकरणम् ॥ १७ ॥

**सू० ॥ साम्पराये तर्त्तव्याभावात्तथा ह्यन्ये ॥ २७ ॥ छन्दत उभयाविरोधात् ॥ २८ ॥ उपपन्नस्तल्ल-क्षणार्थोपलब्धेर्लोकवत् ॥ २९ ॥ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ ३० ॥**

देहवियोगे विदुषां कर्मलयस्तदनु न खलु तत्कृत्यम् । गतये सूक्ष्मतनुस्थितिरस्तु क्रीडाप्रिमेपि विद्यातः ॥ २४७ ॥

देहवियोगेऽध्वनि च द्विधाघविलयश्रुतिद्वयाज्ञस्यात् । न हि विद्यया तनुस्थितिमुपपाद्य श्रुतमुपेक्षितुं युक्तम् ॥२४८॥

यावत्सूक्ष्मशरीरस्थायी बन्धश्च बुद्धिसंकोचादिः । स च न पराभिध्यानं विनावतिष्ठेत कर्म किमतोन्यन्न ॥ २४९ ॥

## इति साम्परायाधिकरणम् ॥ १७ ॥

## सूत्रार्थचन्द्रिकायाम्

### अथ साम्परायाधिकरणम् ॥ १६ ॥

**सू ॥ साम्पराये तर्तव्याभावात्तथा ह्यन्ये ॥ २७ ॥ छन्दत उभयाविरोधात् ॥ २८ ॥ उपपन्नस्तल्लक्ष-णार्थोपपत्तेर्लोकवत् ॥ २९ ॥ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ ३० ॥**

**भगवत्पादमते,** पूर्वं विद्यायाः कर्महानिहेतुत्वं सिद्धवत्कृत्य केवलहानश्रवणे उपायनोपसंहारोऽभिहितः । संप्रति विद्यायाः कर्महानिहेतुत्वं नास्तीत्याक्षेपसंगत्याह—**सांपराये इत्यादि** । अत्र 'विरजां नदीं तां मनसैवात्येति तत्सुकृ-तदुष्कृते विधूनुते' इति पर्यङ्कस्थब्रह्मोपासकस्य कर्महानिप्रतिपादकं कौषीतकिवाक्यं विषयः । तत्र किं विरजानदीतरणा-नन्तरं कर्महानिः उत देहत्यागात्प्राक्काले इति **संशयः** । श्रुतिबलान्नदीतरणानन्तरमेवेति **पूर्वपक्षः** । **सिद्धान्तस्तु, सांपराये**=देहत्यागात्प्राक्परलोकसाधनीभूतविद्याकाल एव कर्महानिर्युक्ता । कुतः । **तर्तव्याभावात्**=नदीतरणानन्तरं तर्तव्यस्य प्राप्तव्यस्य पुण्यपापकर्मणः फलान्तरस्याभावात् । कर्महानिहेतोर्विद्यायाः प्राक्सत्वात्कर्महानिं विना नदीतरणा-नुपपत्तेश्च । अतो जीवत एव विद्यासामर्थ्यात्कर्महानिः । **तथा ह्यन्ये**=तथा ताण्ड्यादयोऽन्ये शाखिनश्च 'अश्व इव रो-माणी'त्यादौ जीवद्दशायामेव कर्महानिमधीयते इत्यर्थः ।

नतु कर्महानेर्विद्याफलत्वे ब्रह्मप्राप्तेरिव देहत्यागोत्तरकालिकत्वमेव स्यादित्याशंक्याह—**सू ॥ छन्दत उभयाविरो-धात् ॥ २८ ॥ छन्दतः**=स्वेच्छातो विद्यानुष्ठानं जीवत एवेति तद्धेतुककर्मक्षयो जीवत एव युक्तः सति हेतौ कार्यवि-लंबायोगात् । **उभयाविरोधात्**=एवं सति ताण्ड्यादिश्रुत्योरुभयोरविरोधोऽपि भवतीत्यर्थः । ब्रह्मप्राप्तेर्देहत्यागं विना-नुपपत्तेः प्रकृते चानुपपत्त्यभावाच्च जीवत एव कर्मक्षय इति भावः ॥ इदमधिकरणं सूत्रद्वयात्मकमेव । अन्यत्सूत्रद्वयम-धिकरणान्तरम् । तत्रापि तयोः पाठे पौर्वापर्यविपर्ययश्चात्र मते विशिष्टः श्रीकण्ठरामानुजमताभ्यामिति विवेकः ॥

**इति भगवत्पादमते साम्परायाधिकरणम् ॥ १६ ॥**

---

(१) 'एतेष्वेव स्थानेषु'—इति ख पाठः ।

## अथ गतेरर्थवत्त्वाधिकरणम् ॥ १७ ॥

**सू ॥ गतेरर्थवत्त्वमुभयथाऽन्यथाहि विरोधः ॥ २९ ॥** क्वचिच्छ्रूयमाणस्यान्यत्रोपसंहाराभ्युपगमे हानसन्निधौ क्वचिच्छ्रूयमाणस्य देवयानस्य पथोऽन्यत्र सर्वत्रोपसंहारोऽस्त्विति दृष्टान्तसंगत्येदमारब्धम् । कर्महानसंनिधौ क्वचिद्देवयानः पन्थाः श्रुतः निर्गुणविद्यास्थले क्वचिन्न श्रुतः । तत्र किं देवयानोपसंहारोऽस्ति न वेति **संदेहः** । अस्तीति **पूर्वपक्षः** । **सिद्धान्तस्तु,** नास्तीति । स च सूत्रार्थवर्णनतः स्पष्टीभविष्यति । यथा—**गतेः**=देवयानस्य पथः अर्थवत्त्वमुभयथा-विभागेन भवितुमर्हति क्वचित्सगुणविद्यायां देवयानमार्गोऽस्ति क्वचिन्निर्गुणविद्यायां नास्तीति । **अन्यथा**=सर्वत्र देवयान-मार्गोपसंहाराभ्युपगमे 'विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इति श्रुतिविरोधः स्यात् । अतो निर्गुणवि-द्यायां मार्गोपसंहारो व्यर्थ इत्यर्थः ।

ननु तर्हि सगुणविद्यायामपि मार्गो व्यर्थः स्यादित्यत आह—**उपपन्न** इत्यादि ॥ गतेरुभयथाभाव उपपन्नः । **तल्ल-क्षणार्थोपलब्धेः**=सा गतिर्लक्षणं कारणं यस्य सगुणविद्याफलस्य स तल्लक्षणार्थः । तस्य श्रुतिषूपलब्धेः । अतः सगुण-विद्यायां मार्गोऽर्थवान् न निर्गुणविद्यायाम् । **लोकवत्**=यथा लोके सेतुवासिनां गङ्गाप्राप्त्यर्थं मार्गोपेक्षितो न गङ्गावा-सिनां तद्वदित्यर्थः ॥

## इति गतेरर्थवत्त्वाधिकरणम् ॥ १७ ॥

**श्रीकण्ठमते,** इदं सूत्रचतुष्टयं सांपरायाधिकरणम् । **रामानुजमतेतु** पञ्चसूत्रात्मकमिदमधिकरणमिति विशेषः । भगवत्पादमते अधिकरणद्वयात्मकयोः अनियमः सर्वेषाम्—यावदधिकारम्—इति सूत्रयोरुत्तरयोः श्रीकण्ठरामानुजमतानु-सारेण पाठक्रमे पौर्वापर्यविपर्ययवतोस्सूत्रयोरुत्तरयोराद्यस्य 'यावदधिकार'मिति सूत्रस्य रामानुजमते सांपरायाधिकरणेऽ-न्तर्भावादस्य पञ्चसूत्रात्मकतेति ध्येयम् । यद्यपि विषयवाक्यपूर्वपक्षादिकं प्रायोऽविशिष्टमेव । तथापि संशयादिस्वरूपे पर-मनयोर्मतयोः परस्परं वैलक्षण्याभावेऽपि कियदस्ति वैलक्षण्यं शाङ्करमतादिति विशेषः । अतः प्रथमं श्रीकण्ठमतानुसारे-णेदं निरूप्यते—विषयवाक्यं पूर्ववत् । पूर्वोक्तं पुण्यपापविमोचनं किं देहवियोगकाल एकदेशः क्षीयते अध्वनि शिष्टमि-त्युभयत्र चिन्तनीयं वा उत देहवियोगकाल एव सर्वं क्षीयत इति चिन्तनीयं वेति **संशयः** । देहवियोगकाल एव सर्वं क्षीयते इति चिन्तनीयमिति **पूर्वपक्षः** । तदुपपादकानि त्रीणि सूत्राणि । **सिद्धान्तस्तु,** देहवियोगकाले विरजानद्य-तिक्रमणे चेत्युभयत्रैवेत्येव चिन्तनीयमिति । **सूत्रार्थस्तु,** उभयश्रुतिसद्भावेऽपि सुकृतदुष्कृतहानिः सांपराये देहवियोग-काल एवेति चिन्तनीया । कुतः । **तर्तव्याभावात्**=तदनन्तरं ब्रह्मप्राप्तिव्यतिरेकेण प्राप्तव्यस्य कर्मसाध्यस्य सुखदुःख-भोगस्याभावात् । **तथा ह्यन्ये**='तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये' इति देहवियोगादूर्ध्वं ब्रह्म प्राप्तमेव अन्ये शाखिनोऽधीयते हि ॥

**सू ॥ छन्दत उभयाविरोधात् ॥ २८ ॥** एवं देहवियोगकाल एव सर्वकर्मक्षयेऽवधृते **उभयाविरोधात्**='अश्व इव रोमाणि विधूय पापम्' 'तस्य तावदेव चिर'मित्युभयश्रुत्यविरोधात् चरमश्रुतोऽपि 'तत्सुकृतदुष्कृते विधूनुते' इति वाक्यखण्डः 'एतं देवयानं पन्थानमापद्ये'ति वाक्यखण्डात्प्राक् **छन्दतः**=इच्छानुसारेण नेतव्य इत्यर्थः ॥

**सू ॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ २९ ॥** देहवियोगकाले सर्वकर्मक्षयेऽपि गतिविधिः उपपन्न एव ब्रह्मोपासकानाम् । कुतः । **तल्लक्षणार्थोपलब्धेः**='स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति' इत्यादिना त-त्तद्देशविहारचन्द्रसंवादादिसर्वार्थसिद्धिसंभवात् । यथा—**लोकवत्**=यथा लोके राजाश्रितानां पुरुषाणामनितरपुरुषसा-धारणसर्वार्थसिद्धिः तद्वत् देवयानादिमार्गश्रुतिरपि न बाध्यते विद्यामाहात्म्याल्लिङ्गशरीरावस्थानेन मार्गगत्यादिकमुपपन्नमे-वेति भावः ॥

एवं प्राप्ते **सिद्धान्तमाह—सू ॥ गतेरर्थवत्त्वमुभयथाऽन्यथाहि विरोधः ॥ ३० ॥** देहवियोगकाले विरजा-नद्यतिक्रमणकाले चेत्युभयथा कर्मक्षये सत्येव **गतेः**=देवयानगतेः **अर्थवत्त्वं**=प्रयोजनवत्त्वं सिद्ध्यति । **अन्यथा**=देहवि-योगकाल एव सर्वकर्मक्षये तदनन्तरमेवासौ मुक्त इति देवयानगतेर्निष्प्रयोजनत्वात् देवयानगतिश्रवणस्य 'परं ज्योतिरुप-संपद्य'ति देवयानेन पथा ब्रह्मप्राप्त्यनन्तरमेव धीविकासादिरूपस्वरूपाविर्भावश्रवणस्य च विरोधः स्यात् । अतः देहवियो-गकाले विरजानद्यतिक्रमे चेत्युभयत्र सुकृतदुष्कृतहानिश्चिन्तनीयेति सिद्धम् ॥

**रामानुजमते,** तु पञ्चसूत्रात्मकेऽत्राधिकरणे विषयवाक्यसंशयपूर्वपक्षादीनां प्रायः श्रीकण्ठमतसाम्येऽपि सूत्रार्थनि-रूपणे सिद्धान्तोपन्यासे च कियानस्ति भेदः । **'गतेरर्थवत्त्वम्' 'उपपन्नस्तल्लक्षणार्थः' 'यावदधिकारमवस्थितिः'** इत्यादिक्रमेण सूत्रपाठे मतद्वयमप्यनुसृतमुभयमतविलक्षणतया 'यावदधिकारसूत्रं सांपरायाधिकरणेऽन्तर्भाव्य तच्छेषतया व्याख्यातम् । अत्राधिकरणे आद्ययोस्सूत्रयोरर्थवर्णनमपि श्रीकण्ठीयामेव प्रक्रियामनुकरोतीत्यतोऽवशिष्टसूत्रत्रयार्थ एव निरूप्यते—यथा । **सू ॥ गतेरर्थवत्त्वमुभयथाऽन्यथाहि विरोधः ॥ ३० ॥ गतेः**=देवयानेन गतिश्रुतेरर्थवत्त्वं

## अथ आधिकारिकाधिकरणम् ॥ १८ ॥

### सू ॥ यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३१ ॥

**पूर्वत्राभिहितमुपासकानां पुण्यपापविमोचनं, ब्रह्मप्राप्तिश्च । तदिहाधिकारिकाणामधिकारभोगमन्तरेण मुक्तिरस्ति न वेति संशयः ॥**

**किं तावत् प्राप्तम्? वसिष्ठादीनामधिकारिणां तत्र तत्र पुराणादिषु जन्मान्तरश्रवणात् तेषां मुक्तिर्नास्त्येव । अतस्तत्त्वविदां पाक्षिकी मोक्षप्राप्तिरिति ॥**

---

## अथ आधिकारिकाधिकरणम् ॥ १८ ॥

**सू ॥ यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३१ ॥** संगतिसूचनार्थं वृत्तमनुवदति—**पूर्वत्रेति** । विदुषो देहवियोगकाले विद्यया सर्वकर्मक्षयः यावद्विरजानदीतरणं धीसंकोचादिव्यवस्थापककर्मलेशमात्रस्यानुवृत्तिरित्युक्तम् । तदिदमनुपपन्नम् । विदुषामपि पुनर्जन्मान्तरश्रवणेन विद्यया मुक्तेः सर्वकर्मक्षयस्य चानियतत्वादित्याक्षेपिकी संगतिरिति भावः। विद्यया मुक्तिर्नियता न वेति संशये तदर्थसंशयो भाष्ये दर्शितः । **पाक्षिकीति** । यद्यपि शुकादीनां देहावसाने मुक्तिः स्मर्यते तथापि वसिष्ठादीनां देहान्तरश्रवणाद्विद्यया मुक्तिः कर्मक्षयश्चेत्युभयं न नियतम् । न च वसिष्ठादीनां प्रारब्धानुवृत्तिरस्ति ।

---

देहवियोगकालेऽध्वनि चेत्युभयथा कर्मक्षये सत्येव । **अन्यथा**=देहवियोगकाल एव सर्वकर्मक्षये सति सूक्ष्मशरीरस्याप्यारम्भकनाशेन स्थित्यनुपपत्तेर्देवयानगतिश्रुतिर्हि विरुध्यते ॥

परिहरति—**सू ॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३१ ॥** भगवन्तमुपासीनानां देहवियोगकाले सर्वकर्मक्षयेऽप्युपपन्नो देवयानः पन्थाः । कुतः । **तल्लक्षणार्थोपलब्धेः**=अकर्मलभ्यार्थोपलब्धेरित्यर्थः । 'स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवती'त्यादिषु उपलभ्यते ह्यकर्मलभ्यार्थो ब्रह्मोपासीनानाम् । **लोकवत्**=यथा लोके राजानमुपासीनानां प्राकृतपुरुषासाधारणातिरमणीयानेकार्थसिद्धिः तद्वत्सर्वज्ञं सत्यसंकल्पं महोदारं परं ब्रह्मोपासीनानां सर्वमुपपन्नमित्यर्थः ॥

देहपातसमय एव सर्वकर्मक्षये तदूर्ध्वं कर्मफलभोगाभावात्कथं वसिष्ठादीनां ज्ञानिनामपि देहान्तरसंयोगः पुत्रविपत्त्यादिषु दुःखाद्यनुभवश्चोपपद्येतेत्याशङ्क्याह—**यावदधिकारमि**त्यादि । येषां ज्ञानिनां देहपातादनन्तरमर्चिरादिका गतिः प्राप्ता तेषां तदूर्ध्वं तरितव्यकर्मफलभोगाभावाद्देहपातसमय एव सर्वकर्मक्षय उक्तः । वसिष्ठादीनामाधिकारिकाणां तु यावदधिकारसमाप्ति नार्चिरादिका गतिरस्ति । अपि त्वधिकारेऽवस्थितिरेव । अधिकारहेतुभूतकर्मणः फलदानायारब्धत्वात् । ज्ञानिनोऽप्यारब्धं हि कर्म फलानुभवेनैव क्षीयते ॥ इति ॥

#### इति रामानुजमते सांपरायाधिकरणम् ॥ १७ ॥

**आनन्दतीर्थमते,** आद्यसूत्रस्य पूर्वाधिकरणेऽन्तर्भावात् **'छन्दत'** इत्याद्येवेदमधिकरणम् । एवं तर्हि मुक्तस्योपासनवत्कर्मापि नियतमस्ति वा न वेति **संदेहः** । विध्यभावस्य भगवत्पूजात्मकत्वेन तदिच्छाविषयत्वसंभवस्य चाविशेषात् 'कृष्णो मुक्तैरिज्यते वीतमोहै'रिति भारतवचनाच्च कर्माप्युपासनवन्नियतमस्त्विति **पूर्वपक्षः । सिद्धान्तस्तु, सू ॥ छन्दत उभयाविरोधात् ॥ २९ ॥** मुक्ताः छन्दतः स्वेच्छामनुसृत्यैव कर्म कुर्वन्ति न विधितः । कुतः । **उभयाविरोधात्**=कर्मकरणाकरणयोर्विधिबन्धप्रत्यवाययोरभावादित्यर्थः ॥ तस्मान्मुक्तानां कर्मानियतमेवेति ॥ **सू ॥ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ ३० ॥** हिर्हेतौ । **उभयथा हि**=बन्धप्रत्यवाययोरभावादेव । **गतेः**=मुक्तेः । **अर्थवत्त्वम्**=पुरुषार्थत्वम् । अन्यथा मुक्तौ बन्धप्रत्यवाययोर्भावे । **विरोधः**=मुक्तेस्संसारसमत्वेन पुरुषार्थत्वरूपविरोधः स्यादित्यर्थः ॥ **सू ॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३१ ॥** यथा लोके यागाङ्गविष्णुक्रमणस्य क्रियानुष्ठाननियमः न यागाङ्गसंपूर्त्यनन्तरमप्यस्ति किंतु कदाचिदेव तथा मुक्तानां कदाचित्कर्म कुर्वन्ति न वेत्येवं ताव**दुपपन्नः**=युक्तः । कुत एतत् । **तल्लक्षणार्थोपलब्धेः**=तल्लक्षणस्य परंपरया कर्मसाध्यस्यार्थस्य मोक्षस्य उपलब्धेः प्राप्तत्वादित्यर्थः ॥ इति ॥

#### इति सूत्रार्थचन्द्रिकायां सांपरायाधिकरणम् ॥ १७ ॥

अत्रोच्यते—अधिकारिपुरुषाणां देहपातादूर्ध्वमपि फलान्तरानुभव एव आ प्रारब्धाधिकारहेतुकर्मविनाशात् । एवं च यावदधिकारसमाप्तिस्तावत् तद्धेतुककर्मानुभवाय तत्रैव, तेषामवस्थितिर्नार्चिरादिप्राप्तिः । ज्ञानिनामपि प्रारब्धं कर्मानुभवादेव नश्यति । अतोऽधिकारिणामधिकारनिवृत्तेरनन्तरं मुक्तिरिति तत्त्वविदां न पाक्षिकी मोक्षप्राप्तिरिति ॥

इत्याधिकारिकाधिकरणम् ॥ १८ ॥

---

अप्रारब्धस्यैव विद्यानाश्यत्वनियम इति न नियमभङ्ग इति वाच्यम् । प्रतिशरीरमारम्भककर्मणां भिन्नत्वेन यस्मिन्देहे विद्योत्पन्ना तदारंभकातिरिक्तानां सर्वेषां कर्मणां विद्यानाश्यत्वनियमस्य वक्तव्यत्वेन नियमभङ्गस्यापरिहार्यत्वादिति भावः । आ प्रारब्धेति । अनेकदेहारंभकमप्येकं कर्मास्ति । 'श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणाम् । चण्डालपुल्कसानाञ्च ब्रह्महा योनिमृच्छति' ॥ इत्यादिस्मरणात् । अतो वसिष्ठादीनामाधिकारिकपदप्रापकं कर्मानेकदेहानुभाव्यमिति तेषां चरमदेहे विद्यया सर्वकर्मक्षयपूर्विका मुक्तिः । अतो नास्ति नियमभङ्ग इति भावः ॥

इत्याधिकारिकाधिकरणम् ॥ १८ ॥

---

## नयमणिमालायाम्

### अथ आधिकारिकाधिकरणम् ॥ १८ ॥

सू ॥ यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३१ ॥

जन्म वसिष्ठादीनां विदुषामवगम्यते पुराणेषु । तस्मान्मोक्षप्राप्तिस्तेषामपि पाक्षिकी भाति ॥ २५० ॥

……………………………………………………………………………॥ २५१ ॥

इत्याधिकारिकाधिकरणम् ॥ १८ ॥

## सूत्रार्थचन्द्रिकायाम्

### अथ आधिकारिकाधिकरणम् ॥ १८ ॥

सू ॥ यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३१ ॥

**भगवत्पादमते,** पूर्वं मुक्तिफलत्वान्निर्गुणविद्यायां मार्गो निरर्थकः । ब्रह्मलोकप्राप्तिफलत्वात्सगुणविद्यायां मार्गस्सर्वेऽर्थवानिति व्यवस्था कृता । सा न युक्ता । निर्गुणोपासकानामपीतिहासादौ पुनर्जन्मदर्शनेन निर्गुणविद्याया मुक्तिसाधनत्वासंभवादित्याक्षेपसङ्गत्येदमारभ्यते—**यावदधिकारमिति** । अपान्तरतमा नाम कलिद्वापरयोस्सन्धौ विष्णुनियोगात्कृष्णद्वैपायनस्संबभूवे'त्यादिना अपान्तरतमोवसिष्ठादीनां निर्गुणब्रह्मविदां पुनर्जन्म स्मर्यते । तत्र किं विदुषो वर्तमानदेहपातानन्तरं देहान्तरप्राप्तिरस्ति उत नास्ति इति **संदेहः** । अस्तीति **पूर्वपक्षः** । **सिद्धान्तस्तु,** अपान्तरतमःप्रभृतीनामाधिकारिकाणां लोकव्यवस्थाहेतुष्वधिकारेषु परमेश्वरेण नियुक्तानां सम्यग्दर्शनतः प्रक्षीणकर्मणां **यावदधिकारमवस्थितिः**=यावत्प्रारब्धकर्मावस्थितिः, तस्य प्रारब्धकर्मणो भोगेन क्षये प्रतिबन्धकान्तराभावादप्रतिबन्धसाक्षात्कारो वर्तमानदेहपातानन्तरं कैवल्यं संपादयतीति न देहान्तरप्राप्तिरिति सिद्धम् ॥

**श्रीकण्ठमते,** विषयवाक्यपूर्वपक्षादिकं सर्वमविशिष्टम् । वसिष्ठादीनामाधिकारिकाणां मुक्तिरस्ति न वेति संदिह्य तेषां पाक्षिकी मोक्षप्राप्तिरिति **पूर्वपक्षे** प्राप्ते तेषामधिकारनिवृत्तेरनन्तरं मुक्तिरस्ति न पाक्षिकी मोक्षप्राप्तिर्ज्ञानिनामाधिकारिकाणामिति **सिद्धान्तितम्** । सूत्रार्थो रामानुजमतवदेव ॥

**रामानुजमते,** अस्य सूत्रस्य पूर्वाधिकरणशेषतया तत्रैव व्याख्याततया नात्र पुनः प्रपञ्चनमिति वेद्यम् ॥

**आनन्दतीर्थमते,** अस्य सूत्रस्य 'अक्षरधिया'मित्युत्तरसूत्रेणैकाधिकरण्यादुत्तराधिकरणे तद्व्याख्यास्यते इति नात्र तत्प्रसक्तिरिति बोध्यम् ॥

इति सूत्रार्थचन्द्रिकायामाधिकारिकाधिकरणम् ॥ १८ ॥

## अथ अनियमाधिकरणम् ॥ १९ ॥

### सू ॥ अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम् ॥ ३२ ॥

उपकोसलाद्युपासनेष्वर्चिरादिगतिराम्नायते । सा किं, तन्निष्ठानामेव, उत सर्वोपासकानामिति संशयः ॥

छान्दोग्ये पञ्चाग्निविद्यायामुपकोसलविद्यायां चार्चिरादिगतिः पठिता, पाशुपतविद्यायामथर्वशिरसि सूचिता, शाण्डिल्यविद्यादिषु न पठिता । प्रकरणवशात् यासु श्रुता तास्वेव नियता नापरासु ॥

इति पूर्वपक्षे प्राप्ते ब्रूमः—यासु श्रुता तास्वेवेति न नियमः, अपि तु सर्वासूपासनासु भवति । तथा सत्येव श्रुतिस्मृतिभ्यामविरोधः । पञ्चाग्निविद्यायां 'ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति' इत्यविशेषण श्रुतिः । स्मृतिरपि 'अग्निर्ज्योतिरहः शुक्लः' इत्यविशेषका । ततः सर्वेषामुपासकानाम-

---

## अथ अनियमाधिकरणम् ॥ १९ ॥

सू० ॥ अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम् ॥ ३२ ॥ विदुषो मुक्तिरिवार्चिरादिगतिरपि नियतेति समर्थ्यत इति संगतिः । उपकोसलविद्यापञ्चाग्निविद्यापर्यंकविद्यादिषु सा समाम्नाता कासुचित्सूचिता । यथा पाशुपतविद्यायामथर्वशिरसि 'अयं पंथा वितत उत्तरेण येन देवा येन ऋषयो येन पितरः प्राप्नुवंति परमपरं परायणं चे'ति शाण्डिल्यविद्यादिषु न स्पृष्टा सा सर्वासु विद्यासु भवति न वेति सर्वविद्या संबंधप्रतिपादकवाक्याभावाभावाभ्यां संशये पूर्वपक्षः—यथाप्रकरणं व्यवतिष्ठते । अन्यथा कर्मकाण्डेऽपि धर्माणां पारिप्लवता स्यात् । न च 'येचामी अरण्य'इत्यादिबृहदारण्यकवाक्यात् 'ये चे मेऽरण्ये श्रद्धां तप इत्युपासते तेऽर्चिष'मित्यादि छांदोग्यवाक्याच्च तस्यास्सर्वविद्यास्वन्वयश्शङ्कनीयः तयोर्हि सत्यतपश्शब्दौ सत्यवचननियमलक्षणतपोविशेषवाचिनौ न तु ब्रह्मवाचिनौ । तपश्शब्दस्य ब्रह्मण्यप्रसिद्धत्वेन तयोस्सत्यवचन एव पर्यवसानौचित्यात्तयोर्ब्रह्मविषयतायामेकस्मिन्नेव छांदोग्ये पञ्चाग्निविद्यायामुपकोसलविद्यायाञ्च द्विःपाठस्य वैयर्थ्यप्रसंगाच्च । शाखैक्ये प्रतिपत्तृभेदेन साफल्यासंभवात् । न च वाजिसनेयशाखागतशाण्डिल्यविद्यान्यायेन एकत्र विधिरन्यत्रानुवाद इति नियन्तुं शक्यते । विनिगमकाभावात् । 'आचार्यस्तु ते गतिं वक्ते'ति गत्युक्तिपरिशेषेण 'वेत्थ यदितोऽधि.प्रजाः प्रजायंते' इत्यादिप्रश्नप्रतिवचनाभ्याञ्चोभयत्रापि तस्याः प्रतिपिपादयिषितत्वावगमाच्चेति । सिद्धान्तस्तु 'विद्यया तदारोहन्ति यत्र कामाः प्रतिष्ठिता न तत्र दक्षिणा यान्ति नाविद्वांसस्तपस्विन' इति श्रुतेर्विद्यां विना सत्यवचनरूपेण तपसार्चिरादिप्राप्त्यसंभवाद्भूमविद्यायामिव सत्यशब्दस्य रूढ्या ब्रह्मविषयत्वात् । तत्समानार्थस्य तपश्शब्दस्याऽपि 'तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेती'ति श्रुतौ तपःप्राप्यत्वेन श्रुते ब्रह्मणि लक्षणोपपत्तेः । 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना' इति ब्रह्मविन्मात्रस्यार्चिरादिगतिप्रतिपादकतदुपबृंहणस्मृतिसद्भावाच्च । स्मृत्यनुगृहीतवाक्यप्रमाणबलात्प्रकरणमुल्लंघ्य सर्वासु विद्यासु भवत्यर्चिरादिगतिः । छांदोग्ये प्रथमपठितायामुपको-

**र्चिरादिगतिर्नियतैव । केचिदाहुः—अनियमः, सर्वेषामुपासकानामर्चिरादिगतौ नियमाभावः; तथा सति श्रुतिस्मृतिभ्यामविरोध इति । तत्रापि न दोषः । निरन्वयोपासकानां तदपेक्षाऽभावादिति ॥**

**इत्यनियमाधिकरणम् ॥ १९ ॥**

सलविद्यायां तस्या विधिः पञ्चाग्निविद्यायां 'ये चेमेऽरण्य'इत्यादिना सर्वविद्यासंबन्धप्रतिपादनार्थं 'वेत्थ पथोर्देवयानस्य पितृयाणस्य व्यावर्तना' इति पृष्टे देवयानपितृयाणव्यावर्तकप्रतिपादनार्थं च तदनुवादः । अतएव देवयानपितृयाणोभयविषययोः प्रश्नप्रतिवचनयोरप्युपपत्तिः । देवयानस्य स्वरूपेणानुवाद्यत्वेऽपि पितृयाणव्यावर्तकधर्मवत्त्वेन प्रतिपिपादयिषितत्वात्पितृयाणस्य स्वरूपेणाऽपि प्रतिपिपादयिषितत्वाच्चेति । न 'न्वर्चिरादिना तत्प्रथिते'रित्यधिकरणे विदुषामर्चिरादिमार्गव्यतिरेकेण मार्गांतरं नास्तीति स्थापयिष्यन्ते । भाव्यं चावश्यं देशान्तरस्थितब्रह्मप्राप्त्यर्थासु सर्वास्वपि विद्यासु मार्गेण । अतो वाक्यासमर्थनेऽप्यशक्यव्यवस्थानाल्लिङ्गादेरर्चिरादिगतेर्देशान्तरस्थितब्रह्मप्राप्त्यर्थसर्वविद्यान्वयस्सिध्यति किमनेनाधिकरणेन । न च लिङ्गाद्ब्रह्मप्राप्त्यर्थमर्चिरादिगतेरन्वयसिद्धावपि सर्वासु विद्यास्वनुचिंतनीयत्वं न सिध्यति । यासु पठ्यते तास्वेवानुचिंतनीयेति शङ्का स्यात्तन्निवृत्त्यर्थमिदमधिकरणमिति वाच्यम् । ब्रह्मप्राप्त्युपायतया सर्वविद्यान्वयसिद्धौ हानोपायनन्यायेन फलकोटिनिविष्टतयैव सर्वत्रानुचिंतनीयत्वस्यापि सिद्धिसंभवात् । न च छांदोग्ये द्विःपाठो लिङ्गात्सर्वत्रान्वये व्यर्थः स्यादित्यधिकशङ्कानिराकरणार्थमिदमधिकरणमिति वाच्यम् । पञ्चाग्निविद्यायां सर्वविद्यान्वयवाक्यस्य व्यावर्तकधर्मवचनस्य प्रागप्रतिपन्नस्य सत्त्वेन तदर्थं प्राक्प्रतिपन्नगत्यनुवाद इति शाण्डिल्यविद्याव्युत्पादितन्यायसंचारेणावगंतुं शक्यत्वादिति मन्यमानानां केषांचिदभिमतां प्रकारान्तरेण सूत्रयोजनां दर्शयति—**केचिदाहुरिति** । ननु यदि सर्वेषामुपासकानां नार्चिरादिगतिः, तर्हि एषां न सा ते कथं ब्रह्म प्राप्नुयुरित्याशंक्य तन्मतमुपपादयति—**तत्रापि न दोष इति** । निरन्वयोपासकाः गुणान्वयरहितनिर्विशेषब्रह्मोपासकाः तेषां न देशांतरस्थं सगुणं ब्रह्म प्राप्तव्यं यानधिकृत्य 'न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते' इत्यादिश्रुतयस्तदनुसारिण्यः स्मृतयश्चेति तेषामाशयः ॥

**इति अनियमाधिकरणम् ॥ १९ ॥**

---

## नयमणिमालायाम्

### अथ अनियमाधिकरणम् ॥ १९ ॥

**सू ॥ अनियमस्सर्वेषामविरोधः शब्दानुमानाभ्याम् ॥ ३२ ॥**

उपकोसलविद्यादिः श्रुतो न सर्वासु विद्यासु । प्रकरणनियंत्रितत्वात्प्रसारयत्यर्चिरादिको मार्गः ॥ २५२ ॥

ये चेमेऽरण्य इति श्रुतिवाक्यात्सर्वविद्यासु । लब्धान्वयस्य तस्य प्रक्रियया नास्त्यवच्छेदः ॥ २५३ ॥

**इत्यनियमाधिकरणम् ॥ १९ ॥**

## सूत्रार्थचन्द्रिकायाम्

### अथ अनियमाधिकरणम् ॥ १९ ॥

**सू ॥ अनियमस्सर्वेषामविरोधः शब्दानुमानाभ्याम् ॥ ३२ ॥**

**भगवत्पादमते,** पूर्वं सगुणनिर्गुणविद्यासु मार्गस्य भावाभावव्यवस्था यथोक्ता तथा सगुणविद्यास्वपि व्यवस्थास्त्विति

## अथ अक्षरध्यधिकरणम् ॥ २० ॥

**सू ॥ अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥**

**गार्गिब्राह्मणे—'अस्थूलमनण्वह्रस्वम्' इत्यादौ ब्रह्मबोधाय केचन निषेधाः श्रुताः । आथर्वणे च 'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णम्' इत्यादौ श्रुताः । तेषामानन्दादिवदुपसंहारोऽस्ति न वेति संशयः ।**

**किं प्राप्नोति ? तेषां निषेधानामानन्दादिवत् गुणत्वाभावान्न सर्वासु परविद्यासूपसंहारः ॥**

---

## अथ अक्षरध्यधिकरणम् ॥ २० ॥

**सू० ॥ अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥** अर्चिरादिगतिवदस्थूलत्वादीनामपि सर्वविद्यासाधारण्यं प्रतिपाद्यत इति दृष्टान्तसंगतिः । द्वितीययोजनायां प्रत्युदाहरणसंगतिः । अस्थूलत्वादीनां सर्वासु विद्यासूपसंहारोऽस्ति न वेति तदपेक्षानपेक्षाभ्यां संशये पूर्वपक्षः । प्रकरणविशेषाम्नातानामेषां नोपसंहारः । आनन्दादिवत्स्वरूपप्रतिपत्त्यर्थत्वाभावात् 'लब्धरूपे क्वचित्किंचि'दिति न्यायेनावगतस्वरूप एव धर्मिणि निषेधरूपाणां तेषां बोध्यत्वात्सर्वज्ञत्वसत्यसंकल्पत्वादिवत्प्राप्तव्यफलत्वा'दितरे त्वर्थसामान्या'दिति न्यायेन तेषामुपसंहारेण भाव्यमिति चेन्न । 'निरवद्यं निरञ्जन'मित्यादौ सामान्यतः श्रुतस्य निर्दोषत्वमात्रस्योपसंहारेणापि चारितार्थ्याद्दोषविशेषाणां प्रातिस्विकाभावोपसंहारापेक्षायाश्च नानाशाखाम्नातानां तेषामानन्त्योपसंहारस्याशक्यत्वात् । गार्गिब्राह्मणमुण्डकाम्नातानामस्थूलत्वादीनामेव सकलदोषाभावोपलक्षणत्वाङ्गीकारे तत्तद्विद्याम्नातानां यत्किंचिद्दोषाभावानामेव तथात्वसंभवेनास्थूलत्वाद्यपेक्षणस्य वैयर्थ्यादिति ।

---

दृष्टान्तसंगत्येदमारभ्यते सगुणोपासने क्वचित्पञ्चाग्न्युपासनादिषु मार्गः श्रूयते क्वचित्तु वैश्वानरादिषु न श्रूयते । तत्र किं येषु मार्गः श्रुतः तेषामेव तस्य नियमः किं वा सर्वेषामनियम इति **संशयः** । विद्याविशेषप्रकरणान्नियम इति **पूर्वपक्षः** । **सिद्धान्तस्तु** सर्वेषां सगुणोपासनानां मार्गस्यानियमः । अनियमाभ्युपगमे प्रकरणविरोधः स्यादिति चेन्न । **अविरोधः**=नैषोऽस्ति विरोधः । कुतः । **शब्दानुमानाभ्याम्**='तद्य इत्थं विदुः ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति'इत्याद्याः श्रुतयः, 'शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते । एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः ॥' इत्याद्याः स्मृतयः, ताभ्यामित्यर्थः । एवं च पञ्चाग्निविदामिव विद्यान्तरशीलिनामप्यविशेषेण अर्चिरादिमार्गप्रतिपादकवाक्येन प्रकरणं बाध्यमिति बोध्यम् ॥

**श्रीकण्ठमते,** तथा **रामानुजमते** च विषयवाक्यसंदेहादिकं पूर्ववदेव । **श्रीकण्ठभाष्ये** परं 'केचिदाहुः' इत्यारभ्य **अनियमः**=सर्वेषामुपासकानामर्चिरादिगतौ नियमाभावः । तथा सति श्रुतिस्मृतिभ्यामविरोध इति । तत्रापि न दोषः । निरन्वयोपासकानां तदपेक्षाभावादिति सूत्रार्थोऽन्यथापि वर्णितः ॥

**इति श्रीकण्ठरामानुजमतयोरनियमाधिकरणम् ॥ १९ ॥**

**आनन्दतीर्थमते,** 'यावदधिकार'मिति सूत्रस्य भगवत्पादमतवद् **'अनियम'** इति सूत्रानन्तरमेव पाठः । उपसंहृतिवद्योग्यायोग्यविभागेन ज्ञानिषु मोक्षः केषांचिदस्ति केषांचिन्नास्तीति नियमोऽस्ति वा न वेति **संदेहः** । ज्ञानिनां मध्ये केषांचिन्मोक्षोऽस्ति केषांचिन्नेति नियमोऽस्तीति **पूर्वपक्षे** प्राप्ते नास्तीति **सिद्धान्तः** । **सूत्रार्थस्तु, अनियमः**=अपरोक्षज्ञानिनां मध्ये केषांचिन्मोक्षः केषांचिन्नेत्येवंरूपव्यवस्थाभावो ज्ञायते । कुतः । सर्वेषामपि मोक्षेऽविरोधात् निषेधकाभावात् । किंच । **शब्दानुमानाभ्याम्**='नकश्चि'दिति श्रुतेः तन्मूलकानुमानाच्चेत्यर्थः ॥

**इति सूत्रार्थचन्द्रिकायामनियमाधिकरणम् ॥ १९ ॥**

इति प्राप्ते ब्रूमः—अक्षरसम्बन्धिनीनां निषेधधियां सर्वासु परविद्यासूपसंहारो युक्तः, गुणिनो ब्रह्मणः सर्वत्रैकत्वात् । एतैर्हि गुणैः सकलेतरव्यावृत्तब्रह्मानुसन्धानोपपत्तिर्नान्यथा, हेयगुणसंबन्धानर्हा आनन्दादयो हि प्रत्यगात्मनः सकाशात् ब्रह्मणो व्यावर्तकाः, प्रधानानुवृत्तित्वं गुणस्य स्वभावः । यथा जामदग्न्य-चतूरा-त्रपुरोडाशाद्युपसद्गुणभूतस्य 'अग्निर्होत्रं वेत्वध्वरम्' इत्यादिमन्त्रस्य सामवेदपठितत्वेन सामवेदस्वरस्योच्चैस्त्वस्य प्राप्तावपि याजुर्वैदिकप्रधानोपसदनुवृत्तित्वादुपांशुगुणत्वम् । तदुक्तं प्रथमे काण्डे 'गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः' इति ॥

---

सिद्धान्तस्तु ज्ञानानन्दादीनां जीवेष्वपि सत्त्वेन तद्वैलक्षण्यदृढीकरणार्थं दोषाभावरूपाणां तेषामप्युपसंहारः कार्यः । सामान्यतो दोषाभावानुसंधानादपि जीवेषु संभावितानां दोषविशेषाणां विशिष्याभावानुसंधाने तद्वैलक्षण्यदार्ढ्यलाभात् । न च निर्दोषत्वमात्रं विद्यानुष्ठानकालेऽनुसन्धेयं तद्दार्ढ्यार्थमस्थूलत्वादयोऽन्नमयाद्युक्तरीत्या विद्यानुष्ठानात्प्रागेव श्रवणमननकालयोरनुसंधातव्या इत्यस्त्विति वाच्यम् । 'सर्वमन्यत्परित्यज्ये'ति वचनबलाद्देवताविशेषरूपाणामन्नमयादीनां विद्यानुष्ठानकालेऽनुसंधानायोगात्त्यागेऽपि चिरनिरन्तराभ्यासेन दार्ढ्यातिशयहेतूनामस्थूलत्वादीनां त्यागे हेत्वभावात् । न चानन्त्यादुपसंहारासंभवः । 'अस्थूल'मित्या'द्यदीर्घ'मित्यन्ते'नास्नाय्वनाकाश'मित्यन्तेन च दोषावहशरीरनिषेधः, 'अतम' इत्यविद्या निषेधः, 'अचक्षुरि'त्यादिना इन्द्रियनिषेधः, इत्यादिरूपेण दोषाभावानामवच्छिद्य ग्रहणसंभवादिति । यद्यपि 'निष्कलं निष्क्रियं शान्त' मित्यादिशाखान्तरश्रुता अपि दोषाभावा उपसंहार्याः । तथाप्यस्थूलादिवाक्ये मुण्डकवाक्ये च परिपूर्णः शरीरेन्द्रियादिदोषनिषेधः श्रूयत इति, तदुपसंहारे सति नान्यापेक्षास्तीत्यानन्त्यदोषपरिजिहीर्षया सूत्रेऽक्षरग्रहणं कृतम् । अन्नमयादिवद्दोषविशेषाभावाः प्रागेवानुसन्धेयाः । विद्याकाले माभूत्तदनुसंधानोपसंहृतिरिति शङ्कावारणार्थं धियामित्युक्तम् । तुशब्दस्सामान्यतः पूर्वपक्षनिराकरणार्थः । अवरोधः संग्रहः । सामान्यतद्भावाभ्यां सर्वासु विद्यासूपास्यस्य ब्रह्मणस्समानत्वात्तेषामस्थूलत्वादीनामितरवैलक्षण्यार्थं ब्रह्मस्वरूपप्रतीतिदार्ढ्यसम्पादनोपयोगसद्भावाच्चेत्यर्थः । औपसदः उपसत्संबद्धस्सामवेदोत्पन्नस्तद्गुणभूतो मन्त्रः । तदुक्तं सामवेदोत्पन्नस्य मन्त्रस्यो'च्चैस्साम्ने'ति विहितस्ववेदस्वरमपहाय 'उपांशु यजुषे'ति याजुर्वैदिकस्वरपरिग्रहेण यद्याजुर्वैदिकप्रधानोपसदनुवर्तित्वं तद्गुणमुख्यादिसूत्रेणोक्तमित्यर्थः । गुणमुख्ययोः मन्त्रोपसदोः व्यतिक्रमे स्वस्ववेदविहितस्वरप्राप्त्या विरोधे सति मुख्येन प्रधानानुसारेण वेदसंयोगः स्वरविधायकवेदसंबन्धः प्रधानविधिविधेयत्वादङ्गानामित्यर्थः । सामगानां पञ्चविंशतिब्राह्मणे जामदग्न्यचतूरात्रस्योपसत्सु एककपालादिद्वादशकपालान्तपुरोडाशद्रव्यका द्वादशयागा विहिताः । तेषां च 'अग्नये वेर्होत्रमवेरध्वरमावित्करं वैश्वानरं वैश्वानरमवसे करीन्द्राय देवेभ्यो जुहुता हविः स्वाहे' त्याद्या द्वादशहोममन्त्राः समाम्नाताः । त इहोदाहरणम् । शबरस्वामिना तु न्यायसाम्यादस्मिन्नधिकरणेऽन्यदुदाहृतमिति न विरोधः । एवं यथाकथंचिदुपयोगवर्णनेनास्थूल-

(१) 'जीवेऽपि सद्भावेन' इति ख. पाठः । (२) 'कालेऽनुचिन्तनीयं' इति ख. पाठः ।

नैतावता सर्वेषामुपसंहार्यत्वप्रसक्तिरित्याह—

सू ॥ इयदामननात् ॥ ३४ ॥

आमननमाभिमुख्येन मननम्, इयदेव गुणजातं सर्वत्रोपसंहार्यम्, येन गुणजातेन सकलेतरव्यावृत्तब्रह्ममननं भवति । अतोऽक्षरब्रह्मसंबन्धिनीनामस्थूलत्वादिनिषेधधियामेव सकलेतरव्यावर्तकधर्मरूपत्वादुपसंहारः परविद्यासु, न तु 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' इत्यादीनामपीति ॥

इति अक्षरध्यधिकरणम् ॥ २० ॥

---

त्वाद्युपसंहारसमर्थने सर्वविद्याम्नातानां सर्वेषामपि ब्रह्मगुणानां सर्वत्रोपसंहारकल्पना प्रसज्येतेत्यतिप्रसक्तिशङ्कापरिहारार्थत्वेनोत्तरसूत्रमवतारयति—नैतावतेति । सू० ॥ इयदामननात् ॥ ३४ ॥ आभिमुख्येन मननमिति । आदरेण चिंतनमित्यर्थः । आदरो निर्दोषत्वे स्वप्राप्यफलरूपत्वप्रयुक्तः । एवं च फलरूपतयावश्यानुसन्धेयस्य दोषाभावस्यैव प्रपञ्चेनानुसन्धानतः परब्रह्मणस्सर्वेतरवैलक्षण्येनार्थसिद्धादानन्त्यादवश्योपसंहाराणां सर्वेषां गुणानां सर्वत्रोपसंहारो न प्रसज्यत इति भावः ॥

इति अक्षरध्यधिकरणम् ॥ २० ॥

---

नयमणिमालायाम्

अथ अक्षरध्यधिकरणम् ॥ २० ॥

सू ॥ अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ इयदामननात् ॥ ३४ ॥

आनन्दाद्यैर्गुणौघैरितरविसदृशे लब्धबुद्धिप्रतिष्ठे ब्रह्मण्यस्थूलत्वादीन्किमिति कलयसे सर्वविद्यानुरोध्यान् ।
विश्वोपादानतान्तःस्थिति···मथनाकृष्टदोषापनुत्या ताद्रूप्यस्योपलब्ध्यै तदितरसदृशं दोषवश्यं ह्यवश्यम् ॥ २५४ ॥

इति अक्षरध्यधिकरणम् ॥ २० ॥

सूत्रार्थचन्द्रिकायाम्

अथ अक्षरध्यधिकरणम् ॥ २० ॥

सू ॥ अक्षरधियां त्ववरोधः सामान्यवद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥ इयदामननात् ॥३४॥

**भगवत्पादमते,** इदं सूत्रद्वयमधिकरणद्वयात्मतया विभक्तम् । अस्य 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनणु'इत्यादिकं बृहदारण्यकवाक्यं अक्षरमुपक्रम्य श्रूयमाणं 'यत्तदद्रेश्यमग्राह्य'मित्यादिकमाथर्वणवाक्यं च विषयः । तत्र किं क्वचिन्निषेधश्रुतौ अश्रुतनिषेधानां श्रुत्यन्तरादुपसंहारोऽस्ति न वेति **संदेहः** । नास्तीति **पूर्वपक्षः** । अस्तीति **सिद्धान्तः** । **सूत्रार्थस्तु, अक्षरधियां**=अक्षरे ब्रह्मणि द्वैतनिषेधधियः तासां सर्वत्र निषेधश्रुतिष्ववरोधः उपसंहारो न्याय्यः । कुतः । **सामान्यतद्भावाभ्याम्**=द्वैतनिरासेन ब्रह्मप्रतिपादनस्य सामान्यं समानत्वं, तस्य ब्रह्मणः प्रतिपाद्यस्य सर्वत्रभावः एकत्वेन प्रत्यभिज्ञायमानत्वं ताभ्यां हेतुभ्यामित्यर्थः । तत्र दृष्टान्तः—**औपसदवत्**=यथा जामदग्न्येऽहीने पुरोडाशिनीषूपसत्सु चोदितानामौपसदानामध्वर्युकर्तृकपुरोडाशशेषाणां मन्त्राणां यत्र क्वचिच्छ्रुतानामपि अध्वर्युणा संबन्धः तथा अक्षरप्रमितिशेषाणां निषेधानां यत्र क्वचिच्छ्रुतानामपि अक्षरेण सर्वत्र संबन्ध इत्यर्थः । **तदुक्तं**="गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः' इति जैमिनिना प्रथमे काण्डे उक्तमित्यर्थः ॥

इति भगवत्पादमते अक्षरध्यधिकरणम् ॥ २० ॥

अथ इयदधिकरणम् ॥ २१ ॥

**सू ॥ इयदामननात् ॥ ३४ ॥** अस्य 'द्वा सुपर्णा सयुजा'इत्याद्याथर्वणमन्त्रः 'ऋतं पिबन्ता'विति काठकवाक्यं च विषयः । तत्र किमनयोर्विद्याभेदः उताभेद इति **संशयः** । विद्याभेद इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** मन्त्रद्वये विद्याया अभेद एव । कुतः । **इयदामननात्**=इयतः इयत्तावच्छिन्नस्य द्वित्वावच्छिन्नस्योभयत्राप्यभिन्नत्वेन आमननात् अभिधानादित्यर्थः । अत्र हि मन्त्रद्वये भोक्तृत्वानुवादेन परमात्मा रुद्रः प्रतिपाद्यः । पिबन्ताविति प्रयोगस्तु 'छत्रिणो गच्छन्ती'तिवदुपपद्यत इत्यविरोधः ॥

इति भगवत्पादमते इयदधिकरणम् ॥ २१ ॥

## अथ अन्तराभूतग्रामाधिकरणम् ॥ २१ ॥

## सू ॥ अन्तरा भूतग्रामवत् स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्[1] ॥ ३५ ॥

**बृहदारण्यके 'यत् साक्षादपरोक्षात् ब्रह्म य आत्मा सर्वान्तरः तं मे व्याचक्ष्व' इत्युषस्तिप्रश्ने प्रतिवचनमेवमाम्नायते 'यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानिति स त आत्मा सर्वान्तरः' इत्यादि 'अतोऽन्यदार्तम्' इत्यन्तम् । तदनन्तरं 'यदेव साक्षादपरोक्षात् ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्व' इति कहोलप्रश्ने तु प्रतिवचनमेवमाम्नायते 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येत्येतं वै तमात्मानं विदित्वा' इत्यादि 'अतोऽन्यदार्तम्' इत्यन्तम् । इहोभयत्र विद्यैक्यं न वेति संशयः ॥**

**तथा सति 'य आत्मा' इत्युषस्तिप्रश्नः भूतग्रामवत्प्रत्यगात्मविषयः । अन्यथा**

## अथ सर्वान्तराधिकरणम् ॥ २१ ॥

**सू० ॥ अन्तराभूतवत्स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत् ॥ ३५ ॥**

**दोषाभावरूपमस्थूलत्वादिकं जीवव्यावर्तकमित्युक्तं पूर्वाधिकरणे । तह्यशनायाद्यतीतमेव जीवव्यावर्तकान्निर्दोषत्वाद्ब्रह्म स्यात् । प्राणितृत्वादिविशिष्टस्तु जीव एवेत्युत्थानात्संगतिः। उषस्तिकहोळयोर्याज्ञवल्क्यस्य च प्रश्नप्रतिवचनसन्दर्भयोर्विद्या भिद्यते न वेत्युषस्ति-**

---

**श्रीकण्ठमते** तथा **रामानुजमते** च इदमेकमेवाधिकरणम् । तयोरपि मतयोः पूर्ववदेव विषयवाक्यपूर्वपक्षादिकम् । आनन्दादिवत्सर्वासु परविद्यासु अस्थूलत्वादयोऽप्युपसंहार्या न वेति **संदेहे** नोपसंहार्या इति **पूर्वपक्षे** प्राप्ते उपसंहार्या एवेति **सिद्धान्तः । सूत्रार्थस्तु, अक्षरधियाम्**=अक्षरसंबन्धिनीनामस्थूलत्वादिधियां सर्वविद्यास्**ववरोधः** संग्रहणम् । कुतः । **सामान्यतद्भावाभ्याम्**=ब्रह्मणस्सर्वत्रसमानत्वात् ब्रह्मानुसंधानान्तर्भावाच्च तासाम् । शेषं पूर्ववत् ॥

नैतावता सर्वेषामुपसंहार्यत्वप्रसक्तिरित्याह—**सू ॥ इयदामननात् ॥ ३४ ॥ आमनन**माभिमुख्येन मननम् । **इयत्**=अस्थूलत्वादिविशेषितमानन्दाद्येव गुणजातं सर्वत्रोपसंहार्यम् । येन गुणजातेन सकलेतरव्यावृत्तब्रह्ममननं भवति तदेव सर्वत्रानुसंधेयं भवति । अन्यत् 'सर्वकर्मा सर्वकाम'इत्यादिकं तु तत्र तत्र व्यवस्थितमित्यर्थः ॥

**इति श्रीकण्ठरामानुजमतयोरक्षरध्यधिकरणम् ॥ २० ॥**

**आनन्दतीर्थमते,** 'यावदधिकार'मिति सूत्र'मक्षरधिया'मिति सूत्रंचेति सूत्रद्वयं **यावदधिकाराधिकरण**मिति व्यपदिश्यते 'इयदामननात्'इत्यादिकं सूत्रत्रयमधिकरणान्तरमिति बोध्यम् । अत्राधिकारिकाधिकरणे 'प्राप्तेश्च समञ्जस'मित्याद्यधिकरणेषूक्तः उपासकानामधिकारनियमो युक्तो वा न वेति **संदेहः** । प्रमाणाभावान्मुक्तानामधिकारनियमो न युक्त इति **पूर्वपक्षः । सिद्धान्तस्तु,** आनन्दवल्ल्यादिसिद्धस्य मुक्तावानन्दतारतम्यस्यापह्नोतुमशक्यतया तस्यैवाधिकारनियमे प्रमाणत्वात् यस्य यावद्गुणोपासने योग्यतारूपोऽधिकारस्तस्य तदधिकप्रयत्नकृतेर्दोषावहत्वात् मुक्तानामानन्दतारतम्येनासमत्वेऽपि गुरुषु शिष्याणामिव परस्परं विरोधादर्शनात्परस्परमुपकार्योपकारकभावसंभवाच्च मुक्तानामुपासनायामधिकारनियमो युक्त एवेति । **सूत्रार्थस्तु, आधिकारिकाणाम्**=योग्यतानुसार्युपासनशीलानां ब्रह्मादीनां स्वस्वाधिकारानुसारेणैव मुक्ताववस्थितिरवस्थितानामुपायनावत्तारतम्येनैव मुक्तौ तेषां फलमित्यर्थः ॥ **सू ॥ अक्षरधियामिति ॥** तुशब्दोऽप्यर्थः । **अक्षरधियां**=ब्रह्मज्ञानिनाम् असमत्वेऽपि **अविरोधः**=विरोधो नास्ति । कुतः । **सामान्यतद्भावाभ्याम्**=ब्रह्मवित्त्वात् यन्मत्सरादिदोषाभावसाम्यं मात्सर्यादिदोषाभावप्रसञ्जित उत्तमेभ्यो योऽधमानामुपकारस्ताभ्यां चेत्यर्थः । कथम् । **औपसदवत्**=यथा गुरुष्वौपसदानां सच्छिष्याणां विरोधाभावो दृश्यते तद्वत् । **तदुक्तम्**—चतुश्श्रुतौ 'नानाविधा देवसंघा'इत्यादिना असमत्वेऽपि विरोधो नास्तीत्युक्तमतोऽप्यविरोध इत्यर्थः ॥ 'इयदामननात्' इति सूत्रमुत्तराधिकरणेऽन्तर्भावितम् ॥

**सूत्रार्थचन्द्रिकायामक्षरध्यधिकरणम् ॥ २० ॥**

---

१ देशान्तरवदिति. शां. भा. पाठः.

'यः प्राणेन प्राणिति स त आत्मा' इति तत्प्रतिवचनविषयस्य कहोलप्रश्नप्रतिवचनविषयस्याशनायाद्यतीतत्वादेश्च भेदानुपपत्तिरितिचेत् ॥

सिद्धान्तयति—नोपदेशवदिति । 'य आत्मा सर्वान्तरः' इत्युभयत्र प्रश्नैकरूप्यात् परमेश्वर एवोभयत्र प्रश्नविषयः । प्रतिवचनगतं निरुपाधिकं प्राणनादिहेतुत्वमशनायाद्यतीतत्वं च तत्रैव समुपपद्यते । सद्विद्योपदेशवत् प्रश्नप्रतिवचनावृत्तिरेकविषया । प्रष्टृभेदो रूपभेदश्च न विद्याभेदावहः ॥

तथा ह्याह—

## सू ॥ व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३६ ॥

अर्थैक्ये निश्चिते सति प्रष्ट्रोर्बुद्धिव्यतिहारः कर्तव्यः । उषस्तिनाऽप्यशनायाद्यतीतत्वधीः, कहोलेनापि प्राणनादिहेतुत्वधीः कार्या । उभयप्रकरणगतानि हि वाक्यानि परमेश्वरं विशिंषन्ति, यथेतरत्र सद्विद्यायाम् । तस्मादेकस्यैव प्रश्नप्रति-

प्रश्नतत्प्रतिवचनयोर्जीवविषयत्वब्रह्मविषयत्वान्यतरानवधारणात्संशये पूर्वपक्षः । प्रश्नप्रतिवचनावृत्तेरुषस्तिप्रश्नप्रतिवचनं प्राणितृत्वादिलिंगाज्जीवविषयं । कहोळप्रश्नप्रतिवचनमशनायाद्यतीतत्वलिंगाद्ब्रह्मविषयमित्युपास्यभेदाच्च विद्या भिद्यते । यद्यप्युषस्तिप्रश्नोऽपि परब्रह्मविषयः 'यत्साक्षादपरोक्षाद्ब्रह्मे'ति साक्षात्त्वविशेषणात् । उषस्तिप्रश्नप्रतिवचनानन्तरं प्रवृत्तस्य कहोलप्रश्नस्य परब्रह्मविषयत्वेन संप्रतिपन्नस्य यदेव साक्षाद्ब्रह्मेत्यवधारणेन उषस्तिप्रश्नसमानविषयत्वावगमाच्च । न च तस्योपक्रमगतस्य प्रतिवचनानुसारेण जीवविषयत्वं कल्पयितुं युक्तम् । तदनुसारेण प्रतिवचनस्यैव ब्रह्मविषयत्ववर्णनौचित्यात् । सुषुप्तिसमयादिसाधारणनिरुपाधिकप्राणनव्यापारादिकर्तृत्वस्य ब्रह्मण्येव स्वारस्यादित्युच्यते, तथापि प्रष्टृभेदात्प्राणितृत्वाद्यशनायातीतत्वादिरूपभेदाच्चानिवार्यो विद्याभेद इति तत्र प्रथमपूर्वपक्ष उद्भाव्य प्रथमसूत्रेण निराकृतः । तत्र भूतग्रामवत्त्वं स्वात्ममनश्शरीरेंद्रियप्राणादिमत्त्वं तद्विशेषणं प्राणितृत्वादेर्जीवलिंगत्वोपपादनार्थं शरीराद्यंतरत्वविषयतया सर्वांतरत्वोपपादनार्थं च अन्तरा अंतरे प्राथमिके सर्वांतरवाक्ये । अंतरशब्दात्सप्तम्या- 'स्सुपांसुलु'गित्यादिना पूर्वसवर्णादेशः । तस्मिन्भूतग्रामवतः स्वात्मनो निर्देश इति शेषः । द्वितीयपूर्वपक्षोत्तरत्वेन द्वितीयसूत्रमवतारयति—प्रष्टृभेदो रूपभेदश्चेति । तथाह्याहेति । यथा न विद्याभेदावहस्तथैवोपपादयतीत्यर्थः । सू० ॥ व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३६ ॥ ननु प्रकरणद्वयगतान्यपि वाक्यान्येकमेव ब्रह्म विशिंषन्तु न तावता रूपभेदप्रयुक्तविद्याभेदशङ्का निवारिता भवति । न हि खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवतीत्येकमेवोद्गीथावयवं प्रस्तुत्य तं विशिंषत्सु प्राणाकाशहिरण्मयपुरुषादिवाक्येष्वध्यसनीयात्मकरूपभेदप्रयुक्तो विद्याभेदो नास्तीत्याशङ्क्येतरवदिति सूत्रांशं व्याचष्टे—यथेतरत्रेति । उद्गीथप्रकरणे 'देवासुरा ह वै यत्र संयेतिरे'[1] इत्यारभ्य मुख्यप्राणादयः परस्परभिन्नाः परस्परविलक्षणगुणयुक्ताश्चाध्यसनीयत्वेन वक्तुं प्रक्रांता इति युक्तस्तत्र रूपभेदाद्विद्याभेदः । इह तु सर्वांतरत्वं प्रकरणद्वयेऽपि समम् । 'अतोन्यदार्त्त'मित्युपसंहारोऽपि

१ संयत्ता इति–मू–पाठः ।

**वचनगतत्वान्न विद्याभेदः पुनरुक्तिस्तु शङ्कानिरासाय 'तत्त्वमसि' इतिवत् ॥**

**इत्यन्तराभूतग्रामाधिकरणम् ॥ २१ ॥**

---

समानः । अशनायाद्यतीतत्वमपि निर्दोषत्वरूपत्वेन सकलविद्योपसंहरणीयं न गुणान्तरवच्छेदकम् । विद्याविधिश्चैकत्रैव कहोळप्रश्नप्रतिवचने श्रूयते । 'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासे'दिति । अतो यथा सदुपदेशे 'भगवांस्त्वेवमेतद्ब्रवीतु भूय एव मा भगवान्विज्ञापयत्वि'ति प्रश्नभेदेऽपि 'तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इति प्रतिप्रश्नोत्तरमुपसंहारैक्यात्प्रतिप्रश्नं भूयश्शब्दश्रवणान्मध्ये विरोधिगुणाश्रवणाच्च । एकैवोपक्रान्तसद्विषया विद्या । एवमिहापि सर्वांतरात्मब्रह्मविषयैकैव विद्येति युक्तम् । न चैवं विद्यैक्यप्रमाणेषु सत्सु प्रष्टृभेदमात्रं विद्याभेदावहम् । 'शिलकश्शलाकावत्यः प्राचीनशाल औपमन्यवः' इत्यादिषु विद्यैक्येऽपि बहुलं प्रष्टृभेदोपलंभादिति भावः । ननूद्गीथविद्या वैश्वानरविद्यादिषु प्रष्टृभेदमात्रं न तु प्रश्नस्यैकरूप्यमस्ति । इह तूषस्तिप्रश्ने याज्ञवल्क्यस्योत्तरं श्रुतवतोऽपि कहोळस्य तथैव सर्वांतरे ब्रह्मणि प्रश्नः श्रूयते । अतो विद्यांतरपरिचिक्षिषयैवायं प्रश्न इति वक्तव्यमित्याशङ्क्याह—पुनरुक्तिरिति । यथा शङ्काविशेषनिराकरणाय सद्विद्यायां पुनः पुनः प्रश्नः यथा वात्रैवोषस्तिब्राह्मणे प्राणितृत्वादिना सर्वांतरत्वे प्रतिपादितेऽपि जीवव्यावृत्ततया स्फुटं सर्वान्तरत्वोपपादकं नोक्तमित्युषस्तस्यैव 'यदेव साक्षा'दित्यादिः कहोळप्रश्नः । एवं द्वितीयोषस्तिप्रश्नोत्तरेणापि 'न दृष्टेर्द्रष्टारं पश्ये'दित्यादिना जीवव्यावृत्ततया स्फुटतरं सर्वान्तरत्वोपपादकं नोक्तमित्यपरितुष्यतः कहोळस्य प्रश्नः । अशनायाद्यतीतत्वोपन्यासेन च तस्य परितोष इत्येवं विद्यैक्येऽपि पुनरुक्तिरुपपद्यते । अतः सर्वांतरत्वदार्ढ्यार्थमुभयमुभयत्रोपसंहर्तव्यमिति भावः ॥

**इति सर्वान्तराधिकरणम् ॥ २१ ॥**

---

## नयमणिमालायाम्

### अथ सर्वान्तराधिकरणम् ॥ २१ ॥

**सू ॥ अन्तराभूतग्रामवत्स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत् ॥ ३५ ॥ व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३६ ॥**

यत्साक्षादस्ति जीवो यदेव साक्षादिति तु परः । प्रतिपाद्यः प्राणिभृताद्यशनायारहिततादिलिङ्गगणात् ॥ २५५ ॥
सर्वान्तरादिसाम्यात्साक्षाद्ब्रह्मैव रूप्यमुभयत्र । ·········ध्यैकैव ततो व्यतिहर···तद्गुणानां स्यात् ॥ २५६ ॥

**इति सर्वान्तराधिकरणम् ॥ २१ ॥**

## सूत्रार्थचन्द्रिकायाम्

### अथ सर्वान्तराधिकरणम् ॥ २१ ॥

**सू ॥ अन्तराभूतग्रामवत्स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत् ॥ ३५ ॥ व्यतिहारो विशिंषति हीतरवत् ॥ ३६ ॥**

**भगवत्पादमते,** आद्यस्य सूत्रस्य 'अन्तराभूतग्रामवत्स्वात्मनः' इत्यन्तं योगविभागात्सूत्रद्वयात्मकमिदमधिकरणम् । 'व्यतिहार'इत्यादिकं सूत्रमधिकरणान्तरम् । आद्यस्याधिकरणस्य 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' इति द्विराम्नायमानं बृहदारण्यकवाक्यं विषयः । तत्र किमनयोर्ब्राह्मणयोर्विद्याभेदः । उत विद्यैक्यमिति विशयः । विद्याभेद इति **पूर्वपक्षः । सिद्धान्तस्तु—सू ॥ अन्तरा भूतग्रामवत्स्वात्मनः ॥ ३५ ॥ आमननादिति** पदस्यानुषंगः । ब्राह्मणद्वयेऽपि स्वात्मनः सर्वान्तरत्वामननाद्विद्यैक्यं विज्ञेयम् । एकस्मिन्देहे द्वयोर्मुख्यतः सर्वान्तरत्वायोगात् । किंवत् । भू-

---

(१) 'उद्दालकश्शालावत्यः' इति क्वपाठः ॥

**तग्रामवत्**=यथा भूतसमूहात्मकस्थूलदेहे पृथिव्यपेक्षया जलमान्तरं जलापेक्षया तेज इत्यादिक्रमेणापेक्षिकं भूतानामान्तरत्वं न मुख्यं तद्वत्। अथवा, 'एको देवस्सर्वभूतेषु गूढ'इत्यादिश्रुत्यन्तरे सर्वेषु भूतग्रामेषु सर्वान्तर एक एवात्माऽऽम्नायते तद्वदनयोर्ब्राह्मणयोरित्यर्थः। एवंच वेद्यैक्याद्विद्यैक्यमिति सिद्धम्। इति।

पूर्वपक्षमनूद्य दूषयति—**सू॥ अन्यथा भेदानुपपत्तिरितिचेन्नोपदेशान्तरवत्॥ ३६॥ अन्यथा**=विद्याभेदानङ्गीकारे। **भेदानुपपत्तिः**=आम्नानभेदस्याभ्यासस्यानुपपत्तिः प्रयोजनाभावादिति चेत्। **न**। उपदेशान्तरवदभ्यासस्योपपत्तिः। तथा हि—यथा छान्दोग्ये 'तत्त्वमसी'त्युपदेशे नवकृत्वोऽभ्यस्यमानेऽपि, न विद्या भिद्यते उपक्रमोपसंहारयोरविशेषात्तद्वत् ब्राह्मणद्वयेऽपि प्रश्नरूपोपक्रमस्य 'अतोऽन्यदार्त'मित्युपसंहारस्य चाविशेषान्न विद्याभेद इति सिद्धम्॥

**इति भगवत्पादमते सर्वान्तराधिकरणम् ॥ २२ ॥**

**अथ व्यतिहाराधिकरणम् ॥ २३ ॥**

**सू॥ व्यतिहारो विशिंषन्ति हीतरवत्॥ ३७॥** अस्य 'तद्योऽहं सोऽसौ योऽसौ सोऽह'मित्यैतरेयकवाक्यं **विषयः**। तत्र किं व्यतिहारेण मतिरेकरूपा विधीयते उत द्विरूपेति **संशयः**। एकरूपेति **पूर्वःपक्षः**। **सिद्धान्तस्तु,** व्यतिहारोऽत्रोपासनार्थमुपदिश्यते। **इतरवत्**=यथा इतरे सर्वात्मत्वादयो गुणा उपासनार्थमुपदिश्यन्ते तद्वत्। तथाहि विशिंषन्ति समाम्नातारः 'त्वमहमस्म्यहं च त्वमसि'इत्युभयोच्चारणेन। तच्च विशेषणं द्विरूपायां मतौ कर्तव्यायामर्थवद्भवति। अन्यथा हीदं विशेषणोभयाम्नानमनर्थकं स्यात्। अतो मतिर्द्विरूपैवेति सिद्धम्॥

**इति भगवत्पादमते व्यतिहाराधिकरणम् ॥ २३ ॥**

**श्रीकण्ठमते,** अस्य विषयवाक्यपूर्वपक्षादिकं पूर्वस्मादविशिष्टम्। 'अन्तरा भूतग्रामव'दिति सूत्रे योगविभागाभावात् व्यतिहारसूत्रेण सहास्य सर्वान्तराधिकरणस्य सूत्रद्वयात्मता। विद्याभेदोऽस्ति वा नास्ति वेति **संदेहे,** विद्याभेद इति **पूर्वपक्षे** प्राप्ते, 'य आत्मा सर्वान्तर'इत्युभयत्र प्रश्नैकरूप्यात् परमेश्वर एवोभयत्र प्रश्नविषयः। यतः प्रतिवचनगतं निरुपाधिकं गुणजातं तत्रैव समुपपद्यते। सद्विद्योपदेशवत्प्रश्नप्रतिवचनावृत्तिरेकविषया। प्रष्टृभेदो रूपभेदश्च न विद्याभेदावहः। अर्थैक्ये निश्चिते सति प्रष्ट्रोर्बुद्धिव्यतिहारः कर्तव्यः। इतरत्र सद्विद्यायामिव उभयप्रकरणगतानि वाक्यानि परमेश्वरं विशिंषन्ति हि। तस्मादेकस्यैव प्रश्नप्रतिवचनगतत्वान्न विद्याभेद इति **सिद्धान्तितः**। पुनरुक्तिस्तु शङ्कानिरासाय 'तत्त्वमसी'तिवत्॥

**रामानुजमते,** सर्वं श्रीकण्ठमतवदेव प्रायशः। किं तु 'सैव हि सत्यादय' इत्युत्तराधिकरणसूत्रमपीदमधिकरणशेषतया व्याख्यातमिति विशेषः। सद्विद्यायामपि 'सेयं देवतैक्षते'त्यादिषु सैव परा देवतैकानुवर्तते। 'ऐतदात्म्यमिदं सर्व'मित्यादिषु त एव सत्यादयः सर्वेषु प्रतिवचनेषूपसंह्रियन्त इत्यर्थः॥

**आनन्दतीर्थमते,** 'अन्तरा भूतग्रामवदितिचेत्तदुक्तम्' इति भगवत्पादानुसारेण योगविभागतः पृथक्पाठः। 'इयदामननात्'इत्यादिकं सूत्रत्रयात्मकमिदमधिकरणं। व्यतिहारसूत्रमधिकरणान्तरमिति विवेकः। तत्राद्ये इयदधिकरणे पूर्वोक्तमधिकारितारतम्यं प्राणावधिकं वा, ततोऽप्यधिकं वेति **संदेहः**। प्राणादीनां सोत्तमत्वदर्शनेन प्राणादधिकस्य श्रुतावनुक्तत्वेऽपि अनुमानतस्तत्साधनस्य शक्यत्वसंभवेन च प्राणादप्यधिकः कश्चिदधिकारी भवितुमर्हति। अतोऽधिकारिणां प्राणावसानत्वाभावात्प्राणात्मकस्य हिरण्यगर्भस्यैव सर्वगुणोपासनयोग्यत्वमित्युक्तमयुक्तमिति **पूर्वपक्षः**। **सिद्धान्तस्तु,** 'प्राणो वाव सर्वेभ्यो भूयान्नहि प्राणाद्भूयान्' इति कौषीतकिश्रुतावाम्नानात्। **इयत्** प्राणावसानमेवाधिकारिणां तारतम्यम्। इति। इदं सूत्रं स्पष्टार्थम्। **सू॥ अन्तराभूतग्रामवदिति चेत्तदुक्तम्॥ ३६॥ भूतग्रामवत्**=यथा नामादिप्राणसमूहे एकस्मादेक उत्तमो दृष्टः तथा। **अन्तरा**=परमात्मानं श्रियं च विना प्राणादप्युत्तमोऽस्त्विति चेत्। **नेति** शेषः। यतः **तदुक्तम्**=तत्र प्राणादुत्तमाभावे 'न हि प्राणाद्भूयान्' इति प्रमाणमुक्तम् अत॰ इत्यर्थः॥

**सू॥ अन्यथाभेदानुपपत्तिरिति चेन्नोपदेशवत्॥ ३७॥ अन्यथा**=प्राणादप्युत्तमाभावे। **भेदानुपपत्तिरिति चेन्न**=प्राणपरमात्मनोर्भेदानुपपत्तिरिति चेन्न। कथम्। **उपदेशवत्**=यथाश्रुतावुक्तं तथाङ्गीकर्तव्यम्। अनुक्तार्थस्यानुमानं तु प्रत्यक्षश्रुत्या बाधितमिति भावः॥

**इति इयदधिकरणम् ॥ २१ ॥**

**अथ व्यतिहाराधिकरणम् ॥ २२ ॥**

**सू॥ व्यतिहारो विशिंषन्ति हीतरवत्॥ ३८॥** प्राणादीश्वरस्योत्तमत्वोपदेशोऽस्ति वा न वेति **संदेहः**। छन्दोगश्रुतौ प्राणस्यैव सर्वोत्तमत्वोपदेशात् 'एष तु वा अतिवदती'त्यादि सत्यातिवादस्य वागादिषु सत्यान्तेष्विव सत्ये उत्तमस्वविषयप्रश्नप्रतिवचनयोरभावेन विष्णुपरत्वाभावात्। प्रत्युत प्राणात्मकहिरण्यगर्भविषयताया एव प्रतीतेश्च। प्राणात्मकहिरण्यगर्भस्यैव सर्वोत्तमत्वेनोपासनं कार्यमिति **पूर्वपक्षः**। सत्यादिवादे तथा प्रश्नप्रतिवचनयोरध्याहारेण यतः छन्दोगाः 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नि'त्यादिना प्रकृतात्प्राणातिवादिनस्सत्यातिवादिनो व्यावर्तयन्ति। ततः प्राणाद-

## अथ सत्याधिकरणम् ॥ २२ ॥

### सू ॥ सैव हि सत्यादयः ॥ ३७ ॥

यद्दृष्टान्तेन पूर्वाधिकरणनिर्णयः तत्रापि सद्विद्यायां संशयः भिन्नेयमभिन्ना वेति ॥

प्रश्नावृत्तिदर्शनात् प्रतिवचनभेददर्शनाच्च प्रत्यावृत्तिभिन्ना ॥

---

## अथ सत्याधिकरणम् ॥ २२ ॥

सू० ॥ सैव हि सत्यादयः ॥ ३७ ॥ पूर्वाधिकरणसूत्रोदाहृतदृष्टांताक्षेपेण संगतिसूचनपूर्वकमेकरूपप्रश्नस्याभ्यासन्यायेन विद्याभेदकत्वाऽभेदकत्वाभ्यां संशयं दर्शयति— यद्दृष्टान्तेनेति पृष्टार्थस्योत्तरे निवृत्ते तथैव पुनः प्रश्नो न युक्तः । शङ्कान्तरनिराकरणार्थश्चेत्, प्रश्न एव शङ्कान्तरोत्कीर्तनेन भाव्यम् । अतएवोषस्तिब्राह्मणे 'यत्साक्षादपरोक्षा'दित्यादिना सर्वान्तरप्रश्नानन्तरम्, 'एष त आत्मा सर्वान्तर' इति याज्ञवल्क्यस्योत्तरे सति नानेन स्पष्टं सर्वांतरो दर्शितो भवतीति निर्धार्य शृङ्गग्राहिकया दर्शनीय इत्यभिप्रायेण 'कतमो याज्ञवल्क्य सर्वान्तरः' इति पुनः पृष्टे 'यः प्राणेन प्राणिति स त आत्मा सर्वांतरः' इत्यादौ च याज्ञवल्क्येनोपन्यस्तेन सहोवाचोषस्तिश्चाक्रायणो यथा विब्रूयादसौ गौरसावश्व इत्येवमेवैतद्व्यपदिष्टं भवतीति शङ्कोद्भावनपूर्वकमेव 'यदेव साक्षादपरोक्षाद्ब्रह्म तन्मे ब्रूही'त्यादिना प्रश्नावृत्तिः कृता । अत्र हि विशिष्य सर्वांतरो वक्तव्य इति द्वितीयप्रश्नानंतरं तद्वचनार्थं प्रवृत्तेन त्वया प्राणितृत्वलिङ्गेन सर्वांतरत्वप्रदर्शनं गामश्वं वा शृङ्गग्राहिकया प्रदर्शयिष्यामीति प्रतिज्ञाय सास्नादिमान्गौः केसरादिमानश्व इति वचनेन तुल्यं ज्ञातमिति शङ्कोद्भावनं कृतम् । न तयाऽत्रशङ्कोद्भावनं दृश्यते । तस्मादेकरूपप्रश्नभेदादविशेषपुनःश्रवणरूपाभ्यासन्यायेन प्रष्टव्यभेदोवसीयते । अतोऽत्र 'भूय एव मा भगवान्विज्ञापयत्वि'त्यस्य सद्विषय एव पुनर्विद्यान्तरमुपदिशेत्यर्थः । न चोक्तार्थग्रहणाशक्त्यापि लोके पुनः प्रश्नो दृश्यते तद्वदिह किं न स्यादिति वाच्यम् । तथा सत्युक्तार्थस्यैव पुनः कथनापत्तेः । इहतु प्रतिप्रश्नं गुणान्तरप्रतिपादनं दृश्यते । तस्मादिह विद्याभेदो युक्त इति पूर्वपक्षमाह— प्रश्नावृत्तीति । नात्र विद्याभेदः । सर्वेष्वपि प्रतिवचनेषु सत्यत्वात्मत्वादिगुणावृत्त्या विद्यैक्यप्रत्यभिज्ञानात् । प्रश्नावृत्तिस्तु तत्र तत्र प्रसक्तानां शङ्काविशेषाणामुपाकरणार्थेति प्रश्नेषु शङ्कोद्भावनाभावेऽपि तत्तच्छंकाविशेषोपाकरणार्थं दृष्टांतविशेषोपन्यासपूर्वकप्रतिवचनपर्यालोचनयैवावगम्यते । तथाहि—सुषुप्तौ जीवा यत्रापि यन्ति तत्सदिति नवखण्डमध्ये प्रथमखण्डेन बोधिते सति 'सुषुप्तौ सत्सम्पन्ना जीवाः किमिति सत्सम्पत्तिं न विदु'रिति शङ्काभिप्रायेण प्रश्न इत्येतत् 'यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ती'त्यादि द्वितीयखण्डे नानावृक्षाणां रसान्मधुमक्षिकाभिर्मधुत्वेन समाहृतात्प्रस्तुत्य 'यथा तत्र न वि-

---

त्यधिकत्वेन विष्णोरुपदेशास्सिद्ध एवेति सर्वोत्तमत्वेन विष्णोरेवोपासनं कार्यमिति **सिद्धान्तः । सूत्रार्थस्तु, व्यतिहारः**=प्राणप्रकरणादनन्तरं विष्णोः प्रकरणात्प्राक्प्रश्नप्रतिवचनयोरध्याहारः कार्यः । कुतः । **हि**=यस्मात् । **इतरवत्**=नामादितो वागादिकमिव प्राणवादिनस्सकाशात्सत्याख्यविष्णुवादिनः छन्दोगाः 'एष तु वे'ति तुशब्देन विशिषन्ति व्यावर्तयन्ति तस्मादित्यर्थः ॥

**इति सूत्रार्थचन्द्रिकायां सर्वान्तराधिकरणम् ॥ २१ ॥**

इति मासे ब्रूमः । न भिन्नेयं सद्विद्या । 'सेयं देवता' इति प्रस्तुताया एव महादेवतायाः प्रश्नप्रतिवचनेष्वनुवृत्तेः । यतः 'तत्सत्यं स आत्मा तत्त्वमसि' इति पुनःपुनः सत्यादीनामावृत्तिर्गम्यते, अतो वस्त्वैक्यादभिन्नेयं विद्येति ॥

इति सत्याधिकरणम् ॥ २२ ॥

वेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमास्सर्वाः प्रजास्सति संपद्य न विदुस्सति संपत्स्यामह' इति प्रतिवचनभंग्यावसीयते । ननु युक्तं सुषुप्तौ सर्वेंद्रियोपरमात्सत्संपत्तेरावेदनम् उत्थितास्सतोऽहमागत इति किमिति न विदुः । स्वगृहे सुप्तोत्थिता हि स्वगृहाद्वयमागता इति जानन्तीत्यभिप्रायेण द्वितीयः प्रश्न इत्येतत् 'इमास्सोम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते' इत्यादि तदनंतरखण्डे समुद्रादाकृष्य जलधरमुक्तैर्जलैः संभूताः प्रवहन्तीर्नदीः प्रस्तुत्य 'ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीत्येवमेव खलु सोम्येमास्सर्वाः प्रजास्सत आगत्य न विदुस्सत आगच्छामह इतीति' प्रतिवचनभंग्याऽवसीयते । एवं तृतीयादिप्रश्नानामपि शङ्काभिप्रायः । तदनन्तरखण्डगतदृष्टान्तविशेषोपयुक्तप्रतिवचनभंग्यैवोन्नेयः । एवं प्रतिवचनभंग्योन्नेतुं शक्यश्शङ्काभिप्राय इति न प्रश्नवाक्येषु श्रुत्या निर्दिष्टः । तस्माद्युक्तं सदुपदेशे विद्यैक्यमिति सिद्धान्तयति—न भिन्नेयमिति । सूत्रे सैव सेयं देवतेति प्रस्तुतासच्छब्दोक्ता परदेवतैव सर्वेषु प्रश्नप्रतिवचनेष्वनुवर्तते इति साध्याध्याहारः । सत्यादयो हीति । हि शब्दो भिन्नक्रमः । सत्यत्वात्मत्वाद्यनुवृत्तेरित्यर्थः । ततश्च रूपैक्यान्न विद्याभेदशंकावकाश इति भावः ॥

इति सत्याद्यधिकरणम् ॥ २२ ॥

---

नयमणिमालायाम्

अथ सत्याद्यधिकरणम् ॥ २२ ॥

सू० ॥ सैव हि सत्यादयः ॥ ३७ ॥

सद्विद्या भिन्नैव प्रश्नप्रतिवचनभेदेन । एकस्यामावृत्तिर्व्यर्था तत्सत्यमित्यादेः ॥ २५७ ॥

एकत्वमेव तस्यास्सत्यादिप्रत्यभिज्ञया युक्तम् । उपपादकभेदात्स्यादावृत्तिर्बोधदार्ढ्यहेतोश्च ॥ २५८ ॥

इति सत्याधिकरणम् ॥ २२ ॥

सूत्रार्थचन्द्रिकायाम्

अथ सत्याद्यधिकरणम् ॥ २२ ॥

सू ॥ सैव हि सत्यादयः ॥ ३७ ॥

**भगवत्पादमते,** अस्य 'महद्यक्षं प्रथमजं वेद सत्यं ब्रह्म' इति सत्यविद्यां विधाय तदनन्तरं 'तद्यत्सत्यमसौ स आदित्यः' इत्यादि श्रूयमाणं बृहदारण्यकवाक्यं विषयः । तत्र सत्यविद्यातस्तदनन्तरविद्या भिद्यते न वेति **संदेहः** । भिद्यत इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** इयमनन्तरविद्या **सैव**=सत्यविद्यैव न ततो भिद्यते । कुतः । हि शब्दो **हेतौ** । 'तद्यत्सत्य'मिति प्रकृतस्यैवोपास्यस्य हिरण्यगर्भस्याकर्षणाद्धेतोः । नह्युपास्याभेदे विद्याभेदो युक्तः । अतो विद्यैक्यात्पूर्वापरवाक्यस्थास्सर्वे सत्यादयो गुणा उपसंहर्तव्या इति सिद्धम् । इति ॥

**श्रीकण्ठमते,** सत्यविद्यायां प्रश्नावृत्तिदर्शनात्प्रत्यावृत्ति विद्या भिन्ना वा अभिन्ना वेति **संशयः** । भिन्नेति **पूर्वपक्षः** । **सिद्धान्तस्तु,** न भिन्नेयं सद्विद्या । सेयं देवतेति प्रस्तुताया एव महादेवतायाः प्रश्नप्रतिवचनेष्वनुवृत्तेः । 'तत्सत्यं स आत्मा' इति पुनः पुनः सत्यादीनामावृत्तिर्गम्यते । अतो वस्त्वैक्यादभिन्नेयं विद्येति ॥

**रामानुजमते,** अस्य सूत्रस्य पूर्वाधिकरणेऽन्तर्भावात्तत्रैव तद्व्याख्यातम् ॥

**आनन्दतीर्थमते,** पूर्वत्र प्राणाद्विष्णुरेवाधिक इति यदुक्तं तद्युक्तं न वेति **संदेहः** । प्राणाधिकत्वेनोपदिष्टास्सत्यप-

## अथ कामाधिकरणम् ॥ २३ ॥

### सू ॥ कामादयस्तत्र तत्र चायतनादिभ्यः ॥ ३८ ॥

छान्दोग्ये तैत्तिरीयके वाजिशाखायां कैवल्योपनिषदि च दहरविद्या श्रुता। सेयमभिन्ना भिन्ना वा। इति संशये पूर्वः पक्षः—'यदिदमस्मिन् पुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशः' इत्यारभ्य दहराकाशशब्दोक्तस्य दहरपुण्डरीकवर्तिनोऽपहतपाप्मत्वादिगुणाष्टकं मुख्यमाम्नातम्। तैत्तिरीयके 'दहरं विपाप्मम्' इत्यारभ्य दहरपुण्डरीकवर्तिनः प्रणवप्रकृत्यात्मनादवाच्यत्व-महेश्वरशब्दवाच्यत्व, कृष्णपिङ्गलत्व-विरूपाक्षत्वादयो धर्माः प्रदर्शिताः। वाजिशाखायां 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः' इति वशित्वादयः। कैवल्योपनिषदि—'हृत्पुण्डरीकं विरजम्' इत्यारभ्य 'विभुं चिदानन्दमरूपमद्भुतम्। उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्' इत्यन्तेन हृदयपुण्डरीकवर्तिनः परस्य त्रिलोचनत्व-नीलकण्ठत्व-चिदानन्दरूपत्वो-मासहायत्वादयो धर्माः। तत्र नीलकण्ठत्वादीनां शरीरधर्मत्वेन सत्यत्वादीनामात्मधर्मत्वेन विरोधादुपसंहारो न न्याय्यः। तस्माद्विद्या भिन्नेति ॥

---

## अथ कामाद्यधिकरणम् ॥ २३ ॥

सू० ॥ कामादयस्तत्र तत्र चायतनादिभ्यः ॥ ३८ ॥ प्राणितृत्वाशनायातीतत्वादीनामविरोधेन धर्मिभेदावहत्वाभावाद्विद्यैक्यं समर्थितम्। इह विग्रहधर्माणामतथात्वाद्विद्याभेद इत्युत्थानात्संगतिः। ननु विग्रहधर्माणामात्मधर्माणां च नास्ति परस्परं विरोधः। उभयेषामप्यात्मनि व्यवहिताव्यवहितसंबंधसत्त्वात्। अन्यथैकस्यामेव कैवल्यशाखायां विग्रहधर्माणामात्मधर्माणाञ्च समुच्चित्य श्रवणस्य का गतिः। विशिष्य च विरूपाक्षत्वनीलकण्ठत्वादीनामपहतपाप्मत्वादीनाञ्च विद्याभेदकत्वाभाव'स्सर्ववेदान्तप्रत्ययाधिकरणे' समर्थितः। अतोऽत्र पूर्वपक्षो न संभवतीत्याशङ्क्य तमुपपादयति—तत्र नीलकण्ठत्वादीनामिति। 'नीलकण्ठ'मित्यनेन कण्ठमात्रनैल्यं प्रतीयते 'कृष्णपिंगल'मित्यनेनार्धनैल्यं प्रतीयते। 'समं स्यादश्रुतत्वादि'तिन्यायात्। तथा 'त्रिलोचन'मित्यनेन लोचनानां त्रित्वसंख्यैवोच्यते, न तु वैरूप्यम्। कैवल्यशाखायां 'शिवं प्रशान्तममृतं ब्रह्मयोनि'मिति शिवशब्देन निरस्तनिखिलदोषसमस्तमंगलगुणाकरत्ववाचिना वैरूप्यस्यापि प्रतिक्षेपात्। 'विरूपाक्ष'मित्यनेन तु तद्वैरूप्यमुच्यते। एवं विग्रहधर्माणां तावत्परस्परं विरोधः। तथा आत्मधर्माणामपि क्वचित्सत्यकामत्वमुच्यते। 'क्वचित्प्रशान्त'मिति निष्कामत्वमुच्यते इत्यादि। एवं धर्मवैलक्षण्यात्प्रतिशाखं भिन्ना दहरविद्येत्युपसंहरति—तस्मादिति। 'तत्र तत्रे'ति

---

दोदिताद्विष्णोरपि विज्ञान-मति-श्रद्धा-निष्ठा-कृति-सुख-भूमा-हंकारा-त्मनामुपदिष्टत्वान्न युक्तमिति **पूर्वपक्षः**। **सिद्धान्तस्तु, सैवहि**=परदेवता विष्ण्वाख्या सत्यविज्ञानमत्यात्मिका। 'सत्यं भगवो जिज्ञासे' इति सत्याख्यस्य विष्णोर्गुणजिज्ञासायां तद्गुणत्वेन विज्ञानादीनामुक्तत्वात् अन्यथा सत्यजिज्ञासायां विज्ञानादिकथनस्यासांगत्याच्च। अतः प्राणादधिका बहवो न भवन्ति। किंतु श्रीतदीशावेवेत्यर्थः। अतः प्राणाद्विष्णोराधिक्यवर्णनं युक्तमेवेति ॥

**इति सूत्रार्थचन्द्रिकायां सत्याद्यधिकरणम् ॥ २२ ॥**

एवं प्राप्त उच्यते—तत्र तत्र हृदयपुण्डरीकायतनादिभ्यो विद्यैक्यमेव । अतः सत्यकामादयः सर्वत्रोपसंहार्याः । छान्दोग्यगता अपहतपाप्मत्वादयो वाजिसाखागताः वशित्वादयः तैत्तिरीयगताः प्रणववाच्यत्वादयः कैवल्यगताश्चिदानन्दरूपत्वादयश्च सर्वे एते गुणा दहर-विद्यायां ब्रह्मणोऽनुसन्धेयाः । कैवल्योपनिषद्गतमुमासहायत्वं त्रिलोचनत्वं अन्यत्र कृष्णपिङ्गलत्वं विरूपाक्षत्वं चैकार्थम् । आवृत्तिरादरार्था । सर्वत्र गुणानामावृत्तौ तथा द्रष्टव्यम् । अत्र गुणित्वेन ब्रह्मण एकस्यैवोपास्यत्वादपहतपाप्मत्वादियोगि सर्वेश्वरमोङ्कारवाच्यमुमासहायं त्रिलोचनं नीलकण्ठं चिदानन्दरूपमनन्तममृतमद्भुतं परं ब्रह्म दहरपुण्डरीकमध्येऽनुसन्धेयमिति परविद्याख्यियमेव प्रधानभूता । छान्दोग्ये कैवल्योपनिषदि चैतद्विद्यानिष्ठस्य । "परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते"

---

वीप्सायां द्विर्भावः । चस्त्वर्थः पूर्वपक्षनिराकरणार्थः । हृदयेति । हृदयपुण्डरीकायतनत्वं तावत्सर्वास्वपि शाखासु तुल्यम् । विशोकत्वं छांदोग्यकैवल्यतैत्तरीयकेषु तुल्यं । मुक्तिफलश्रवणमपि तेषु तुल्यं । सेतुत्वं छांदोग्यवाजसनेयकयोस्तुल्यं । इदं सर्वमादिशब्देन गृह्यते । शरीरधर्माणां परस्परविरोधं परिहरति । कैवल्येति । उमासहायत्वं कृष्णपिंगलशब्देनोच्यते । त्रिलोचनत्वं विरूपाक्षशब्देनोच्यते । संख्यावैषम्यमेव तत्र वैरूप्यं विवक्षितम् । कण्ठमात्रे नैल्यं वामेतरभागे विवक्षितम् । 'प्रशान्त' मिति नित्यतृप्तत्वेन स्वयं भोगतृष्णाराहित्यमुच्यते । 'सत्यकाम' मिति तत्सृष्टानामस्मदादिभोग्यपदार्थानामवितथत्वमुच्यते । बहुगुणप्रत्यभिज्ञानुरोधेन विद्यैक्यसिद्धावेवमविरोधेन व्याख्यानमुचितमिति भावः । नन्वेवं शाखाभेदेन गुणावृत्तिः किमर्थं विद्यैक्यसिद्धये गुणप्रत्यभिज्ञानार्थमिति चेन्न । गुणान्तरप्रत्यभिज्ञया विद्यैक्ये सिद्धे हि त्रिलोचनविरूपाक्षादिशब्दानामविरोधेन व्याख्यानं क्रियते । न तु तदभेदप्रत्यभिज्ञानाद्विद्यैक्यसिद्धिरस्तीत्यत्राह—आवृत्तिरिति । सर्वत्र गुणानामावृत्ताविति । यथैकस्यां शाखायामंबिकापतय उमापतय इत्याद्यावृत्तिरादरार्था तथेहापीत्यर्थः । एवं विद्यैक्ये सिद्धे तत्फलं नानाशाखाम्नातगुणोपसंहारं दर्शयति । अत्र गुणित्वेनेति । 'अपहतपाप्मत्वादियोगीति' विशेषणं छांदोग्याम्नातानां सर्वेषां गुणानामुपलक्षणम् । 'सर्वेश्वर'मिति बृहदारण्यकाम्नातानाम् । 'ओंकारवाच्यमिति' तैत्तरीयकाम्नाताना 'मुमासहाय'मिति कैवल्यशाखाम्नातानामिति विवेकः । तत्रानंतरूपमित्यस्य व्याख्यानमनंतमिति । अनंतं अविनाशि नित्यं स्वरूपमस्येति श्रुत्यर्थः । एवं व्याख्यान एव दहरपुण्डरीकस्यांतरुपासनं भवतीति भावः । परविद्याख्येति । यद्यपि सर्वासामपि परब्रह्मविषयाणामहंग्रहोपासनानां चाविशिष्टं मुक्तिफलत्वं वक्ष्यति च सूत्रकारः 'विकल्पो विशिष्टफलत्वा'दिति । तथाप्याचार्यस्य दहरविद्याप्रियत्वादेवमुक्तिः । अथवा दहरविद्यासु उमासहायत्वादिविशिष्टपरब्रह्मपरमशिवविषयैव दहरविद्याप्रधानभूतेत्यर्थः । तेनेयं शंका व्यावर्त्यते । आत्मबोधोपनिषदि नारायणोपास्या दहरविद्या श्रूयते सा परमेश्वरोपास्यायाः कैवल्यतैत्तरीयकोपनिषदाम्नाताया दहरविद्याया भिन्नैव । उपास्यभेदात् । एवं द्विविधदहरविद्यासत्त्वे सति यद्यपि बृहदारण्यकाम्नाता गुणाश्शैवीं दहरविद्यां प्रतिपद्यन्ते । तत्र 'सर्वस्येशान' इति 'एष भूताधिपतिरि-

'ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्' इति साक्षात् तस्यैवोपास्यस्य परब्रह्मणः प्रकृतिमण्डलातीतस्य प्राप्तिर्हि फलमवगम्यते। अत एव नीलकण्ठत्वादिधर्मस्यापहतपाप्मत्वादिगुणानां च ब्रह्मणि नित्यत्वादन्योन्यसापेक्षत्वाच्चोपसंहारे न विरोधः, अप्रसक्तस्य प्रतिषेधायोगात्। त्रिलोचनत्वादिलक्षणशरीरविशिष्टे परब्रह्मणि प्रसक्तानां शरीरधर्माणां पापजरामरणक्षुत्तृडसत्यकामासत्यसंकल्पानां निषेधाय हि अपहतपाप्मत्वादयः प्रतिपादिताः। त्रिलोचनत्वादिलक्षणशरीरकमपि परं ब्रह्मापहतपाप्मकं जरारहितमशोकमविजिघत्समपिपासं सत्यकामं सत्यसंकल्पं चिदानन्दरूपं भवतीति न विरोधः॥

इति कामाद्यधिकरणम्॥ २३॥

---

त्येष सर्वेश्वर' इति च लोकवेदप्रसिद्धशिवरूढिभावानामीशानभूताधिपतिसर्वेश्वरनाम्नां श्रवणात्। तथापि छांदोग्याम्नातानामपहतपाप्मत्वादीनां कस्यां दहरविद्यायामन्वय इत्यत्र नास्ति विनिगमकमिति शंका भवति। तत्समाधानप्रकारस्त्वयम्[1]। शैवी दहरविद्या तावत्प्रधानभूता कैवल्यशाखायां मुक्तिफलश्रवणात्। तत्र हि 'तमसः परस्ता'दिति विशेषितम्। अतः छांदोग्येऽपि मुक्तिफलश्रवणात्तदाम्नाता गुणाश्शैवीं दहरविद्यां प्राप्नुवंतीति युक्तम्। वैष्णवी तदुपसर्जनभूता। 'वैकुण्ठं भगवल्लोकं गमिष्यती'ति श्रवणेन तस्या वैकुण्ठप्राप्तिद्वारा मुक्तिहेतुत्वात्। मुक्तिस्थानस्य वैकुण्ठस्य चोर्ध्वाधरभावः परापरभावश्च प्राग्व्यवस्थापितः। वैकुण्ठप्राप्तानां क्रममुक्तिं च भाष्यकारो वक्ष्यति। एवञ्च यद्यपि त्रिलोचनत्वविरूपाक्षत्वादीनामविरोधः स्पष्ट इति विरोधनिरासेन नैतदधिकरणं सप्रयोजनं भवेत्। तथाप्युक्तशंकानिरासेन प्रयोजनमिति भाष्यकारस्याशयः। विग्रहधर्माणामात्मधर्माणाञ्च परस्परविरोधेनाऽपि विद्याभेदप्रसक्तिर्नास्तीति सर्ववेदान्तप्रत्ययाधिकरणसिद्धमर्थं स्मारयति—नीलकण्ठत्वेत्यादिना। चिदानन्दरूपे शिवस्य दिव्यविग्रहे वस्तुस्वाभाव्यात्पाप्मजरादिप्रसक्तिर्नास्तीत्यर्थः॥

इति कामाद्यधिकरणम्॥ २३॥

---

## नयमणिमालायाम्।

### अथ कामाद्यधिकरणम्॥

सू० ॥ कामादयस्तत्र तत्र चायतनादिभ्यः॥ ३८॥

भिन्नैव दहरविद्या युक्ता कैवल्यताण्डिशाखादिगता। एकगतत्वायोगान्नीलग्रीवत्वसत्यकामादीनाम्॥ २५९॥

हृत्कमलस्थित्यादेर्गुणस्य साम्यान्न भिन्नैषा। नीलग्रीवत्वादिवपुर्विशिष्टात्मपर्यन्ता॥ २६०॥

एवं सत्यप्यवार्यस्सति वपुषि विभोस्सत्यकामाद्ययोग स्तत्संबन्धस्य सर्वेष्वपि दुरितजरामृत्युकोशातिगत्वात्।

मैवं तेषु प्रसक्तेष्वपहतदुरितत्वादयस्साऽप्यधीता इत्यन्योन्यव्यपेक्षा नियमितमुपसंहारमंगी कुरुष्व॥ २६१॥

इति कामाद्यधिकरणम्॥ २३॥

## सूत्रार्थचन्द्रिकायाम्

### अथ कामाद्यधिकरणम्॥ २३॥

सू॥ कामादीतरत्र तत्र चायतनादिभ्यः॥ ३८॥

भगवत्पादमते, छान्दोग्ये 'दहरोऽस्मिन्नन्तर आकाश' इति श्रुतस्य दहराकाशस्य सत्यकामत्वादयो गुणा आम्नाताः।

---

(१) 'तद्व्यवच्छेदप्रकारस्त्वयम्' इति ख. पाठः।

## अथ अलोपाधिकरणम् ॥ २४ ॥

**ननु प्रियशिरस्त्वादीनामिव नीलकण्ठत्वादीनामवयवानां ब्रह्मस्वरूपान्तर्भावे तस्योपचयापचयप्रसक्तिरित्यतो नीलकण्ठत्वादिकं लुप्यत इत्यत आह—**

### सू ॥ आदरादलोपः ॥ ३९ ॥

**पूर्वत्र नीलकण्ठत्वादिविशिष्टं रूपमुमाभिधानपरमशक्तिसाहित्यं सत्यसंकल्प-**

---

## अथ अलोपाधिकरणम् ॥ २४ ॥

**पूर्वाधिकरणेन प्रसंगसंगत्योत्तराधिकरणमवतारयति—नन्विति । सू० ॥ आदराद्लोपः ॥ ३९ ॥ नीलकण्ठत्वादिविशिष्टो विशिष्टविग्रहस्सत्यसंकल्पत्वादिगुणगणश्च**

---

बृहदारण्यके तु 'य एषोऽन्तर्हृदय आकाश'इत्यभिहितस्याकाशाश्रयस्य सर्ववशित्वादयो गुणाः । ते परस्परमुपसंहर्तव्या न वेति **संदेहः** । नोपसंहर्तव्या इति **पूर्वपक्षः** । **सिद्धान्तस्तु, कामादि**=सत्यकामत्वादिगुणजातम् । **इतरत्र**=बृहदारण्यके उपसंहर्तव्यम् । यच्च सर्ववशित्वादिकं तदपि **तत्र** च=छान्दोग्ये उपसंहर्तव्यम् । कुतः । **आयतनादिभ्यः**=उभयत्राविशिष्टेभ्यो हृदयायतनसेतुत्वव्यपदेशादिभ्यो हेतुभ्यः । एवं वेद्याभेदेऽपि सगुणनिर्गुणत्वेन विद्ययोर्भेदात्कथमुपसंहार उपपद्येतेति चेत् न उपसंहारस्य विद्यास्तुत्यर्थत्वेनोपासनार्थत्वाभावान्न काचिदनुपपत्तिरिति ॥ अत्र मते **रामानुजमते च** 'कामादीतरत्रे'ति पाठः । **श्रीकण्ठमते** 'कामाद्यस्तत्र तत्रे'ति सूत्रपाठे विशेषः ॥

**श्रीकण्ठमते,** तथा **रामानुजमते, च** यद्यपि **विषयवाक्यपूर्वपक्षसंदेहसिद्धान्तादिक**मविशिष्टमेव पूर्वस्मादिति वक्तव्यम् । तथाप्यनयोर्मतयोः पूर्वपक्षसिद्धान्तोपपादनं तु स्वस्वसिद्धान्तप्रक्रियानुसारेण दहरप्रतिपादकबहुश्रुतिवचनोपन्यासपूर्वकं विवृतमिति विशेषः । **श्रीकण्ठमते** इदमधिकरणं शांकरमतवदेकसूत्रात्मकमेव । **रामानुजमते** तूत्तरसूत्रद्वयस्याप्यत्रान्तर्भावेन सूत्रत्रयात्मकमिदमधिकरणमित्यस्ति विशेषः पूर्वमताभ्याम् । अतस्तत्प्रक्रियानुसारेण उत्तरसूत्रयोरर्थोऽत्र वर्ण्यते—'मनसैवानुद्रष्टव्यं नेह नानास्ति किंचने'त्यादेः पूर्वप्रकृतत्वात् 'स एव नेति नेत्यात्मे'ति च वक्ष्यमाणत्वात्सर्ववशित्वादिविशेषाणां ब्रह्मस्वरूपत्वासंभवात् कथं सत्यकामत्वादेर्मोक्षसाधनोपासनरूपत्वमित्यत आह—**सू ॥ आदरादलोपः ॥ ३९ ॥ आदरात्**=वशित्वादेः प्रमाणान्तराविदितरूपस्य श्रुत्येकसमधिगम्यस्यादरेण प्रतिपादनात् । **अलोपः**=अप्रतिषेधस्तस्यापि ब्रह्मगुणत्वमवश्याश्रयणीयम् । अविशेषनिषेधास्तु सकलेतरप्राकृतविशेषविषयाः । सर्वस्य ब्रह्मकार्यतया नानात्वनिषेधो ब्रह्मात्मकत्वाभिप्रायः ॥

सगुणोपासनस्य पितृलोकादिसांसारिकफलत्वेन मुक्तिफलत्वाभावमाशंक्य परिहरति—**सू ॥ उपस्थितेऽतस्तद्वचनात् ॥ ४० ॥ उपस्थिते**=ब्रह्मोपसंपन्ने । **अतः**=ब्रह्मोपसंपत्तेरेव हेतोः । **तद्वचनात्**=पितृलोकादिप्राप्तिवचनात् न तत्सांसारिकं फलम् । अपि तु साक्षान्मुक्तस्यैव । 'अस्माच्छरीरात्समुत्थाय'—'स्वस्वराड्भवति'—इति च निवृत्ताविद्यस्य हि स्वेन रूपेणाभिनिष्पन्नस्यैवोच्यते । अतो ब्रह्मसंपत्तिहेतुकत्वं क्रीडादेरवगम्यते ॥

### इति श्रीकण्ठरामानुजमतयोः कामाद्यधिकरणम् ॥

**आनन्दतीर्थमते** 'कामादितरत्र इति 'उपस्थितेस्तद्वचनात्' इति च सूत्रयोरस्ति पाठभेदः । अत्र उपासनाधिकारिणां प्राणावसानत्वमुक्तं युक्तं वा न वेति **संदेहः** । तत उत्तमायाः श्रियोऽपि साधुत्वे सति बद्धत्वेन तदधिकारित्वान्न युक्तमिति **पूर्वपक्षः** । **सिद्धान्तस्तु,** नित्यमुक्तैव श्रीस्सदा भगवत्समीपे मूलरूपेण स्थितवान्यत्र भगवदिच्छानुसारिण्या स्वेच्छयैव रुक्मिण्याद्यवतारान्करोति । 'सर्वकामायतना सर्वकाला सर्वेच्छानुबद्धा बन्धिका सैषा प्रकृतिरविकृतिः' इत्यादिश्रुतेः । सा हि नामादिवन्न बद्धा नापि परमेश्वरवत्तन्मोक्त्री । किं तु सर्वेषां बन्धिका । अतः नामादि बद्धमोक्तृप्रस्तावे न पठिता । अतः युक्तमेव प्राणावसानत्वमुपासनाधिकारिणामिति । **सूत्रार्थस्तु,** लक्ष्मीस्तत्र भगवत्समीपे स्थिता सती **इतरत्र च**=भूम्यादावपि कामादीशेच्छयैवावतारान्करोति । कुतः । **आयतनादिभ्यः**=सर्वगतत्वप्रतिपादक 'सर्वायतने'त्यादिश्रुत्यादिभ्य इत्यर्थः । उत्तराधिकरणसूत्रद्वयेन सहेदमधिकरणं सूत्रत्रयात्मकं वेदितव्यम् ॥

**सू ॥ आदरादलोपः ॥ ४१ ॥ आदरात्**=भगवति निरुपाधिकभक्त्यतिशयात् **अलोपः**=श्रियो भगवदुपासनाभावो नेत्यर्थः ॥ **सू ॥ उपस्थितेस्तद्वचनात् ॥ ४२ ॥** श्रियो नित्यमुक्तत्वं युज्यते । कुतः । **उपस्थितेः**=हरिसमीपे सदास्थितेः । श्रियो नित्यसमीपस्थत्वं च **तद्वचनात्**='द्वावेता'विति नित्यसंबन्धित्ववचनाद् ज्ञायत इत्यर्थः ॥

### इति सूत्रार्थचन्द्रिकायां कामाद्यधिकरणम् ॥ २३ ॥

त्वादिगुणजातं च निरूपितम्। इह तेषां परब्रह्मणि लोपोऽस्ति कदाचित्, अथ वा कदाचिदपि न लोप इति संशयः। किं तावत् प्राप्तम्? उपासनार्थं परब्रह्मणि कल्पितत्वात् तेषां कदाचिल्लोप इति प्राप्ते ब्रूमः—परब्रह्मण उमासहितत्वादीनां सर्वत्र श्रुतिष्वभ्यासादादरादलोप एव। अत एवाल्पशक्तिकमुच्यते परं ब्रह्म। कुत्रादरादभ्यास इति चेत्—सर्वत्रैव। कृष्णपिङ्गलं विरूपाक्षं इति शक्तिसाहित्ये त्रिलोचनत्वे च सिद्धेऽपि पुनरादरार्थं हि 'उमासहायं परमेश्वरं प्रभुं त्रिलोचनम्' इत्यभ्यस्तम्। सवितृमण्डलविद्यायां च 'नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतये' इति ह्यादरार्थमुमापतित्वमभ्यस्तम्। अन्यत्र 'नीलग्रीवो विलोहितः....नीलग्रीवाय च शितिकण्ठाय च' इत्यादिषु नीलग्रीवत्वमीश्वरस्यादरादभ्यस्तम्। सत्यसंकल्पत्वादीनामेकत्र सिद्धानामन्यत्र पुनर्वचनमादरार्थमेव। तस्मादुमापतित्वादीनामभ्यासादादरादलोप एव परब्रह्मण इति। धर्मब्रह्मणोः प्रमाणान्तरागम्ययोर्यादृशं स्वरूपमभिधत्ते भगवती श्रुतिस्तादृशमेवाभ्युपेयं श्रुतिप्रामाण्यावलम्बिनाम्। अन्यथा तद्विरुद्धतर्कावलम्बने जगदुपादानत्वादिकं न सिद्ध्येत्। अतः श्रुतिरेव च 'सत्यं ज्ञानमनन्तं ब्रह्म' इति सत्यज्ञानाकारमपरिच्छिन्नं ब्रह्मे त्युक्त्वा,

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षम्.................. ॥

इत्यादिना तस्यैव त्रिलोचनत्वपरमशक्त्युमाशबलितत्वरूपं विशिष्टमभिधत्ते। पुनश्च तस्य 'स एको ब्रह्मण आनन्दः' इति निरतिशयानन्दवत्त्वमाह। तस्यैव च 'आकाशशरीरं ब्रह्म। सत्यात्म प्राणारामं मनआनन्दम्। शान्तिसमृद्धममृतम्' इत्यादिना चित्प्रकाशरूपत्वमात्मारामत्वं, बाह्यकरणनिरपेक्षान्तःकरणैकानुभूयमानपरमानन्दविलासत्वं, उपशान्तसकलोपद्रवकलङ्कत्व, मनादिमुक्तत्वं, च प्रकाशयति। अस्य हि विरूपाक्षत्वादिलक्षणशरीरसंबन्धेन जीववत् प्रसक्तान् दोषांश्च 'अपहतपाप्मा' इत्यादिना निराकरोति। 'यः सर्वज्ञः सर्ववित्' 'पराऽस्य शक्तिः' 'पशूनां पतये' इत्यादिभिरस्य सर्वज्ञत्वसर्वशक्तित्वस्वतन्त्रत्वादिकं च निरूप-

---

लुप्यते न वेति कल्पितत्वाकल्पितत्वाभ्यां विशये पूर्वपक्षः। आनन्दरूपश्शिवस्य विग्रह इति 'आकाशशरीरं ब्रह्म' 'आनन्दरूपममृतं यद्विभाती'त्यादि श्रुत्यनुसारादिष्यते। न चानन्दस्य वक्षःकंठहस्तांगुल्यादिरूपेण स्थौल्यकार्श्ये संभवतः। ततश्च तत्संभवे प्रियशिरस्त्वादिकमपि तात्त्विकं स्यात्। अतो विग्रहस्तावत्कल्पितः तत्सहपाठाद्गुणगणश्च कल्पित इति। सिद्धान्तस्तु, अभ्यस्तत्वेनादरातिशयविषयतया तयोस्तात्त्विकत्वमवसीयते। श्रुतिशरणैः खलु यथा श्रुत्यैवाभ्युपगन्तव्यम्। श्रुतिप्रामाण्यादानन्दात्मनैव परमाकाशस्योपचयापचयवान्परिणामो युज्यते। प्रियशिरस्त्वादिकं तु तथा(प?) तात्पर्यग्राहकप्रमाणाभावादन्नमयादिषु कल्पितैः पक्षपुच्छादिभिस्सहपाठाच्च कल्पितमित्यभ्युपगम्यत इति। 'सत्यसंकल्पत्वादीनामेकत्र सिद्धानामन्यत्र पुनर्वचनमादरार्थमेवे'ति भाष्यस्यायमर्थः। एकस्या-

**यति । एवं श्रुतिरेव सकलप्रमाणशेखरस्थानीया, सत्यज्ञानानन्दमपरिच्छिन्नस्वरूपं सर्वज्ञं नित्यतृप्तं स्वतन्त्रं अनादिप्रकाशं अनन्तालुप्तशक्तिकं आत्मारामं अन्तरनुभवैकविषयपरमानन्दं उपशान्तं अमृतं नीलकण्ठं विरूपाक्षं उमासहितं परं ब्रह्म सर्वात्मकं मुक्तिसाधकमिति सर्वत्र घोषयन्ती केन निवार्यते । ततः परब्रह्मण उक्तस्वरूपधर्माणामलोप एव ॥**

**इति अलोपाधिकरणम् ॥ २४ ॥**

---

मेवशाखायां दहरशाण्डिल्यादिविद्याभेदेन सत्यसंकल्पत्वादयोऽभ्यस्यन्ते । न चायमभ्यासस्तत्तद्विद्यासु सत्यसंकल्पत्वादिप्राप्त्यर्थः । क्वचिदाम्नातानामप्युपास्यप्राप्यफलरूपत्वेन 'इतरे त्वर्थसामान्या'दिति न्यायत एव सर्वासु विद्यासु प्राप्तेः । किंत्वादरार्थ एवेति । अतश्शाखाभेदे पुनर्वचनं विद्यैक्यसिद्धिहेतुगुणप्रत्यभिज्ञानार्थं स्यात्, विद्याभेदेऽपि प्रतिपत्तृभेदेन सार्थकं स्यादिति, नादरार्थं भवेदिति, शंका नावकाशं लभते ॥

**इत्यलोपाधिकरणम् ॥ २४ ॥**

---

## नयमणिमालायाम् ॥

## अथाऽलोपाधिकरणम् ॥ २४ ॥

**सू० ॥ आदरादलोपः ॥ ३९ ॥**

कल्पितमुपासनार्थं नीलग्रीवत्वसांबताप्रमुखम् । लुप्यत एव ब्रह्मणि यथैव तत् ''''''''''''॥ २६२ ॥
आनन्दविशेषाश्वेरिप्रयमोदाद्याः शिरःप्रभृतयः स्युः । ब्रह्मानन्दः क्वचिदपि पीनः क्वचिदपि कृशः प्रसज्येत ॥२६३॥
इत्यापद्येत दोषप्रसर इति शिरःपक्षपुच्छादिक्लृप्तिः ब्रह्मानन्देत्वयोक्तास्तु सहजवपुःस्वीकृतावप्यवार्यः ।
याते रुद्रेति मंत्रे खलु निरतिशयानन्दरूपत्वमस्याप्याम्नातं तत्पुराणागमवचनशतैस्सादरं चान्वमोदि ॥ २६४ ॥
मैवं तात्पर्यलिङ्गे मुहुरभिलपने यामिके जागरूके नीलग्रीवं न शक्यं वपुरपलपितुं ब्रह्मणोर्धांबिकेशम् ।
ब्रह्मानन्दो विभुस्सन्नपि निरवयवोप्यंघ्रिजंघादिभेदैरंगप्रत्यंगभावं दधदनिशमपि ब्रह्म संकल्पतः स्यात् ॥ २६५ ॥
नैवं तात्पर्यलिङ्गं खगवपुषि ततो लौकिकानन्दजाताद्ब्रह्मानन्दस्य कृत्स्नादधिकतमतया ख्यातये रूपकं तत् ।
कीर्त्योघाबोधिसत्वप्रमुखभि······जां वीचिफेनप्रपञ्चाः कीर्त्यब्धेः स्तवे तु स्तुतिततिषु यथा वेंकटक्षोणिभर्तुः ॥२६६॥
इंद्रोमायाभिरुक्त्या परशिववपुषो शुद्धमायामयत्वं तस्योक्तं शंतमत्वं निरतिशयदशाबन्धुगन्धादिमत्त्वम् ।
मन्यन्ते केचिदेषां मत इह न शिरःपक्षतुल्यत्वशङ्का किंतूक्तिस्सा सदेशप्रभृतितनुपरेत्येव सत्संप्रदायः ॥ २६७ ॥

**इत्यलोपाधिकरणम् ॥ २४ ॥**

## सूत्रार्थचन्द्रिकायाम्

**अथ अलोपाधिकरणम् ॥ २४ ॥ २५ ॥**

**सू ॥ आदरादलोपः ॥ ३९ ॥ उपस्थितेऽतस्तद्वचनात् ॥ ४० ॥**

**भगवत्पादमते,** अस्य छान्दोग्ये वैश्वानरविद्यायां श्रूयमाणं 'स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहे'ति प्राणाग्निहोत्रप्रतिपादकं वाक्यं **विषयः** । तत्र किं भोजनलोपे प्राणाग्निहोत्रस्य लोपः उतालोप इति **संदेहः** । भोजनलोपेऽग्निहोत्रस्यालोपः । कुतः । ''पूर्वोऽतिथिभ्योऽश्नीया'दिति जाबालश्रुत्या पूर्वभोजनस्य प्राथम्यरूपधर्मलोपमसहमानया प्राणाग्निहोत्रे आदरकरणात् । न हि धर्मलोपमसहमाना श्रुतिः धर्मिणः प्राणाग्निहोत्रस्य लोपं सहते अतोऽलोप इति **पूर्वपक्षः । सिद्धान्तस्तु । सू ॥ उपस्थितेऽतस्तद्वचनात् ॥ ४० ॥** भोजने चोपस्थिते अतः अस्मादेव भोजनद्रव्यात्प्राणाग्निहोत्रं कर्तव्यम् । अनुपस्थिते त्वग्निहोत्रस्य लोप एव । कुतः । तद्वचनात्=''तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीय'मिति वचनात् । आदरवचनं तु भोजनप्रसक्तिदशायां द्रष्टव्यम् ॥

## अथ तद्वचनाधिकरणम् ॥ २५ ॥

### सू ॥ उपस्थितेऽतस्तद्वचनात् ॥ ४० ॥

इह पूर्वाधिकरणोक्तं ब्रह्मस्वरूपमेव मुक्तप्राप्यमुतान्यदिति संशयः ॥ किं तावत्प्राप्तं? 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' इत्यादिषु ब्रह्म निर्विशेषमेव श्रूयते। 'ब्रह्म वेद ब्रह्मैव भवति' इति मुक्तस्य तत्स्वरूपापत्तिरेव मुक्तिः। अतो निर्विशेषमेव ब्रह्म मुक्तप्राप्यं नान्यदिति प्राप्ते, ब्रूमः—पूर्वोक्तं सविशेषमेव ब्रह्मस्वरूपं मुक्तप्राप्यं, दहरकमलान्तर्भावनीयतया प्रतिपादिते विरूपाक्षे परब्रह्मणि 'परं ज्योतिरुपसंपद्य' इति मुक्तेन प्राप्ते 'स्वेन रूपेणाभिनिष्पद्यते' इति स्वरूपाभिनिष्पत्तेरेव हेतोः, 'जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा ज्ञातिभिर्वा' इत्यादिना स्वच्छन्दतो ज्ञात्यादिप्राप्त्यभिधानात्, 'परमं साम्यमुपैति' इति श्रुत्या, 'मुक्तः शिवसमो भवेत्' इति स्मृत्या च, मुक्तस्य परब्रह्मसादृश्यप्राप्त्यभिधानाच्च। अतः साक्षान्मुक्तप्राप्यमेव पूर्वोक्तं नीलकण्ठत्वादिलक्षणं परब्रह्मस्वरूपं, न सांसारिकम्। तस्य 'अपहतपाप्मा' इत्यादिना सांसारिकधर्मनिषेधात्। सगुणैवातः परविद्या। 'निष्कलं निष्क्रियम्' इत्यादिषु हेयगुणनिषेधः क्रियते न कल्याणगुणनिषेधः। तथा हि—

---

## अथ तद्वचनाधिकरणम् ॥ २५ ॥

सू ॥ उपस्थितेऽतस्तद्वचनात् ॥ ४० ॥ यदि शिवस्य रूपं गुणजातं च तात्विकं तदा मुक्तप्राप्यं ब्रह्म ततोऽन्यत्स्यादित्युत्थानात्संगतिः। मुक्तप्राप्यं ब्रह्म शिवादन्यदुत शिव एवेति मुक्तिर्निर्विशेषब्रह्मभावापत्तिस्सविशेषब्रह्मसादृश्यापत्तिर्वेत्यनवधारणात्संशये तत्र पूर्वः पक्षः। नीरूपं निर्विशेषं च परं ब्रह्मेति परश्शताः श्रुतयः प्रतिपादयन्ति। तद्भावापत्तिर्मुक्तिरिति च 'ब्रह्म वेद ब्रह्मैव भवती'ति सावधारणश्रुतिः प्रतिपादयति। अतो रूपवान्सगुणश्शिवो न परं ब्रह्म नापि तत्सादृश्यापत्तिः परममुक्तिरिति। सिद्धांतस्तु, उक्तरूपश्शिव एव परं ब्रह्म तत्सादृश्यापत्तिरेव च परममुक्तिः। दहरपुण्डरीकादिषु तदुपासनेन लब्धया तत्प्राप्त्यैव स्वरूपाभिनिष्पत्त्यादिप्रतिपादनात्। 'निरञ्जनः परमं साम्यमुपैती'ति श्रुत्या 'मुक्तश्शिवसमो भवेदि'ति स्मृत्यनुगृहीतया निरञ्जन इति शब्दोदितस्य संसारान्मुक्तस्यैव तत्साम्यापत्तिप्रतिपादनाच्च। परब्रह्मणः रूपगुणनिषेधश्रुतयः प्राकृतरूपहेयगुणनिषेधपराः। मुक्तप्राप्ये 'सह ब्रह्मणा विपश्चिते'ति सार्वज्ञ्यगुणश्रवणेन मुक्त-

---

**श्रीकण्ठमते,** इदं सूत्रद्वयं प्रत्येकमेकैकमधिकरणमिति वेद्यम्। तत्राद्येऽलोपाधिकरणे पूर्वत्र नीलकण्ठत्वादिविशिष्टं रूपमुमाभिधानपरशक्तिसाहित्यं सत्यसंकल्पत्वादिगुणजातं च निरूपितम्। इह तेषां परब्रह्मणि किं लोपोऽस्ति कदाचिदथवा कदाचिदपि न लोप इति **संशयः**। उपासनार्थं तेषां परब्रह्मणि कल्पितत्वात्कदाचिल्लोप इति **पूर्वपक्षः**। **सिद्धान्तस्तु,** परब्रह्मण उमासहितत्वादीनां सर्वत्र श्रुतिष्वभ्यासादादरादलोप एव। अतएवालुप्तशक्तिकमुच्यते परब्रह्मेति। अतः परब्रह्मणः बहुषु श्रुतिषूक्तस्वरूपधर्माणामलोप एवेति ॥

**इति श्रीकण्ठमते अलोपाधिकरणम् ॥ २४ ॥**

'निष्कलं निष्क्रियम्' इत्यादिना 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' इत्यादिना च निर्गुणत्वे सगुणत्वे च सामान्येन प्राप्ते 'अपहतपाप्मा' 'यः सर्वज्ञः सर्ववित्' इत्यादिभिर्विशेषश्रुतिभिर्निर्गुणश्रुतेर्हेयगुणराहित्यमर्थः, सगुणश्रुतेः कल्याणगुणसाहित्यं इति विज्ञायते। किंच वचनमेव सगुणं मोक्षफलं प्रकाशयति, 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इति । विपश्चिता सर्वज्ञेन ब्रह्मणा सर्वानपि कामान् मुक्तः सह प्राप्नोतीति । सहशब्दो ब्रह्मणाऽऽनन्दभोगस्य च यौगपद्याभिप्रायः। अतः सगुणमेव ब्रह्मस्वरूपं मुक्तप्राप्यं फलमिति ॥

इति तद्वचनाधिकरणम् ॥ २५ ॥

प्राप्यं परं ब्रह्म निर्गुणमिति कल्पनायोगात् । 'ब्रह्म वेद ब्रह्मैव भवती'त्येवकारश्च साम्यश्रुत्यनुसारादिवार्थः । 'वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमाँल्लोकानभिजयति' 'विनाशमेवापीतो भवति' 'नाहमत्र भोग्यं पश्यामी' त्यादिश्रुतिष्वेवकारस्य इवार्थत्वदर्शनादिति । सूत्रस्यायमर्थः। उपस्थिते उपासकेन ब्रह्मणि शिवे प्राप्ते सति अतः ब्रह्मप्राप्त्यधीनज्ञानविकासादिस्वरूपाविर्भावाद्धेतोः जक्षणक्रीडनरमणादिस्वाच्छन्द्यतत्साम्यापत्तिवचनात्स एव परं ब्रह्म तत्साम्यापत्तिरेव मुक्तिरिति ॥

इति तद्वचनाधिकरणम् ॥ २५ ॥

---

## नयमणिमालायाम्

### अथ तद्वचनाधिकरणम् ॥ २५ ॥

सू० ॥ उपस्थितेऽतद्वचनात् ॥ ४० ॥

उक्तस्वरूपमेतन्मुक्तप्राप्यं न गुणयुतं ब्रह्म । किं तु परं निर्गुणमाम्नातं यत्सर्ववेदेषु ॥ २६८ ॥
मुक्तानामेतदेव श्रुतिशिखरशतां शीर्षितं ब्रह्मगम्यं प्राप्ते ह्येतद्विहारं कथयति निजरूपाभिनिष्पत्तिलाभात् ।
नैर्गुण्योक्तिस्तु हेयानपनयति गुणान्विग्रहादिप्रसक्तानस्मिन्नेवेंदुमौलावपवदननयछागनीत्यादिनीत्या ॥ २६९ ॥

### इति तद्वचनाधिकरणम् ॥ २५ ॥

## सूत्रार्थचन्द्रिकायाम्

### अथ तद्वचनाधिकरणम् ॥ २५ ॥

सू ॥ **उपस्थितेऽतस्तद्वचनात्** ॥ ४० ॥ इह पूर्वाधिकरणोक्तं ब्रह्मस्वरूपमेव मुक्तप्राप्यमुतान्यदिति **संशयः**। 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जन'मित्यादिषु ब्रह्म निर्विशेषमेव श्रूयते । 'ब्रह्म वेद ब्रह्मैव भवति' इति मुक्तस्य तत्स्वरूपापत्तिरेव मुक्तिः। अतो निर्विशेषमेव ब्रह्म मुक्तप्राप्यं नान्यदिति **पूर्वः पक्षः**। **सिद्धान्तस्तु**, पूर्वोक्तं सविशेषमेव ब्रह्मस्वरूपं मुक्तप्राप्यम् । **उपस्थिते**=दहरकमलान्तर्भावनीयतया प्रतिपादिते विरूपाक्षे परब्रह्मणि 'परंज्योतिरुपसंपद्ये'ति मुक्तेन प्राप्ते । **अतः**='स्वेन रूपेणाभिनिष्पद्यते' इति स्वरूपाभिनिष्पत्तेरेव हेतोः 'जक्षन्क्रीडन्रममाण'इत्यादिना स्वच्छन्दतो ज्ञात्यादिप्राप्त्यभिधानात् 'मुक्तश्शिवसमो भवेत्' इति स्मृत्यनुगृहीतया 'परमं साम्यमुपैती'ति श्रुत्या मुक्तस्य परब्रह्मसादृश्यप्राप्त्यभिधानाच्च । सगुणश्रुतीनां कल्याणगुणसाहित्यपरतया निर्गुणश्रुतीनां हेयगुणराहित्यपरतया च मुक्तप्राप्यं ब्रह्मस्वरूपं सविशेषमिति सिद्धम् ॥ इति ॥

### इति श्रीकण्ठमते तद्वचनाधिकरणम् ॥ २५ ॥

**रामानुजमते,** अनयोस्सूत्रयोः कामाद्यधिकरणशेषतया तत्रैव व्याख्याततया नात्र पुनर्विवरणावकाश इति बोध्यम् ॥
**आनन्दतीर्थमते,** अनयोस्सूत्रयोः पूर्वाधिकरणशेषतया तत्रैव तयोर्व्याख्यानादत्र पुनस्तद्विवरणावकाश इति बोध्यम् ॥

### इति सूत्रार्थचन्द्रिकायामलोपाधिकरणम् ॥ २५ ॥

**इतःपरं नोपलभ्यते। अतः अत्रैव समापिता। अन्यत्स्पष्टमुपोद्घाते—**

## अथ तन्निर्धारणानियमाधिकरणम् ॥ २६ ॥

**सू ॥ तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४१ ॥**

उद्गीथादिकर्माङ्गावबद्धा उपास्तयः कर्मसु नियता उतानियता इति संशयः। किं तावत् प्राप्नोति ? कर्मानुष्ठाने कर्माङ्गत्वात् नियमेनानुष्ठेयाः । कर्मप्रकरणमनारभ्याधीतत्वेऽपि वाक्यादेव क्रतुसंबन्धोपपत्तिः। यथा 'यस्य पर्णमयी जुहूर्भवति' इत्यनारभ्याधीतस्य पर्णमयत्वस्याव्यभिचरितक्रतुसंबन्धिजुहूद्वारा वाक्यतः क्रतुसंबन्धः, तथा 'य एवं विद्वानुद्गायति' 'य एवं विद्वान् साम गायति'

## . अथ तन्निर्धारणाधिकरणम् ॥ २६ ॥

**सू ॥ तन्निर्द्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४१ ॥** यथा शिवोपासनाफलमेव मुक्तिफलमेवं क्रतुफलमेवोद्गीथविद्यादिफलं नान्यदस्तीति शंकया संगतिः। नियता उतानियता वा इति अंगत्वानंगत्वाभ्यां संशयः। ननु कर्मांगत्वादिति हेतुरसिद्धः, कर्मप्रकरणानाम्नातानामुपासनानां तदंगत्वे प्रमाणाभावादित्याशंक्य प्रकरणाभावेप्यभिचरितक्रतुसंबंधिसद्भावात्पर्णतादीनामिव वाक्यप्रमाणं विनियोजकमस्तीत्याह—कर्मप्रकरणमिति। एवं क्रतुसंबंधेन नैराकांक्ष्ये सति रात्रिसत्रन्यायाप्रवृत्तेः कामावाप्त्यादिश्रवणमपापश्लोकादिश्रवणवदर्थवादमात्रमिति भावः। ननु 'तेनोभौ कुरुत' इति वाक्येन क्रत्वंगाश्रितोपासनानामनियम उच्यते तेनानंगत्वसिद्धौ फलापेक्षायां रात्रिसत्रन्यायेन 'आपयिता हवै कामानां भवति तदेव वीर्यवत्तरं भवती'त्याद्यर्थवादश्रुतकामावाप्तिक्रतुवीर्यवत्तरत्वादिकं फलत्वेन परिणमनीयमिति चेत् नैतद्वचनं न्यायविदोऽनुमन्यंते। नह्यनियममात्रेणांगत्वमपैति। अनियमोक्ते ग्रहणाग्रहणरीत्या विकल्पार्थत्वोपपत्तेः। 'नाना तु विद्या चाविद्या च यदेव तु विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती'ति समनंतरवाक्येन तथैव स्पष्टीकरणाच्च। अत्र हि 'विद्यये'ति तृतीयाश्रुत्या विद्यायाः करोतिशब्दोक्तकर्मांगत्वमुच्यते। 'तदेव वीर्यवत्तरं भवती' त्यनेन विद्यानुष्ठानपक्षे क्रतुफलस्य भूयस्त्वमुच्यते। न तु क्रतुफलापृथक्फलमुच्यते। तरप्प्रत्ययस्य प्रकृत्युपात्तगुणांश एवातिशयप्रतिपादकत्वस्य 'ज्ञानवत्तरश्शरतर' इत्यादिव्यवहारेषु प्रसिद्धत्वात्। विधिनिषेधयोरेकांगत्वेन विधिपक्षे फलभूयस्त्वं 'कर्मभूयस्त्वात्फलभूयस्त्व'मिति न्यायत एव प्राप्तम्। जैमिनिनापि 'फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषः स्या'दिति सूत्रेण प्रदर्शितम्। तदेवात्र वीर्यवत्तरशब्देनानूद्यत इति युक्तम्। अपि च। 'तेनोभौ कुरुत' इति वाक्येनानियतांगत्वमपि पूर्वप्रस्तुताप्त्यादिगुणकोद्गीथविद्यामात्रस्योच्यते न तु तदनन्तरं वक्ष्यमाणानां मुख्यप्राणदृष्ट्यादिविशिष्टोद्गीथोपासनानाम्। 'एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते एतमग्नावध्वर्यवः एतं महाव्रते छंदोगा' इत्यादि श्रुत्यंतरप्रतिपन्नब्रह्मदृष्ट्यादिविशिष्टक्रत्वंगांतरोपासनानां च । 'यश्चैवं वेद यश्च न वेदे'त्यत्रैवंशब्दस्य प्रकृताप्त्यादिगुणकवैशिष्ट्यपरत्वात्। अत एव पुरुषार्थाधिकरणे 'यदेव विद्यया करोती'ति श्रुतेरौपनिषदी सर्वाप्यात्मविद्या कर्माङ्गं न तु स्वातंत्र्येण मुक्तिसाधनमिति 'तच्छ्रुते'रिति सूत्रेण पूर्वपक्षमुद्भाव्य 'सार्वत्रिकी'ति सूत्रेण विद्ययेति तृतीयाश्रुतिस्सर्वविद्याविषया न भवति, किंत्वेवंशब्दयोगा 'यदेव विद्ययेति' प्रसिद्धवन्निर्देशाच्च प्रकृतोद्गीथविद्यामात्रवि-

**इत्यव्यभिचरितक्रतुसंबन्धिसामोद्गीथादिद्वारा तदुपासनानां क्रतुसंबन्धः। अतः कर्मसु नियता उद्गीथाद्युपास्तय इति ॥**

**एवं प्राप्ते ब्रूमः—गोदोहनादिवदनियता उपास्तयः। यथा—'चमसेनापः प्रण**पयेति सिद्धांतयिष्यते। यदि तत्र विद्ययेति श्रुतिः प्रकरणमुल्लंध्य क्रत्वंगभूतमुपासनान्तरमपि[1] विषयीकुर्यात्, तदा सर्वामप्यौपनिषदमात्मविद्यामाक्रामन्ती केन निवारयितुं शक्या। अतस्तत्र यदेव विद्ययेति वाक्यस्य प्रकृतोद्गीथविद्यामात्रविषयत्वस्यैव सूत्रार्थत्वात्तत एव कैमुतिकन्यायात् 'यश्चैवं वेदे'ति पूर्ववाक्यस्यापि तन्मात्रविषयत्वं सिद्ध्यतीत्याप्त्यादिगुणकामविशिष्टविषयकैवोद्गीथविद्या क्रतुष्वनियता। अनियतत्वेऽपि साप्यंगमेवान्यास्त्वंगावबद्धोपासनाः क्रतुषु नियतांगानीत्येतत्सर्वमभिप्रेत्योपसंहरति—**अतः कर्मस्विति**। एवं प्राप्ते सिद्धान्तः। अंगावबद्धोपासनानां क्रतुषु न नियमः। तेषां तदंगत्वाभावात्। तदभावश्च विनियोजकप्रमाणाभावात्। न च वाक्यं विनियोजकम्। 'उद्गीथमुपासीते'त्यादिषु क्रतूपासनासमभिव्याहाराश्रवणात्। न चाव्यभिचरितक्रतुसंबंधेनोपस्थिते क्रतौ पर्णतान्यायेन तदन्वयप्रतिपादकशब्दः कल्पनीयः। उक्तं यत्पर्णताया जुहूसंबन्धेऽप्यव्यापाररूपतया फलनिष्पादकत्वं न स्यादिति। तत्सिद्ध्ये क्रतूपरागेण व्यापाररूपतां सम्पादयितुं जुहूलिङ्गेन क्रतुमुपस्थाप्य तत्संबंधबोधकश्शब्दः कल्प्यते जुहूशब्दस्यैव वा जुहूसम्बंधिनि क्रतौ लक्षणा कल्प्यत इति। इहोपासनायाः स्वयं व्यापाररूपायाः स्वतएव फलपर्यवसाने संभवति किमुद्गीथाद्युपस्थापितक्रतुसंबंधबोधकशब्दकल्पनादिव्यसनेन। यदिचाप्यभिचरितक्रतुसंबन्धसद्भावमात्रेण तदुपस्थापितक्रतुसंबन्धबोधकश्शब्दकल्पनादिनियमः। तदानीमाधानस्यापि आहवनीयाद्युपस्थापितक्रतुसंन्बधबोधकशब्दकल्पनादिना तस्यापि क्रत्वंगत्वमंगीक्रियेत। न चाधानस्याग्निभिः फलत्त्वमस्ति न तूपासनानां केनचित्फलवत्त्वम्। अतस्तेषां क्रतुफलेन फलवत्त्वसिद्ध्यर्थं क्रतुसंबंधबोधकवाक्यकल्पनापेक्षास्तीति वाच्यम्। उपासनावाक्यशेषस्यैव फलसमर्पकतया विपरिणामसंभवे फलवत्कर्मांतरान्वयबोधकवाक्यकल्पनाद्यनपेक्षणात्। तस्माद्वाक्यशेषश्रुताय तस्मै फलायोद्गीथाद्याश्रयत्वविशिष्टोपासनाविधिरित्येव युक्तम्। एवमुद्गीथादिश्रवणस्योपासनार्थतायामेव दृष्टार्थता लभ्यते। निरालंबनध्यानासंभवेनोद्गीथादेरालंबनस्योपासनेनापेक्षितत्वात्। उपासनाश्रवणस्योद्गीथाद्यर्थत्वे त्वदृष्टार्थता स्यात्। उपासनेनोद्गीथादिषूत्पत्तिप्राप्तविकृतिनामसंभवेनादृष्टसंस्कारस्यैव वक्तव्यत्वात्। दृष्टादृष्टप्रयोजनपर्यवसाय्यन्वयद्वयसंभवे च दृष्टप्रयोजनपर्यवसाय्येवान्वयो ग्राह्यः। अत एव खलेवाली यूपो भवतीत्यस्य यः खादिरादिः प्रकृतिप्राप्तो यूपस्तस्य खलेवाल्याकृतिविधानपरतायामदृष्टार्थता स्यादिति विधेर्दृष्टार्थत्वलिप्सया खलेवाल्या यूपकार्ये विधिराश्रितः। तस्माद्गोदोहनविधिवदाश्रित्यविधानरूपा अङ्गावबद्धोपासनाविधयः। न तु पर्णतादिविधिवत्क्रत्वंगत्वविधिरूपाः। तमिमं न्यायं 'तन्निर्धारणानियम' इति सूत्रांशेन विवक्षितं हृदि निधायाह—**गोदोहनादिवदनियता इति**। एवं च 'तेनोभौ कुरुत' इति वाक्यं गोदोहनन्यायप्राप्तानियमानुवादकं न तु 'षोडशिनं गृह्णाती'ति विधितषोडशिग्रहणे नियमतः प्राप्ते तद-

1 'क्रत्वंगाश्रित' इति, ख. पाठः।

**येत् गोदोहनेन पशुकामस्य' इत्यपां प्रणयनमाश्रित्य विधीयमानं गोदोहनमक्रत्वर्थत्वादैच्छिकमेव, न त्वप्प्रणयनादिवन्नियतम् । तथा कर्माण्याश्रित्य विधीयमाना उपास्तयः क्रत्वर्था न भवन्ति, 'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद' इत्युद्गीथाद्युपासनरहितस्यापि क्रत्वनुष्ठानदर्शनात्। 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति वर्तमाननिर्देशेऽपि क्रतुवीर्यवत्तरत्वसाधनतयोपासनाविधिः कल्प्यते । वीर्यवत्तरत्वं नाम प्रबलकर्मान्तराप्रतिबन्धेनाविलम्बितफलत्वमेव । तथा कामवृष्ट्यादिपृथक्फलश्रवणाच्च न नियता उपास्तयः ॥**

**इति तन्निर्धारणानियमाधिकरणम् ॥ २६ ॥**

---

ग्रहणवाक्यमिव 'उद्गीथमुपासीते'त्यादिविधिनोपासने नियमतः प्राप्ते सत्यनियमविधायकमिति न्यायसाम्यात्सर्वेषामप्यङ्गावबद्धोपासनानामनियमस्योपलक्षणं तत् न तु प्रकृतोद्गीथविद्यामात्रस्यानियमविषयमित्यर्थं सर्वेषामप्यङ्गावबद्धोपासनानामनियमानुवादलिङ्गादप्येवमवसीयते इति 'तद्दृष्टे'रिति सूत्रांशेन विवक्षितमर्थमाह—**तेनोभाविति** । एवं सति 'यदेव विद्यये'त्यादिकं विद्यानुष्ठानपक्षे न्यायप्राप्तस्य फलभूयस्त्वस्यानुवादकं न भवति । किंतु 'तेनोभौ कुरुत' इत्यत्रानियतानुष्ठानत्वेनानूदितानामंगावबद्धोपासनानां क्रतुवीर्यातिशयाधानरूपफलविधिपरमित्यमुमर्थं फलमिति सूत्रांशेन विवक्षितमाह—**यदेवेति** । पृथक्फलत्वोपपादनार्थम'प्रतिबंधोही'ति सूत्रांशेन विवक्षितं वीर्यवत्तरशब्दार्थं दर्शयति । **वीर्यवत्तरेति** । वीर्यं हि लोके कार्यानुकूलं बलमिति प्रसिद्धं । न तु कार्यमेवेति । बलवत्तरत्वञ्च कर्मणः स्वफलजननप्रतिबन्धकापेक्षया वक्तव्यम् । अन्यस्य प्रकृतानुपयोगात् । अतः स्वफलदानोन्मुखेन विरोधिकर्मांतरेणाप्रतिबन्ध एव वीर्यवत्तरत्वमित्यौचित्यादवसीयत इति भावः । एवं च 'यदेव विद्यये'ति तृतीयाश्रुतिरंगावबद्धोपासनानां न मुख्यकर्मशेषत्वप्रतिपादनपरा किंतु कर्मभिर्विलंबेन फले जननीये तेषामुपकारकत्वमस्तीत्युपचरितशेषत्वपरा । 'असार्वत्रिकी'ति पुरुषार्थाधिकरणसूत्रे तु पूर्वपक्ष्युक्तं 'विद्यये'ति तृतीयाश्रुतेर्मुख्यशेषपरत्वमभ्युपेत्य । तथापि प्रकृतोद्गीथविद्याया एव कर्मशेषत्वमायाति नात्मविद्याया इत्युक्तम् । इहापि यदि तथाभ्युपेत्य सिद्धान्तयितव्यं तदा 'तेनोभौ कुरुत' इत्यादेः पूर्वपक्षोक्तरीत्याऽर्थोग्राह्यः इत्याप्त्यादिगुणकप्रकृतोद्गीथविद्याया एवानियतमङ्गत्वमायाति । न सर्वेषामङ्गावबद्धोपासनानामिति तन्निर्द्धारणानियम इति सिद्धान्तस्य न कोऽपि विरोधः । **कामवृष्ट्यादीति** । 'आपयिता हवै कामानां भवति वर्षति हास्मै वर्षयति ह कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्चे'त्यादिफलांतरश्रवणाच्चेत्यर्थः आथर्वादिकत्वाविशेषाद्वीर्यवत्तरत्ववदसाधारणफलान्यपि ग्राह्याणीति भावः ॥

**इति तन्निर्धारणाधिकरणम् ॥ २६ ॥**

---

नयमणिमालायाम्

**अथ तन्निर्धारणाधिकरणम् ॥ २६ ॥**

**सू० ॥ तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४१ ॥**

उद्गीथाद्यवबद्धा उपासना पर्णतादिवन्नियताः । तासु फलश्रवणस्याप्यंगत्वादर्थवादताप्राप्तेः ॥ २७० ॥
तेनोभौ कुरुत इति श्रुत्यैव निवारितो नियमः । गोदोहनादिवत्स्यात्तस्मात्तासां पृथक्फलता ॥ २७१ ॥

**इति तन्निर्धारणाधिकरणम् ॥ २६ ॥**

## अथ प्रदानाधिकरणम् ॥ २७ ॥

## सू ॥ प्रदानवदेव तदुक्तम् ॥ ४२ ॥

एकस्यैव शिवस्य परब्रह्मणः परविद्यासु सर्वासु तत्तद्गुणविशिष्टतया पृथक्चिन्तनीयत्वमुक्तम्। तदिह संभवति न वेति संशयः। किं तावत् प्राप्तम्? गुणभेदेऽपि गुणिनो ब्रह्मण एकत्वादुपासनं न भिद्यते। यथैकस्य राज्ञस्तत्तद्भूषणादिविशेषणभेदेन युक्तस्यापि कार्यदर्शनव्यायामभोजनासनमृगयासमरादिव्यापारेषु सिंहासनादिस्थानभेदेऽपि भेदो न दृश्यते। तथा दहरादिस्थानभेदेऽपि तत्तद्गुणभेदविशिष्टस्यापि ब्रह्मण एकत्वात् तदनुसन्धानमेकमेवेत्येवं प्राप्ते ब्रूमः—एकस्यैव परब्रह्मणः शिवस्य स्वरूपाभेदेऽपि तत्तद्गुणविशिष्टस्वरूपतया गुणविशेषणभेदेन भेदाद्विशिष्टगुण्यावृत्त्या पृथक्तदुपासनप्रयोगः, इन्द्रप्रदानवत्। यथा 'इन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे' इति गुणभेदात् पृथक्पुरोडाशप्रदानं 'नाना देवतापृथक्त्वात्' इति संकर्षे तथोक्तत्वात्, तथैकस्यापि परब्रह्मणो गुणभेदादुपासनपृथक्त्वमिति। यदुक्तमेकस्य राज्ञ इति, तत्रापि राजस्वरूपाभेदेऽपि स्थानगुणादिभेदादुपासनप्रकारो भिन्न एव सेवकानामिति॥

इति प्रदानाधिकरणम् ॥ २७ ॥

---

## अथ प्रदानाधिकरणम् ॥ २७ ॥

सू ॥ प्रदानवदेव तदुक्तम् ॥ ४२ ॥ कर्मणां तदङ्गाश्रितोपासनानां च फलभेदनिरूपणप्रसंगाद्विद्याभेदनिरूपणमिति संगतिः। धर्मैक्यात्स्थानगुणभेदाच्च संशयः। ननु स्थानगुणभेदाद्धर्मिणोऽपि भेदः स्यादित्याशंक्य तद्भेदेऽपि धर्म्यभेदं दृष्टान्तेनोपपादयति—यथैकस्येति। सत्यं स्थानगुणभेदेन वस्तुतो धर्मी न भिद्यत इति। तथापि तद्भेदे सत्यौपाधिको भेदोऽस्ति। तावन्मात्रमपि विद्याभेदे प्रयोजकं। यथेंद्रस्य राजादिगुणभेदोपाधिको भेदो हविःप्रदानाख्ययागभेद इति। सिद्धांतयति—एकस्यैवेति। उपासनाप्रकारो भिन्न इति। राज्ञो यानासनव्यायामादिषु छत्रचामरव्यजनादिप्रधानस्सेवकानां सेवाप्रकारो भिन्न एवेत्यर्थः॥

इति प्रदानाधिकरणम् ॥ २७ ॥

---

नयमणिमालायाम्।

### अथ प्रदानाधिकरणम् ॥ २७ ॥

सू० ॥ प्रदानवदेव तदुक्तम् ॥ ४२ ॥

विद्या भिद्येत नानाश्रुतिविहितगुणस्थानभेदैर्न शंभोः पत्युस्तेनैव तत्तत्समयसमुचिता नैव पीठादिभेदैः।
दृष्टं राजाधिराजादिमगुणभिदयैंद्रस्य भिन्नं प्रदानं दृष्टं वैतानवह्नेरपि हवनमुखं स्थानभेदेन भिन्नम् ॥ २७२ ॥

इति प्रदानाधिकरणम् ॥ २७ ॥

## अथ लिंगभूयस्त्वाधिकरणम् ॥ २८ ॥

### सू ॥ लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४३ ॥

पूर्वं सर्वासु परविद्यासु ब्रह्मोपास्यमिति स्थितम् । तस्योपास्यस्य ब्रह्मणो विशिष्य निर्धारणार्थमिदमधिकरणम् । तैत्तिरीये—

'सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु नमो अस्तु ।
पुरुषो वै रुद्रः सन्महो वै रुद्रः सन्महो नमो नमः ॥
विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् ।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥
कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शन्तमं हृदे ।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥
नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतये नमो नमः' ॥

इति । अत्र सर्वात्मत्वादिभिरुमापतित्वेन च श्रूयमाणं परं ब्रह्म प्रकृते सवितृमण्डलविद्यामात्र उपास्यमुत सर्वासु परविद्यास्विति संशयः । किं तावत् प्राप्तम् ? प्रकरणबाधायोगात् प्रकृतसवितृमण्डलविद्यायामेवोपास्यम् ॥

---

### सू ॥ अथ लिंगभूयस्त्वाधिकरणम् ॥ २८ ॥

सू० ॥ लिंगभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४३ ॥ संगतिमाह—पूर्वमिति । पूर्वाधिकरणे सर्वासु साक्षान्मुक्तिफलासु विद्यासु शिवरूपं परं ब्रह्म एकमेवोपास्यमिति सिद्धं कृत्वोपास्यैक्येऽपि न विद्यैक्यमिति समर्थितं । इदानीं तदेवोपास्यैक्यं समर्थ्यत इति संगतिः । प्रकृते सवितृमण्डले विद्यामात्रे इति । 'सर्वो वै रुद्र' इत्यनुवाके रुद्रस्य सर्वासु परविद्यासूपास्यत्वे विनियोजकस्य वाक्यस्य सद्भावे वाक्येन प्रकरणस्य बाधात्सर्वासु परविद्यासु रुद्राख्यं परं ब्रह्मोपास्यं भवेत् । तदसद्भावे प्रकरणेन सवितृमण्डलविद्यायामेवैतदुपास्यं भवेत् । विद्यान्तरेषु तूपास्यं तत्तत्प्रकरणालोचनया निर्धारणीयं स्यादिति तथा भूतवाक्यसदसद्भावाभ्यामयं संशयः । प्रकरणबाधायोगादिति । अयमाशयः । रुद्रनमस्कारार्था इमे मन्त्राः । न तु तत्तद्विद्योपास्यलिंगवद्भिश्शब्दैस्तत्तद्विद्योपास्यं प्रत्यभिज्ञाप्य तस्य रुद्रत्वप्रतिपादनार्थाः । तथा सति नमस्कारानन्वयप्रसंगात् । यद्यपि 'सर्वो वैरुद्रस्तस्मैरुद्रायनमो अस्त्वि' त्यत्र वाक्यभेदप्रतीतेरेकं वाक्यं शाण्डिल्यविद्योपास्यस्य रुद्रत्वनिर्द्धारणार्थमन्यद्वाक्यं नमस्कारार्थमिति योजयितुं शक्यं । तथाऽपि 'पुरुषो वै रुद्र' इत्यादौ वाक्यभेदाप्रतीतेस्तथा योजना न संभवति । अतस्तस्य पुरुषसूक्तसद्विद्याव्याहृतिविद्योपास्यत्वनिर्धारणार्थत्वासंभवात्सकलपरविद्योपास्यनिर्द्धारणार्थत्वमस्यानुवाकस्य न लभ्यत इति 'सर्वो वै रुद्र' इत्यस्यापि विद्यांतरोपास्यनिर्द्धारणार्थत्वं वक्तुं न शक्यते । कृत्स्नस्यानुवाकस्य सकलपरविद्योपास्यनिर्द्धारणार्थत्वोपपादनसंभवे ह्यस्य वाक्यस्याऽपि यत्किञ्चिद्विद्योपास्यनिर्द्धारणार्थत्वं भवेत् । तदसंभवे तु 'सर्वो वै रुद्र'' इति नमस्कार्यस्य

**इति प्राप्ते ब्रूमः । इदमुमासहितं परं ब्रह्म सर्वास्वपि परविद्यासूपास्यम् । तत्तल्लिङ्गसंबन्धिवाक्यभूयस्त्वात् । तथा हि 'सर्वो वै रुद्र' इत्यादिवाक्ये 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते'ति शाण्डिल्यविद्योपास्यलिङ्गम् । 'पुरुषो वै रुद्र' इति वाक्ये पुरुषसूक्तोपकोसलविद्याद्युपास्यलिङ्गम् । 'सत्' इत्यत्र 'सदेव सोम्येदमग्र आसीत्' इति सद्विद्योपास्यलिङ्गम् । 'महः' इत्यत्र 'मह इति तद्ब्रह्म स आत्मा अङ्गान्यन्या देवता' इति व्याहृतिविद्योपास्यलिङ्गम् । 'शन्तमं हृदे' इति हृदयद्योतनात् दहरविद्योपास्यलिङ्गम् । 'हिरण्यबाहवे' इति हिरण्यरूपत्वं सवितृमण्डलोपास्यलिङ्गम् । 'उमापतये' इति सर्वपरविद्योपास्यलिङ्गम् । संसाररुग्द्रावकत्वात् रुद्र इत्युच्यते परमात्मा शिवः । एवमुमापतेः परब्रह्मणः शिवस्य सर्वपरविद्योपास्यत्वं वाक्यैरवसीयते । वाक्यं हि प्रकरणाद्ब-**

---

सर्वात्मकत्वेन स्तुतिमात्रं कृतं स्यात् । यदि च 'पुरुषो वै रुद्र' इत्यादेरन्यार्थत्वेपि विद्यान्तरोपास्यसमर्पकपदसामानाधिकरण्यमात्रेण तत्तद्विद्योपास्यविशेषनिर्द्धारणार्थत्वं कल्प्येत । यदिवा तत्रान्यार्थत्वप्रतीतिरहितस्य कस्यचिद्वाक्यस्य किंचिद्विद्योपास्यनिर्द्धारणार्थत्वं कल्प्येत । तदा नारायणानुवाकस्यापि सहस्रशीर्षाक्षरशिवशंभ्वादिशब्दप्रत्यभिज्ञापितसकलपरविद्योपास्यनिर्द्धारणार्थत्वं भवेत् । 'तद्विश्वमुपजीवती'त्याख्यातसत्त्वेन द्वितीयान्तानां सामानाधिकरण्यस्यान्यार्थत्वेऽपि 'नारायणपरं ब्रह्मे'त्यादिप्रथमान्तनिर्देशेष्वाख्याताभावेन तद्वैलक्षण्यात् । तन्मात्रस्य कतिपयपरविद्योपास्यनिर्द्धारणार्थत्वं भवेत् । तथा च सर्वपरविद्योपास्यश्शिव इत्यभिमतं तन्न सिद्ध्येदिति । तत्तल्लिङ्गसंबन्धीति सूत्रे 'लिङ्गभूयस्त्वादि'ति पदं तत्तल्लिङ्गोपास्यलिङ्गसमर्पकपदघटितवाक्यभूयस्त्वपरमिति भावः । तेन क्वचिदेव वाक्ये किंचिद्विद्योपास्यलिङ्गसमर्पकपदसामानाधिकरण्यमात्रं तद्विद्योपास्यनिर्धारणार्थत्वकल्पनायां प्रयोजकं न भवति । बह्वतिप्रसङ्गापत्तेरिति शङ्का निराकृता वेदितव्या । शाण्डिल्यविद्याग्रहणमन्यत्राऽपि यत्र यत्र 'इदं सर्वं यदयमात्मा' इत्यादौ ब्रह्मणस्सर्वात्मत्वमुक्तं तस्यास्य सर्वस्यापि विद्याया उपलक्षणम् । एवमुत्तरत्रापि द्रष्टव्यम् । सर्वपरविद्येति । 'तस्मात्सह तया शक्त्येति' श्रुतेः परशक्तिवैशिष्ट्यस्य सर्वविद्यासाधारण्येति भावः । वाक्यैरवसीयत इति । अयमाशयः । 'सर्वो वै रुद्र' इत्यत्र वाक्यभेदेनोपास्यविशेषनिर्द्धारणार्थत्वं सुवचम् । 'पुरुषो वै रुद्र' इत्यादिकमपि वैशब्दयोगान्नमश्शब्दान्वयापादकचतुर्थ्यभावाच्च पुरुषसूक्ताद्युपास्यानुवादेन तस्य रुद्रत्वनिर्द्धारणार्थमेव । नमश्शब्दयोगस्तु, 'सर्वं रुद्रेति वै प्राहुर्मुनयस्तत्त्वदर्शिनः । नमस्कारेण सहितं गौरवात्परमेशितुः' ॥ १ ॥ इति लिङ्गपुराणोक्तरीत्या नमश्शेषित्वरूपगौरवप्रख्यापनार्थः । यथा 'श्रीरुद्राः पावनाः श्रीशैलो मुक्तिद' इत्यादिप्रयोगेषु श्रीशब्दः पूज्यत्वप्रख्यापनार्थः । 'कद्रुद्राये'ति मंत्रस्यायमर्थः । मीढुष्टमाय सेक्तृतमाय सर्वेषामपि पित्रे । तव्यसे तवो वृद्धिः तदस्यास्तीति विनिः । तवस्वि तदतिशायने ईयसुन्प्रत्यये सति 'विन्मतोर्लुगि'ति विनो लुकि 'टे'रिति टिलोपे च सति छान्दसे इकारलोपे च सति तव्यसइतिरूपसिद्धिः वृद्धिमत्समायेत्यर्थः । हृदे हृदयस्थाय । एवंभूताय रुद्राय । शंतमं सुखावहतमं । सर्वदुःखानां शमयितृतमं । कत् वाङ्-

लीयः । तदप्युक्तम्—'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति । तस्मादुमासहितं संसाररुद्रावकं परं वस्तु सकलपरविद्योपास्यमिति सिद्धम् ॥

इति लिङ्गभूयस्त्वाधिकरणम् ॥ २८ ॥

अथ पूर्वविकल्पाधिकरणम् ॥ २९ ॥

## सू ॥ पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ ४४ ॥

अग्निरहस्यब्राह्मणे श्रूयते 'षट्त्रिंशतं सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्मयोमयान् मनश्चितः' इति । तथा 'वाक्चितः प्राणचितश्चक्षुश्चितः श्रोत्रचितः कर्म-

---

श्लाघनं स्तोत्रं 'कत्थ श्लाघाया'मिति धातोर्भावेष्विति संयोगान्तलोपः । एवंभूतं स्तोत्रं वोचेम 'लिङ्याऽऽशिष्यङ्'इत्यङि 'वचउ'मित्युमागमे च सत्याशिषि लिङि बहुवचनम् । अत्र यद्यपि हृदयस्थत्वमन्यार्थत्वेनोपात्तं । तथापि दहरविद्योपास्यसूचनार्थं भवत्येव । कैवल्योपनिषदि विशिष्य शिवस्य दहरविद्योपास्यत्वेन प्रसिद्धत्वात् । एवमन्यार्थत्वेनापि 'नमो हिरण्यबाहव' इत्यादिना सवितृमण्डलोपास्यविशेषनिर्धारणं लभ्यते प्रकरणाविरोधादिति । तद्धि बलीय इति सूत्रांशं व्याचष्टे—वाक्यं हीति । 'तदपीति' सूत्रांशं पूर्वसूत्रादुक्तमित्यस्यानुषङ्गेण व्याचष्टे—तदप्युक्तमिति । 'सर्वो वै रुद्र' इत्यादिवाक्येषु नारायणानुवाकवैषम्योद्घाटनेन न्यायव्युत्पादनार्थमिदमधिकरणम् । सर्वासु परविद्यासु शिवस्य ध्येयत्वमथर्वशिखायामाहत्यैव निर्धारितं न न्यायव्युत्पादनापेक्षम् । तत्र हि विद्याविशेषमनुपक्रम्य सर्वपरविद्यासाधारण्ये ध्यानसाधनध्यानध्यातृध्येयविषयप्रश्नानुपन्यस्य, तत्प्रतिवचनसन्दर्भे प्रश्नत्रयप्रतिवचनानन्तरं सर्वासु परविद्यासु ब्रह्मविष्ण्वादिसकलप्रपञ्चकारणभूतः परमाकाशवर्त्ती निरतिशयैश्वर्यशाली निरतिशयानन्दघनः शिव एव ध्यातव्य इति ध्येयनिर्धारणं कृत्वोपनिषत्समापिता ॥

इति लिङ्गभूयस्त्वाधिकरणम् ॥ २८ ॥

अथ पूर्वविकल्पाधिकरणम् ॥ २९ ॥

सू० ॥ पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत् ॥ ४४ ॥ यथा सवितृमण्डलविद्याप्रकरणस्य बलीयसा प्रमाणेन बाधः एवं क्रियामयक्रतुप्रकरणस्यापीति दृष्टान्तसंगतिः । शतपथब्राह्मणे अग्निरहस्ये क्रियामयक्रत्वङ्गभूत इष्टकचितोऽग्निः प्रकृतः 'तद्ध तन्मन एवासी'दिति प्रथमोत्पन्नं मनः प्रस्तुत्य 'तत्षट्त्रिंशत्सहस्राण्यपश्य'दित्यादिना मन-

---

नयमणिमालायाम्

अथ लिंगभूयस्त्वाधिकरणम् ॥ २८ ॥

सू० ॥ लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४३ ॥

सर्वो वै रुद्र इति प्रकरणनिर्दिष्टमहिमवान्रुद्रः । मण्डलविद्यामात्रे समुपास्यः प्रकरणात्तस्याः ॥ २७३ ॥

तत्तद्विद्यापठितपदैरुपस्थाप्य सर्वविद्योपास्यम् । वाक्यानि तस्य विदधति रुद्रत्वं तत्समस्तविद्योपास्यम् ॥ २७४ ॥

एवं चात्रोपदिष्टं वपुरखिलपते सामगाम्नातमेवेत्युक्तत्वात्प्राग्विशेषैस्सह तदभिमतं सर्वविद्यासु चिन्त्यम् ।

कृष्णार्धं पिंगलार्धं शिववपुरखिलोपासनास्वि(छदत्वा)भस्मा?दुक्तत्वात्तत्सुवर्णं सकलमितितदौर्बल्यतस्साम्नि यौगम् २७५॥

इति लिंगभूयस्त्वाधिकरणम् ॥ २८ ॥

चितोऽग्निचित' इति पुरुषस्य शतसंवत्सरमिते आयुषि षट्त्रिंशत्सहस्राणि दिनानि । तत्रैकस्मिन् दिने यावती मनोवृत्तिः तस्यैकैकाग्नित्वे सत्यग्नयः षट्त्रिंशत्सहस्राणि सम्पद्यन्ते । ते च प्रत्यगात्मस्वरूपेण ध्यातव्याः । एवं वाक्चित्तादयोऽपि । ते विद्यामयक्रत्वङ्गभूता उत क्रियामयक्रत्वङ्गभूता इति संशये पूर्वपक्षः प्रवर्तते । 'मनश्चितो वाक्चित' इत्यादीनां सांपादिकाग्नीनाम् 'असद्वा इदमग्र आसीत्' इत्यादिना पूर्वप्रकृतेष्टकचिताग्निशेषिभूतक्रियामयक्रत्वनुप्रवेशः स्यात् । ततश्च तेषामग्नीनां इष्टकचिताग्निना विकल्पो मानसवत् । यथा द्वादशाहे दशमेऽहन्यविवाक्ये पृथिवीपात्रस्य प्रजापतिदेवताकस्य समुद्रद्रव्यस्य मानसग्रहस्य मनःसंपाद्यग्रहणसादनस्तोत्रशस्त्रहवनप्रत्याहरणभक्षणत्वेन मानसस्यापि क्रियामयक्रत्वङ्गत्वम्, एवमेषां मानसानामपि क्रियामयक्रत्वङ्गत्वम् ॥

## सू ॥ अतिदेशाच्च ॥ ४५ ॥

'तेषामेकैक एव तावान् यावानसौ पूर्व' इति तेष्विष्टकचिताग्निकार्यातिदेशाच्च तदङ्गत्वमिति ॥ एवं प्राप्ते सिद्धान्त उच्यते—

श्चिदादयोऽग्नयस्समाम्नाताः । पुरुषायुषान्तर्गतैकैकदिनप्रभवमानसवृत्तिसंघाता अग्नित्वदृष्ट्योपास्यमाना मनश्चितः । एवमेव वाक्चिदादयोऽपि प्रत्येकं षट्त्रिंशत्सहस्रसंख्याकाः । तत्र कर्मचितो वागिन्द्रियातिरिक्तकर्मेन्द्रियव्यापाराः देहव्यापारा वा । अग्निचितो जाठराग्निव्यापाराः । ते चाग्नित्वदृष्टिविशिष्टा मनोवृत्त्यादयः प्रत्यगात्मरूपेण ध्यातव्याः । आत्मनोग्नीनर्कानिति प्रतिपर्यायं श्रवणात् । अर्कानर्चनीयानित्यर्थः । ते मनश्चिदादयो विद्यामयक्रत्वङ्गभूता उत क्रियामयक्रत्वङ्गभूता इति संशयः । यदि तत्र विद्यामयः क्रतुरपि विहितः स्यात् तदा तदङ्गभूताः स्युः । यदि न स्यात्तदा प्रकृतेनाव्यभिचरितक्रतुसंबन्धिनेष्टकचिताग्निनोपस्थापितस्य क्रियामयस्य क्रतोरंगभूताः स्युरिति भेदः । 'इष्टकेषीकामालानां चिततूलभारिषु' इति सूत्रेण इष्टकाशब्दस्य ह्रस्वः । क्रियामयः क्रत्वनुप्रवेशः स्यादिति । 'मनसैषुग्रहा अगृह्यन्त' इत्यादिष्वग्निवद्विद्यामयानि क्रत्वङ्गान्येव श्रूयन्ते न तु विद्यामयः क्रतुरिति भावः । ननु इष्टकचिताग्निना निराकाङ्क्षे क्रियामये क्रतौ कथं विद्यामयाग्नीनामन्वय इत्याशङ्क्याह—ततश्चेति । अग्नित्वसारूप्यादिष्टकचिताग्निस्थाने निविशमानानां तेषां तेन सह विकल्पो युक्त इति भावः । विद्यामयस्य क्रियामयक्रत्वनुप्रवेशे अन्वयदृष्टान्तार्थं 'मानसवदिति' सूत्रांशं व्याचष्टे—यथेति । द्वादशाहस्य दशममहरविवाक्यं स्तोत्रशस्त्रादिषु विस्पष्टवाक्यरहितम् । तस्मिन्नहनि मानसग्रहो विहितः । तस्य पृथिव्यादिकं पात्रादित्वेन ध्यातव्यम् । 'अनया पृथिव्या पात्रेण समुद्रं रसया प्राजापत्यं मनो गृह्णाती'ति मंत्रवर्णात् तस्य मानसग्रहणयागस्य ग्रहणासादनादिकं सर्वमपि मनोनिर्वृत्यम् । एवं मानसग्रहणयागवदेव मनश्चिदादीनामपि क्रियामयक्रत्वङ्गत्वं युक्तमिति भावः । ननु मानसग्रहः कस्यचिद्दृष्टकार्यस्याङ्गस्य स्थाने न निवेशनीय इति युक्तम् । तस्याद्दृष्टद्वारा क्रियामयक्रत्वङ्गत्वमिह मनश्चिदादयोऽग्निधारणं कुर्वत इष्टकचितस्याग्नेः स्थाने निवेशनीया इति कथं तेषामग्निधारणासमर्थानां तदङ्गत्वमित्याशङ्कानिराकरणार्थं सूत्रम् । सू ॥ अतिदेशाच्च ॥ ४५ ॥ इष्टकचिताग्निकार्येति । नन्विष्टकचितस्याग्नेः कार्यमाहवनीयधा-

रणं विद्यामयाग्निभिः कथमपि सम्पादयितुं न शक्यते । कथमेतेषु तत्कार्यातिदेशः । न ह्यशकनीयमर्थं शास्त्रसहस्रमपि संभूय विधातुं शक्नोति । न हि 'हिरण्यगर्भस्समवर्तताग्र' इति मन्त्रस्य वृत्त्यंतराश्रयणेनेंद्राघारप्रकाशन इव उत्करस्य पृथ्वग्रताश्रयणेन वाजिनः पात्रधारणइव परिधेः प्रथिमापेक्षणेन पशुनियोजनइव रथघोषस्य सूचकत्वकल्पनेनोद्गातृप्रेरणइव च विद्यामयाग्नीनां केनाप्युपायेनाहवनीयधारणसामर्थ्यं संपादयितुं शक्यते । उच्यते । इष्टकचितोऽग्निरुत्तरवेदिवदाहवनीयधारणप्रयोजनं क्रत्वङ्गं न भवति। किंतु गोदोहनादिवत्क्रत्वङ्गाश्रितः फलार्थगुणः । 'पशुकामश्चिन्वीते'ति श्रवणात् अभागिप्रतिषेधवार्तिके तथैवोक्तत्वाच्च । अतोऽत्र पूर्वाग्निकार्यादिदेशः पशुफलातिदेश इति नास्ति कश्चिद्विरोधः । एवञ्च विद्यामयाग्निभिः सिद्धस्वफलस्येष्टकचितस्याग्नेर्निवृत्तावन्यतः स्वकर्तव्योपकारलाघवमपश्यन्ती क्रत्वर्थोत्तरवेदिः प्राप्नोतीति तयाग्निधारणसिद्धिः । यदि चोत्तरवेदिवदग्निधारणार्थं क्रत्वंगमग्निः, तथापि तस्यैतद्वदग्निधारणमेव न प्रयोजनं । किंतु क्रतुफलभूयस्त्वमपि । उत्तरवेद्यपेक्षया तस्यानेकदृष्टादृष्टाङ्गकपालयुक्तस्यातिक्लेशसाध्यत्वात् । उत्तरवेद्यां ह्यग्निश्चीयत इति विधानादग्निपक्षे उत्तरवेद्या अपि सत्वाच्च संकर्षकाण्डेऽपि तथैव प्रतिपादनाच्च । तत्र हि मध्यमायामुपसद्यग्निश्चीयते प्रकृत्युपबन्धादिति द्वितीयाध्यायाधिकरणे किमग्नावुत्तरवेदिधर्मा भवन्ति न भवन्ति वेति सन्दिह्याग्न्युत्तरवेद्यास्समुच्चयेन भिन्नकार्यत्वावगत्या प्रकृतिविकृतिभावाभावान्न भवन्तीति पूर्वपक्षप्राप्तावुत्तरवेद्याः प्रकृतावग्निधारणार्थत्वावगमात् 'इष्टकाभिरग्निं चिनुत' इत्याहवनीयाग्नेश्चयनसंस्कार्यत्वश्रवणस्य साक्षादुपपादयितुमशक्यत्वेन योग्यतया चयननिवृत्त्यर्थस्थण्डिलसाध्याग्निधारणद्वारकत्वावगमेन स्थाण्डिलरूपस्याप्यग्नेराहवनीयधारणार्थत्वादेवमुभयोरेककार्यत्वेऽपि 'वेद्यां हवींष्यासादयति बर्हिषि हवींष्यासादयती'ति वचनबलाद्वेदिबर्हिषोरिव 'उत्तरवेद्यां ह्यग्निश्चीयत' इति वचनबलात्समुच्चयोपपत्तेरेककार्यत्वस्य न्यायतः प्राप्तेः प्रकृतिविकृतिभावाभावेऽपि बाधकाभावात् । तस्मादुत्तरवेदिधर्मास्तत्र भवन्त्येव । अतस्तस्य चयनमपि । यथा प्रकृतिमध्यमायामुपसदि कार्यमिति सिद्धान्तं कृत्वा 'अनुपसदमग्निश्चीयत' इत्येकेषां 'सोस्य नित्यविधि'रिति गुणसूत्रेण केषांचिदनुपसदमग्निचयनमित्याहत्य विधानादिति प्रतिपादितम् । ततश्च पूर्वाग्निकार्यातिदेशः क्रतुफलभूयस्त्वातिदेश इत्यस्मिन्नपि पक्षे नास्ति कश्चिद्विरोधः । एवं विद्यामयाग्निषु पूर्वाग्निकार्यातिदेशसद्भावात्तदुपपादनसंभवाच्च तत्रैव विधिः न तु विद्यामयेषु ग्रहादिष्विति । 'मनसैषुग्रहा अगृह्यन्ते'त्यादि श्रवणेऽपि तत्र क्रियामयग्रहादिकार्यातिदेशभावात्तत्कल्पनेऽपि तदुपपादनस्याशक्यत्वाच्च तत्र विधिमङ्गीकृत्य पूर्वपक्षो न प्रवर्तितः । एवञ्च 'मनसैषुग्रहा अगृह्यन्त मनसास्तुवत मनसाशंशन्वाचैषुग्रहा अगृह्यन्त वाचास्तुवत वाचाशसंन्प्राणेनैषुग्रहा अगृह्यन्त प्राणेनास्तुवत प्राणेनाशंसन्नि'त्यादिषु न मनोवाक्प्राणचक्षुरादिवृत्त्यात्मकग्रहग्रहणादिविधिः । पुरुषायुषान्तर्गताना सर्वासामपि मनोवागादिवृत्तीनामग्निदृष्ट्या क्रोडीकृतत्वात् । किंतु क्रियारूपाणां ग्रहग्रहणादीनां साक्षात्परंपरया वा मनोवृत्त्यादिसाध्यानां मनोवृत्तित्वाद्युपचारेण मनोवृत्त्यादिरूपाग्नीनां क्रियारूपक्रत्वनुप्रवेशिनाञ्च तथाभूतसकलयज्ञपरिकरयुक्तत्वेन स्तुतिरिति पूर्वप-

सू ॥ विद्यैव तु निर्धारणाद्दर्शनाच्च ॥ ४६ ॥

विद्यैव विद्यामयक्रत्वङ्गभूता इत्यर्थः। सांपादिकाग्नित्वेन विद्यामयत्वे सिद्धेऽपि 'ते हैते विद्याचित एव' इति निर्धारणं हि विद्यामयक्रत्वङ्गत्वख्यापनाय। दृश्यते च विद्यामयक्रतुः अत्रैव 'मनसाऽचीयन्त मनसैषु ग्रहा अगृह्यन्त मनसाऽस्तुवन् मनसाऽशंसन् यत् किंच यज्ञे कर्म क्रियते यत् किंच यज्ञीयं कर्म मनसैव तेषु मनोमयेषु मनश्चित्सु मनोमयमक्रियत' इति। अतस्तेषां विद्यामयक्रत्वङ्गत्वमेव ॥

सू ॥ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४७ ॥

'ते हैते विद्याचित एव तान् हैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते विद्यया हैवैत एवंविदश्चिता भवन्ति' इति श्रुत्या वाक्येन लिङ्गेन चावगतस्य

---

क्षाभिप्रायः। सू ॥ विद्यैव तु निर्द्धारणाद्दर्शनाच्च ॥ ४६ ॥ पूर्वपक्षसूत्रे क्रियाशब्द इवात्र विद्याशब्दोऽपि लाक्षणिक इति व्याचष्टे—विद्यैवेति। ते हैत इति। सर्वनामभ्यां सप्तविधानामग्नीनां परामर्शः। तेषां विद्याचितत्वे सिद्धेऽपि य'द्विद्याचितएवे'ति निर्धारणं यच्च तदनंतरं 'विद्यया हैवत एवंविदश्चिता भवन्ती'ति तद्विवरणवाक्ये निर्धारणं तद्विद्यामयक्रत्वनुप्रवेशिनः एवैते न तु क्रियामयक्रत्वनुप्रवेशिन इति ज्ञापनायेत्यर्थः। ननु विद्यामयः क्रतुरेव न दृश्यते यदनुप्रवेशो निर्धारणेन ज्ञाप्येतेति शङ्कानिराकरणार्थं 'दर्शनाच्चेति' सूत्रशेषं व्याचष्टे—दृश्यते चेति। अयमाशयः। अग्नीनामिव ग्रहग्रहणादीनामपि श्रवणमविशिष्टम्। न च सर्वासां मनोवागादिवृत्तीनामग्निदृष्टिक्रोडीकृतत्वाद्ग्रहग्रहणादिदृष्टिविषयत्वाभावात्ते न सन्तीति वाच्यम्। न हि प्रतिदिनं यावत्यो मनोवागादिवृत्तयस्तासां सर्वासां संयातेष्वग्निदृष्टिः कर्तव्येति विधानमस्ति। षट्त्रिंशत्सहस्रसंख्या तु प्रतिदिनप्रभवासु कतिपयमनोवागादिवृत्तिष्वग्निदृष्ट्यापि चरितार्था। कासुचिद्ग्रहग्रहणादिदृष्टिर्न विरुध्यते। न च विद्यामयं ग्रहग्रहणादिकं मनोवृत्त्यधिष्ठानकमिति नियमोऽस्ति। तदधिष्ठानत्वेऽपि मानसग्रहाणां ग्रहणासादनादीनामिदमिदमिति मनोमात्रनिर्वर्त्यत्वरूपं तदुपपद्यते। तथापि विद्यामयस्य क्रतोर्विधिर्नोपलभ्यत इति चेदनुपलभ्यमानोऽपि ग्रहणादिसंस्कारविधिभिरुन्नीयते। यत्किंचन यज्ञे कर्म क्रियते यत्किंचन यज्ञियं कर्मेति द्विवारं वीप्सया यज्ञानुबन्धि यत्फलार्थं गुणजातमङ्गजातं च तत्सर्वं गृह्यते। तेनाभिषवादीनामपि ग्रहणमसंदिग्धम्। एवं च 'सोमाभावे पूतिकानभिषुणुया'दिति पूतिकानामभिषवमात्रश्रवणेन तद्द्रव्यकयागान्वयः कल्प्यते। यदि राजन्यं वैश्यं वा याजयेत्सयदि सोमं विभक्षयिषेन्न्यग्रोधस्तिभिनीराहृत्य तास्संपिष्य दध्युन्मृज्य तस्मै भक्षं प्रयच्छेन्न सोममिति फलचमसस्य भक्षणमात्रश्रवणेन तद्द्रव्यकयागाभ्यासः कल्प्यप्ते। इह ग्रहणाभिषवहोमभक्षणादिसकलसंस्कारश्रवणे कथं यागकल्पनं न स्यात्। तस्मादस्त्यत्र विद्यामयः क्रतुरिति। नन्वैन्द्रवायवं गृह्णातीत्यादिवाक्येषु श्रुतानामिंद्रवाय्वाद्युद्देशेन सोमरसग्रहणानां यागान्वयापेक्षाणां श्रुतसोमयागान्वयेन चारितार्थ्ये संभवति न यागान्तरकल्पनेति पशुसोमाधिकरणे व्यवस्थापितम्। एवमिहापि ग्रहणादिसंस्काराणामिष्टकचिताद्युपस्थापितक्रियामयक्रत्वन्वये संभवति न विद्यामयः क्रतुः कल्पनीय इति शङ्कानिराकरणार्थं सूत्रम्। सू ॥ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४७ ॥ ननु श्रुतिलिङ्गवाक्येभ्यः मनश्चिदादीनां वि-

**विद्यामयक्रत्वन्वयस्य दुर्बलेन प्रकरणेन न बाधः॥ ननु 'मनसैषु ग्रहा अगृह्यन्त' इत्यादिषु विधिप्रत्ययाश्रवणात् क्रियामयात् क्रतोरन्यो विद्यामयः क्रतुर्नास्तीत्यत आह-**

**सू ॥ अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ॥ ४८ ॥**

**'ग्रहा अगृह्यन्त' इत्यादिक्रत्वनुबन्धैः 'ते हैते विद्याचित एव' इति श्रुत्यादिभिश्च विद्यामयक्रतुविधिः कल्पनीयः। दहरविद्यादीनां क्रियामयात् पृथक्त्ववदस्यापि विद्यामयक्रतोः सानुबन्धैः श्रुत्यादिभिः पृथक्त्वमवगम्यते । दृष्टश्चानुवादस्वरूपे विधिः 'यदेव विद्यया करोति' इत्यादौ । तदुक्तम् 'वचनानि त्वपूर्वत्वात्' इति । अतो विद्यामयक्रत्वङ्गत्वमेव युक्तम्॥ आशङ्क्य परिहरति—**

---

द्यामयक्रत्वन्वयो नावगम्यते । तथाहि नतावदिह तेषां तत्र विनियोजिका विभक्त्यादिश्रुतिरस्ति । तत्सत्वेऽपि 'षड्विंशतिरित्येव ब्रूयात्' इत्यादिवदेवकारोपहतविधिशक्तिकतया न विनियोजकत्वं संभवति । एवकारश्रुतिस्तु क्रियारूपक्रत्वंगत्वमेव व्यावर्त्तयेन्न तु विद्यारूपक्रत्वंगत्वं बोधयेत् । तथा सार्वदिकसर्वभूतकर्तृकत्वं चयनस्य व्यवस्थितकालकर्तृकक्रियारूपक्रत्वङ्गत्व एव लिंगं न तु विद्यारूपक्रत्वंगत्वे। एवंविदे चिन्वंति एवंविदश्चिता भवंति इति वाक्यं तु अग्नीनां पुरुषसंबन्धमात्रं बोधयेत् न तु विद्यारूपे क्रियारूपे वा क्रतावङ्गत्वम् । अतः श्रुत्यादिभिर्विद्यामयक्रत्वन्वयोक्तिर्न युक्तेति चेदुच्यते । उदाहृतश्रुतिलिङ्गाभ्यां क्रियारूपक्रत्वन्वये निराकृते ग्रहणादिसंस्कारविधिभिस्तदन्वययोग्यो विद्यामयः क्रतुः कल्पनीयो भवति । क्रत्वङ्गस्याग्निचयनस्य पुरुषसंबन्धं बोधयद्वाक्यं क्रतुसंबन्धद्वारा निर्वाह्यमिति क्रियारूपक्रतुसंबन्धस्य श्रुतिलिङ्गाभ्यां बोधे सति विद्यावत्वरूपपुरुषविशेषणसामर्थ्याद्विद्यारूपक्रतुसंबन्धद्वारकस्यैव तस्य बोधकं पर्यवस्यतीत्येवं श्रुतिलिङ्गवाक्याना विद्यामयक्रत्वन्वये पर्यवसानमस्तीति भाष्याभिप्रायः । तद्विरोधिनः प्रकरणस्यापि हि क्रियामयक्रत्वङ्गत्वबोधकत्वं पर्यवसानवृत्त्यैव । नह्यग्निरहस्यब्राह्मणे क्रियामयस्य क्रतोः प्रकरणमस्ति किं तु तदङ्गस्य क्रियानिर्वर्त्यस्याग्नेरेव । अतस्तदीयस्यैव प्रकरणस्य तदुपस्थाप्यक्रत्वन्वये पर्यवसानं वक्तव्यमिति सूत्रे चकारेण विद्यामयाग्नीनामिव विद्यामयग्रहग्रहणादीनां क्रियामयक्रतौ वैकल्पिताङ्गत्वासंभवः पूर्वपक्षिप्रदर्शितः समुच्चीयते । नन्विति । ग्रहग्रहणादिषु विधिसद्भावे हि विहितैर्विद्यामयैस्संस्कारैरुचितो विद्यामयः क्रतुः कल्प्येत नतु तच्छ्रवणमस्तीति भावः । **सू ॥ अनुबंधादिभ्यः प्रज्ञांतरपृथक्त्ववद्दृष्टश्च तदुक्तम् ॥ ४८ ॥** ग्रहा अगृह्यन्तेत्यादीनामनुवादस्वरूपत्वेऽपि वचनानि त्वपूर्वादितिन्यायेन मनश्चिदादीनामिव ग्रहग्रहणादीनामपि विधिकल्पनं भवन्न निवारयितुं शक्यम् । 'सोमे वचनाद्भक्षो न विद्यत' इति अधिकरणे हि सोमे शेषभक्षो नास्ति वचनाभावात् । 'सर्वतः परिहारमाश्विनं भक्षयती'त्यादिवचनानां गुणविधानार्थत्वात् । न च गुणविधानस्य विहितभक्षणविधिमन्तरेणानुपपत्तिः । तस्यैच्छिकपक्षप्राप्तभक्षणविषयत्वोपपत्तेरिति पूर्वपक्षं कृत्वा विशिष्टविधिरूपाण्येव तानि वाक्यानि भक्षणस्यापूर्वत्वेन विध्यर्हत्वादिति सिद्धांतितम् । तथा च ग्रहग्रहणादिभिः क्रत्वनुबन्धैः पूर्वसूत्रोदाहृतश्रुत्यादिभिस्सहितैः क्रतुविधिः कल्पनीय इति न विद्यामयक्रतुविध्यभावः शङ्कनीय इति भावः । **आशङ्क्येति ।** मनश्चिदादीनामतिदेशेनेष्टकचिताग्निभिस्तुल्यकार्यत्वावगमात्तेषां क्रियामयक्रत्वनुप्रवेशो-

सू ॥ न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ४९ ॥

'तेषामेकैक एव तावान् यावानसौ पूर्वः' इतीष्टकचिताग्निचितफलसामान्येनातिदेशः, इष्टकचिताग्नेः स्वक्रतुद्वारेण यत् फलं तदेषां विद्यामयक्रतुप्रवेशेन फलमिति । न पुनरिष्टकचिताग्नितुल्यदेशत्वमेषामिति । केनापि सामान्येनातिदेशोपलब्धेः 'स वा एष एव मृत्युर्य एष एतस्मिन् मण्डले पुरुष' इति संहर्तृत्वमात्रेण । न हि तत्र मण्डलपुरुषस्य मृत्युतुल्यदेशत्वम् । अतः केनचित् सामान्येनातिदेशो न विरोधः ॥ हेत्वन्तरमाह

सू ॥ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ ५० ॥

परेण च ब्राह्मणेनास्य मनश्चिदादिवाचिनः शब्दस्य विद्यामयत्वप्रतिपादकत्वमवगम्यते । तथा हि 'अयं वाव लोक एषोऽग्निश्चितस्तस्याप' इत्यादिना पृथक्फला विद्या विधीयते । क्रियाप्रकरणे मनश्चिदादीनामनुबन्धस्तु संपादनीयानामग्न्यङ्गानां भूयस्त्वात् । तत एतेषां विद्यामयक्रत्वङ्गत्वम् ॥

इति पूर्वविकल्पाधिकरणम् ॥ २९ ॥

---

ऽवगम्यत इति पूर्वपक्षोक्तमाशङ्क्येत्यर्थः । सू ॥ न सामान्यादप्युपपत्तेर्मृत्युवन्नहि लोकापत्तिः ॥ ४९ ॥ इष्टकचिताग्नेरिव स्वप्रधानद्वारा फलवत्वमस्तीत्येतावता सादृश्येनातिदेशः न तुल्यदेशत्वपर्यन्तेन । यथा मनश्चिदादिब्राह्मणात्पूर्वब्राह्मणावसानश्रुतेः'स एष मृत्यु'रित्यादौ मण्डलपुरुषे संहर्तृत्वमस्तीत्येतावता सादृश्येन मृत्युरिति व्यपदेशः न तु मृत्युलोकावस्थितिलक्षणतुल्यदेशत्वपर्यन्तेनेत्यर्थः। हेत्वंतरमिति । मनश्चिदादिब्राह्मणस्य विद्याप्राधान्यइति शेषः ॥ सू ॥ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ ५० ॥ 'अयं वावलोक'इति चितेऽग्नौ पृथिवीदृष्टिर्विधीयते । 'तस्याप एव परिश्रुता' इति 'अश्मन्नूर्जमिति परिषिञ्चती'ति विहिताग्निपरिषेचनजले समुद्रजलदृष्टिर्विधीयते । एवं 'मनुष्याय जुष्मत्य इष्टका'इत्यादिनाप्यग्न्यनुबन्धिषु भूलोकादितत्तद्वस्तुविशेषदृष्टयो विधीयन्ते । अवसाने च तद्विदः फलमुच्यते 'एतत्सर्वमभिसम्पद्यत' इति । चकारात्पूर्वेणाऽपि ब्राह्मणेन मनश्चिदादिब्राह्मणस्य विद्याप्राधान्यमवगम्यते इति समुच्चीयते । पूर्वत्र हि स एष मृत्युर्य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेक्षन्पुरुषः स एष एवंविद आत्मा भवति स यदैवंविदस्माल्लोकात्प्रैत्यथैतमेवात्मानमभिसंभवति सोमृतो भवती'ति विद्याविशेषमुपदिश्य तद्विदः फलमुच्यते । न तु स्वतन्त्रविद्यानां क्रियामयप्रकरणसमाम्नानं किमर्थमित्याकाङ्क्षायां 'भूयस्त्वानुबन्ध'इति सूत्रशेषं व्याचष्टे—क्रियामयप्रकरण इति । अनुबन्धः क्रियानिर्वर्त्योऽग्निः प्रकरणमनुसमाम्नानमित्यर्थः ॥

इति पूर्वविकल्पाधिकरणम् ॥ २९ ॥.

---

नयमणिमालायाम्

अथ पूर्वविकल्पाधिकरणम् ॥ २९ ॥

सू ॥ पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत् ॥ ४४ ॥ अतिदेशाच्च ॥ ४५ ॥ विद्यैव तु निर्धारणाद्दर्शनाच्च ॥ ४६ ॥ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४७ ॥ अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ॥ ४८ ॥ न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ४९ ॥ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबंधः ॥ ५० ॥

प्रकृताग्निनेष्टकेन प्राप्तविकल्पो मनश्चिदादिगणः । शेषः क्रियामयस्य क्रतोर्भवेन्मानसग्रहवत् ॥ २७६ ॥

विद्याचितएवेति श्रुत्या निर्धारणाद्बलीयस्याः । यज्ञक्रतोरयं स्याच्छेषो विद्यामयस्यैव ॥ २७७ ॥

इति पूर्वविकल्पाधिकरणम् ॥ २९ ॥

## अथ शरीरे भावाधिकरणम् ॥ ३० ॥

### सू ॥ एक आत्मनः शरीरे भावात् ॥ ५१ ॥

**इह पूर्वोक्तब्रह्मस्वरूपानुसन्धानं सर्वासु परविद्यासु युज्यते न वेति संशयः। तत्रैके मन्यन्ते। शरीरे वर्तमानत्वादुपासितुः कर्तृत्वभोक्तृत्वरूपापन्नत्वात् तथाऽवस्थितस्यात्मतया परविद्यासु परमेश्वरस्य त्रिलोचनत्वादिलक्षणस्वरूपानुसन्धानं न युज्यत इति ॥ सिद्धान्त उच्यते।**

### सू ॥ व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् ॥ ५२ ॥

**नैवं यत्कर्तृत्वभोक्तृत्वादिरूपापन्नस्योपासितुरात्मतया परमात्माऽनुसन्धेय इति। अपितु सांसारिकस्वभावान्मुक्ते यो व्यतिरेक अपहतपाप्मत्वादिगुणरूपः सोऽनुसन्धेयः। तथाऽनुसन्धानसद्भावभावित्वात् स्वरूपोपलब्धेः। यथा यथाऽव-**

---

## अथ शरीरे भावाधिकरणम् ॥ ३० ॥

सू ॥ एक आत्मनश्शरीरे भावात् ॥ ५१ ॥ पूर्वाधिकरणविषयवाक्ये मनश्चिदादयः प्रत्यगात्मत्वेन ध्यातव्या इत्युक्तम्। एवं शिवोऽपि प्रत्यगात्मतया ध्यातव्यः। 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसी'ति शिवजीवयोः परस्परैक्यभावनयाविहितत्वात् 'आत्मेति तूपगच्छंति'इत्यधिकरणे तथा वक्ष्यमाणत्वाच्चेत्येतदनुस्मृत्य लिङ्गभूयस्त्वाधिकरणोक्तमाक्षिप्यत इति संगतिं सूचयति—पूर्वोक्तमिति। युज्यते न वेति संशय इति। किं प्रत्यगात्मा तदानींतनैः कर्माधीनशरीरबन्धककर्तृत्वभोक्तृत्वधर्मैर्विशिष्टः परविद्यासु शिवधर्मिकैक्यप्रतियोगित्वेनानुसंधेयः। किं वा मुक्तिदशायामाविर्भविष्यद्भिरपहतपाप्मत्वादिभिर्विशिष्ट इत्यनवधारणात्संशय इति भावः। यथा शुक्तिरजतैक्यानुभवस्तदानीं दृश्यमानैश्चाकचक्यादिभिर्धर्मैर्विशिष्टतया शुक्त्यैक्यविषयः। न तु तदानीमदृश्यमानैर्नीलभागादिभिर्विशिष्टतया। एवं शिवजीवैक्यभावनमपि तदानीमनुभूयमानैर्धर्मैर्विशिष्टेन जीवेनैक्यविषयं। न तु तदानीं तिरोहितैरिति युक्तम्। न च तत्क्रतुन्यायानुसारादनेवंभावश्शङ्कनीयः। 'तं यथा यथोपासत' इति श्रुत्यन्तरानुसारेण तस्य प्राप्यपरब्रह्मविषयत्वात्। एवञ्च यदुक्तं लिङ्गभूयस्त्वाधिकरणे निरस्तसमस्तदोषस्य निखिलमङ्गलगुणाकरस्य चिदानन्दरूपकर्माधीनदिव्यविग्रहविशिष्टस्य शिवस्य सर्वासु परविद्यासु ध्येयत्वं तन्नोपपद्यते। कर्माधीनशरीरबन्धतदधीनविहितनिषिद्धकर्तृत्वतत्फलसुखदुःखभोक्तृत्वविशिष्टप्रत्यगात्मरूपतयानुसंधीयमाने तस्मिन् तद्विरोधिगुणानुसंधानायोगात्। अहमनुभवरूपप्रत्यगात्मगुणेभ्यः श्रुत्युपस्थापितगुणानां दुर्बलत्वादिति पूर्वः पक्षः ॥ सू ॥ व्यतिरेकस्तद्भावभावित्वान्नतूपलब्धिवत् ॥ ५२ ॥ नत्विति सूत्रांशं व्याचष्टे—नैवमिति। अपहतपाप्मत्वादिगुणरूपइति व्यतिरेकपदव्याख्यानेन प्रजापतिविद्यावाक्यं व्यतिरेकस्यानुसन्धेयत्वे प्रमाणं सूचितम्। तत्र ह्यपहतपाप्मत्वादिरूपविशिष्टं प्रत्यगात्मानं प्रस्तुत्य 'सोन्वेष्टव्य' इति प्रकृतरूपविशिष्टमेव तच्छब्देन परामृश्य तस्यानुसन्धेयत्वमुक्तम्। एवं च यथाविधिविहितविद्यानुष्ठानं। न तु लौकिकप्रमाणोपस्थित्यनुगुणमिति। तदानीं प्रत्यक्षोपस्थितैरपि सांसारि-

(१) 'अधुनातनैः' इति. ख० पाठः।

स्थितस्वरूपब्रह्मानुसन्धानभाविनी ब्रह्मोपलब्धिः तद्वत्, 'यथाक्रतुरस्मिंल्लोके पुरुषः' इत्यादिश्रुतेः। अतः सांसारिकस्वभावनिर्मुक्तापहतपाप्मत्वादिस्वरूपतयोपासितुरनुसन्धेयत्वात् तदात्मतयाऽनुसन्धेयस्य परमेश्वरस्य त्रिलोचनत्वादिलक्षणस्वरूपानुसन्धाने नास्ति विरोधः ॥

इति शरीरे भावाधिकरणम् ॥ ३० ॥

## अथ अङ्गावबद्धाधिकरणम् ॥ ३१ ॥

## सू ॥ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५३ ॥

कासु चिच्छाखासु श्रूयमाणा उपासनाङ्गावबद्धाः सर्वासूपासनास्वङ्गत्वेनोपसंहार्या न वेति संशयः॥ तथा हि—"आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्। ध्याननिर्मथनादेव पाशं दहति पण्डितः॥" इति कैवल्योपनिषदि दहरोपासनायां प्रणवाभ्यासः श्रूयते। 'अग्नि'रित्यादिना भस्म गृहीत्वा विमृज्याङ्गानि संस्पृशेत्। तस्माद्व्रतमेतत् पाशुपतं पशुपाशविमोक्षाय' इति अथर्वशिरसि पाशुपतविद्यायां भस्मोद्धूलनं श्रूयते। अन्यत्र 'तिस्रो रेखाः प्रकुर्वीत' इति

कैर्धर्मैः प्रत्यगात्मनोऽनुसंधानं न कार्यं किंतु तदानीं तिरोहितैरप्यपहतपाप्मत्वादिभिरेवेति भावः। ननु ब्रह्मोपलब्धिर्यथावस्थितब्रह्मविषया कार्येति नियमो 'यथाक्रतु'रिति श्रुतेरित्याशङ्क्य सा श्रुतिर्जीवयाथात्म्यसाधारणी तस्यापि प्राप्यकोटिनिविष्टत्वात् 'तं यथा यथोपासत' इति श्रुतेरपि जीवात्मभूतपरमात्मत्वादित्यभिप्रेत्याह—यथाक्रतुरिति ॥

इति शरीरे भावाधिकरणम् ॥ ३० ॥

## अथाङ्गावबद्धाधिकरणम् ॥ ३१ ॥

सू ॥ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५३ ॥ एवं परब्रह्मणः शिवस्योपास्यस्य सकलपरविद्यासु साधारण्यं लिङ्गभूयस्त्वाधिकरणोक्तमाक्षिप्य समाहितं। तत्प्रसङ्गात्तदसाधारणमन्त्रभूतप्रणवाभ्यासस्य तद्भक्तासाधारणचिह्नभस्मोद्धूलनत्रिपुण्ड्रधारणयोश्चासाधारण्यमुच्यत इति संगतिः। उपासनांगावबद्धा इति। उपासनाङ्गत्वेन निबद्धा इत्यर्थः। ननु प्रणवाभ्यासभस्मोद्धूलनयोरुपासनाङ्गत्वेन निबंधनं दहरपाशुपतविद्याप्रकरणाम्नानादवगम्यते। कालाग्निरुद्रोपनिषदि विद्याविशेषमनारभ्याम्नातस्य त्रिपु-

---

नयमणिमालायाम्

### अथ शरीरे भावाधिकरणम् ॥ ३० ॥

सू ॥ एक आत्मनः शरीरे भावात् ॥ ५१ ॥ व्यतिरेकस्तद्भावभावित्वान्नतूपलब्धिवत् ॥ ५२ ॥

वपुषि स्थितेरनाकाशात्कर्तृत्वस्यातिवेलमलिनेस्मिन्। शिवसामरस्यविषया शिवोहमिति भावना कथं जीवे ॥२७८॥
नायं विद्यासु चिन्त्यस्तनुभृदशिवतापादकैः कर्तृताद्यैः किं तु ब्रह्मोपदिष्टैरपहतदुरितत्वादिभिस्तद्विरुद्धैः।
एवं ध्याते हि जीवः प्रलयवति यथावस्थिते स्वस्य रूपे मुक्तौ चिच्छक्तितः स्यात्परशिवसमता तत्क्रतुन्यायगत्या ॥२७९॥

इति शरीरे भावाधिकरणम् ॥ ३० ॥

**त्रिपुण्ड्रधारणविधिः श्रूयते । तस्य 'शिवसायुज्यम्' इति फलश्रवणात् परविद्याङ्गत्वम् । तदेवं विद्याङ्गावबद्धाः यासु शाखासु श्रुतास्तासु विहितेषूपासने-**

ण्ड्रधारणस्य तत्कुतोऽवगम्यते इत्याकाङ्क्षायामाह—तस्येति । 'तिर्यक् तिस्रो रेखाः प्रकुर्वीत व्रतमेतच्छांभवं सर्ववेदेषु देवादिभिरुक्तं तत्समाचरेन्मुमुक्षुरपुनर्भवाये'ति त्रिपुण्ड्रधारणस्य मुक्तिफलकत्वमुक्तम् । उपनिषदन्ते च 'एतत्त्रिपुण्ड्रं भस्मना करोति यो विद्वान्ब्रह्मचारी गृही वानप्रस्थो यतिर्वा समस्तमहापातकोपपातकेभ्यः पूतो भवती'त्युपक्रम्य देहं त्यक्त्वा शिवसायुज्यमाप्नोति न स पुनरावर्तत इत्युपसंहृतम् । न च विद्याङ्गभावं विना तस्य साक्षान्मुक्तिफलकत्वं सम्भवतीति तस्य मुक्तिफलकविद्याङ्गत्वमवसीयत इति भावः। इत्थं विषयं संशोध्य पूर्वपक्षमाह—एवमिति । विद्याविशेषप्रकरणाम्नातयोः प्रणवाभ्यासभस्मोद्धूलनयोः प्रकरणान्नियमः स्पष्टः । त्रिपुण्ड्रधारणस्य तु विद्याविशेषमत्र शाखायां विधानं तच्छाखाम्नातविद्यासु सन्निधानान्नियमः । यथा वेदाद्यधिकरणपूर्वपक्षे 'शन्नो मित्रा'दि मन्त्रस्येति भावः । 'श्रुत्या सन्निधेर्बाध' इति सन्निधिग्रहणं प्रकरणस्याप्युपलक्षणम् । श्रुतिग्रहणमपेक्षारूपवस्तुसामर्थ्यात्मकलिङ्गस्याप्युपलक्षणम् । तथाचा'त्मानमरणिं कृत्वे'ति मन्त्रे 'कृत्वा'श्रुत्या प्रणवस्य ध्यानमात्राङ्गत्वेन विधानात्तया दहरविद्याप्रकरणस्य बाधः । न हि ध्यानसामान्यवाचिन्या प्रकरणानुसारेण दहरविद्यायाः सङ्कोचो युज्यते । भस्मोद्धूलनत्रिपुण्ड्रधारणयोस्तु जाबालश्रुतौ 'नीलकण्ठाय शिरसि निक्षिपेत्सर्वात्मने नम' इत्यन्तेन तदुभयविधानानन्तरं 'पापं नाशयते कृत्स्नमपि जन्मशतार्जित'मित्यादिना पापक्षयहेतुत्वावगमात् । कालाग्निरुद्रोपनिषदि त्रिपुण्ड्रधारणस्य पापक्षयद्वारा मुक्तिहेतुत्वश्रवणात् । 'मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा । भस्मच्छन्नो भस्मशय्याशयानो रुद्राध्यायी मुच्यते सर्वपापैः' इति शातातपस्मृतौ भस्मोद्धूलनस्य सर्वपापक्षयहेतुत्वश्रवणाच्च । तयोर्मुक्तिहेतुत्वश्रवणस्य श्रवणमनननिदिध्यासनादिप्रतिबन्धकदुरितनिवृत्तिद्वारकत्वावगमात् । तस्मादपेक्षालक्षणवस्तुसामर्थ्यरूपेण लिङ्गेन पाशुपतविद्याप्रकरणस्य तत्तच्छाखाम्नातविद्यासन्निधेश्च बाधः । विद्याविशेषाम्नातानामपि हि विशेषाणामपेक्षाबलात्प्रकरणमनादृत्य सर्वविद्यासाधारण्यापादन 'मानंदादयः प्रधानस्य' 'अक्षधियां त्वविरोधः' इत्यधिकरणेषु सिद्धम् । अग्रे च 'तमेतं वेदानुवचनेन'इत्यादि प्रकृतदहराकाशविषयकविद्याविशेषग्रहणे सत्यपि 'धर्मेण पापमपनुदती'ति श्रुतिप्रतिपन्नस्य कर्मजन्यस्य पापक्षयरूपद्वारस्य सर्वविद्यापेक्षितत्वात्कर्मणां सर्वविद्यासाधारण्यं वक्ष्यते । तथा 'तस्मादेवंविच्छान्तो दान्त' इत्यादि श्रुतौ प्रकृतविद्यापरामर्शकैवंविच्छब्दे सत्यपि शमो दमो वक्ष्यते । तस्मादिह वक्तव्यमधिकं नास्तीति संक्षिप्योक्तं भाष्ये 'श्रुत्या सन्निधेर्बाध' इति । यद्यपि श्रुत्यादिभिः प्रकरणाबाधस्य पूर्वविकल्पाधिकरणे निरूपितत्वादपेक्षावशात्सर्वविद्यासाधारण्यस्य बहुष्वधिकरणेषु प्रतिपन्नत्वाच्च नात्र व्युत्पादनीयमस्ति । तथापि भस्मोद्धूलनादिकं यथाप्रकरणं व्यवतिष्ठत इति केषाञ्चिद्भ्रान्तानां वचनैर्मन्दानां माभूद्भ्रम इत्येतदधिकरणारंभः। शाखैक्यकृतस्य वेदैक्यकृतस्य च द्विविधस्यापि सन्निधेर्बाधप्रतिपादनार्थं सूत्रे 'शाखासु प्रतिवेद'मिति विशेषणद्वयम् । हिशब्दोऽस्यार्थस्य न्यायसाम्यादधिकरणांतरेभ्यः प्रसिद्धिद्योतनार्थः । एवं ब्रह्ममीमांसकमर्यादया प्रणवानुसन्धानादीनां सर्वविद्यासाधारण्यमुपपादितम् । कर्ममीमांस-

घूपासकैः कार्याः सन्निधानात् न सर्वत्र ॥ इति प्राप्ते ब्रूमः । भस्मोद्धूलनाद्य उपासनाङ्गावबद्धा यासु शाखासु श्रुतास्तास्वेवेति न नियमः । किंतु प्रतिवेदं सर्वासु शाखासु सर्वैरपि ब्रह्मोपासकैः कार्या एवेति श्रुत्या सन्निधेर्बाधः ॥

## सू ॥ मन्त्रादिवद्वाऽविरोधः ॥ ५४ ॥

यथा क्रत्वङ्गभूतानां मन्त्राणामेकैकशाखागतानामपि सर्वशाखागतक्रत्वन्वये न

---

कास्त्वनुवादस्सतिसंभवे प्रकृतगामी प्रकृतसत्वे तदन्वयासंभवेऽप्यानर्थक्यतदङ्गन्यायेन तदङ्गगामी । श्रुतिसङ्कोचस्तु प्रकरणानुग्रहलाभार्थत्वान्न दोषः । यदा प्रकरणानुग्रहाय श्रुतेरपि सङ्कोचः, तदा किमु वक्तव्यमपेक्षालक्षणलिङ्गमकिञ्चित्करमित्यंनुवादस्य । प्रकृतगामित्वमौत्सर्गिकमाद्रियन्ते । अत एव वारणादिपात्राणामाधानप्रकरणे 'वारणो यज्ञावचरो वैकंकतो यज्ञावचर' इत्यादिवाक्येषु यज्ञसामान्यसाधनत्वेन श्रुतानामपि सर्वासामिष्टीनां पात्रापेक्षायां सत्यामपि तेषामयज्ञरूपाधानसंबन्धासंभवेऽपि पावमानेष्टीनामाधानाङ्गतायामङ्गावतारन्यायेन पावमानेष्टिमात्राङ्गता स्यादिति । तस्य न्यायस्यानवकाशीकरणेन पात्राणां सर्वेष्टिसाधारण्यार्थं पावमानेष्टीनामाधानाङ्गत्वं तैर्यत्नेन निराकृतम् । अतः कर्ममीमांसकमर्यादया प्रणवानुसन्धानत्रिपुण्ड्रधारणादीनां[1] सर्वविद्यासाधारण्यं न सिद्ध्येदिति शङ्कानिराकरणार्थं क्वचिच्छाखायां किञ्चित्कर्मप्रकरणाम्नातानां शाखान्तराम्नातकर्मान्तराङ्गत्वमपि विनियोजकप्रमाणबलाद्भवतीत्यत्र कर्ममीमांसकमतदृष्टान्तप्रदर्शनार्थं च सूत्रम् ॥ सू ॥ मन्त्रादिवद्वाऽविरोधः ॥ ५४ ॥ यथा क्रत्वंगभूतानामिति । अत्रायमाशयः । कर्ममीमांसकैर्गुणमुख्यव्यतिक्रमाधिकरणे सामवेदोत्पन्नानि सामवेदे क्रतुषु विनियुक्तानि 'य एवंविद्वान्वारवन्तीयं साम गायति यज्ञायज्ञियं साम गायति वामदेव्यं साम गायती'त्यादिभिर्याजुर्वेदिकैराधाने विनियुक्तानि वारवन्तीयादीनि सामान्युदाहृत्य तेषां 'मुच्चैस्साम्ने'त्युत्पत्तिवेदविहितस्वरप्राप्तौ प्रधानभूतविनियोगविध्यनुसारेण 'उपांशुयजुषे'ति विहितः याजुर्वैदिक एव स्वर इति सिद्धान्तितम् । अत्र शाखान्तरे किञ्चित्कर्मप्रकरणाम्नातानां विनियोजकप्रमाणबलात् शाखान्तराम्नातकर्मान्तराङ्गत्वमप्यस्तीत्यत्र दृष्टान्तः स्पष्टः । अत एवोपन्यस्तशङ्कानिराकरणमपि लभ्यते । तथाहि 'उपांशुयजुषा क्रियत' इति ज्योतिष्टोमप्रकरणाम्नातं यजुर्वेदविहितकर्मोद्देशेनोपांशुस्वरविधायकं विधिमवलम्ब्य गुणमुख्यव्यतिक्रमाधिकरणे सिद्धान्तः कृतः । यद्यनुवादः प्रकृतगामीति प्रकरणानुसारेण यजुर्वेदविहितकर्मानुवादस्य यजुर्वेदविहितज्योतिष्टोमैकविषयता स्यात्तदानीमाधानतदङ्गानां याजुर्वैदिकत्वेऽप्युपांशुस्वरो न प्राप्नुयादिति सिद्धान्तो भज्येत । अतस्तत्र प्रकरणेन श्रुतिसंचारायोगाद्यजुर्वेदविहितकर्मसामान्योद्देशेनोपांशुस्वरविधिरित्यभ्युपगम्यैव तस्य सिद्धान्तस्य प्रवृत्तिर्वक्तव्या । न च सन्निध्याम्नातयो'रुच्चै ऋचा क्रियते उच्चैस्साम्ने'ति विध्योस्तत्तद्वेदविहितकर्ममात्रोद्देशदर्शनादिहापि तथात्वेन भाव्यमिति प्रकरणानादरः । श्रुतिमपि सङ्कोचयतः प्रकरणस्य सन्निध्यनुवर्तनायोगात् । तस्मात्केवलं प्रकरणानुग्रहाय नास्ति श्रुति-

---

(१) 'प्रणवानुसंधानादीनां' इति ख. पाठः ।

सङ्कोच इत्येव तस्मिन्नधिकरणे तेषामपि मर्यादा व्यवस्थापनीया । अत एव वार्तिककृता 'गुणानां च परार्थत्वादसंबद्धस्समत्वात्स्या'दिति सूत्रं पात्राणामङ्गावतारन्यायेन पावमानेष्टिमात्राङ्गत्वनिवारणाय पावमानेष्टीनामाधानाङ्गत्वनिराकरणार्थं न भवति । तासामाधानाङ्गत्वेऽपि पात्राणां वाक्यबलेन सर्वयज्ञार्थतासिद्धेः । यज्ञशब्दस्य प्रकरणानुसारेण संकोचकल्पनायोगादिति भाष्यभङ्गं कृत्वा तत्सूत्रं निविदधिकरणगुणसूत्रत्वेन योजितम् । अतो मीमांसकमर्यादयापि 'आत्मानमरणिं कृत्वे'ति मन्त्रे ध्यानशब्दस्य प्रकरणानुसारेण सङ्कोचः प्रसज्यत इति भाष्ये 'सर्वशाखागतक्रत्वन्वय' इत्यस्य शाखान्तरगतकर्मान्वय इत्यर्थः । आधानस्य क्रतुत्वाभावात् । अथवा प्राक्सूत्रकृता गुणमुख्यव्यतिक्रमाधिकरणन्याय'स्यौपसदव'दित्युदाहरणान्तरमुपन्यस्तमिति तदभिप्रायं क्रतुग्रहणम् । अपिचाऽऽथर्वशाखारंभे विद्याविशेषमनुपक्रम्य 'भगवन्किमादौ प्रयुक्तध्यानं ध्यायितव्यं किं तद्ध्यानं को वा ध्याता कश्च ध्येय', इत्यङ्गिरससनत्कुमारयोः प्रश्ने 'स एभ्योऽथर्वा प्रत्युवाचे'ति तत्प्रतिवचनमुपक्रम्य प्रश्नचतुष्टयप्रतिवचनत्वेनैवाग्रिमस्संदर्भस्सर्वोऽपि प्रवर्तितः । तत्र ब्रह्मध्यानस्यादौ किमक्षरं प्रयुक्तं सद्ब्रह्मस्वरूपतद्गुणवाचकतया तद्ध्यानसाधनमिति कृत्वा ध्यातव्यमित्यादि । अत्र स्पष्टं प्रणवस्य सर्वविद्यासाधारण्यमाहवनीयस्येव सर्वहोमसाधारण्यम् । अतः कैवल्योपनिषदादिष्वपि 'आत्मानमरणिं कृत्वे'ति मन्त्रः सर्वविद्यासाधारणः । तस्यायमर्थः । यथा ह्यरणौ प्रागपि स्थितस्य वह्नेरभिव्यक्त्यर्थमधरोत्तरारणी संयोज्य मथनेन वह्निरभिव्यक्तो भवति । स चाभिव्यक्तेन वह्निना मथिता स्वाभिमतं दाह्यदाहं लभते । एवं पण्डितः कृतश्रवणमननादिकं, स्वात्मनि प्रागपि स्थितस्य शिवस्याभिव्यक्त्यर्थं स्वात्मानं प्रणवं च ध्यानक्रियायां कर्तृकरणभूतौ संयोज्य ध्यानाभ्यासं करोति चेत्तेन स्वात्मनि शिवोऽभिव्यक्तो भवति । तदनुग्रहेण स पाशदाहं लभते । इति 'ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढव'दिति श्वेताश्वतरोपनिषदि पाठात्तदर्थोपसंहारेणारणिमथनपाशदहनोक्तिसामर्थ्येन चायमर्थः स्पष्टः । एवं तावत्प्रणवाभ्यासस्य सर्वविद्यासाधारण्यं यदुक्तं तत्तत्कर्ममीमांसकमर्यादामप्यनुवर्तत इत्युपपादितम् । यथैव भस्मोद्धूलनत्रिपुण्ड्रयोरपेक्षावशात्सर्वविद्यासाधारण्यं यदुक्तं तदपि तन्मर्यादानुवर्त्यैव । तैरपि व्रीह्याद्युद्देशेन विहितस्यावहननादेर्यवादिसाधारण्यमपेक्षावशादेव समर्थनीयम् । तदेत'दावृत्तिरसकृदुपदेशा'दित्यधिकरणे सप्रपञ्चमुपपादयिष्यते । तत्रैवात्रत्यानां शङ्काशूकानामपि सविशेषं निराकरणं भविष्यति । सूत्रे वाकारो बोधनीयभेदेन व्यवस्थितविकल्पार्थः । प्रणवादिचिन्तनादीनां विद्याविशेषसन्निध्याम्नातानामपि सकलविद्यासाधारण्ये यो वक्तव्यो न्यायस्स ब्रह्ममीमांसकानां विद्याविशेषसन्निध्याम्नातस्य आनन्दादिगुणजातस्य अस्थूलत्वादिनिषेधवृन्दस्य अर्चिरादिमार्गस्य सन्न्यासस्य यज्ञादिकर्मनिकरस्य शमदमादिपरिकरस्य च सर्वविद्यासाधारण्यमभ्युपगच्छतां प्रसिद्ध एवेति वर्णितम् पूर्वसूत्रे कर्ममीमांसकान्प्रति त्विदमुच्यते । तेषामपि नास्ति विरोधः मन्त्रादिषु दर्शनात् । क्वचिच्छाखायां विद्याविशेषसन्निध्याम्नातानामपि प्रणवचिन्तनादीनां शाखान्तरपठितविद्यांतराङ्गत्वं सामशाखायां क्रतुप्रकरणाम्नातानां तदङ्गानां स्तोत्रीयसाधारणमन्त्राणां याजुर्वेदिकाधानाङ्गत्वमिव विनियोजकप्रमाणबलान्न विरुध्यते । ध्यानानुवादस्य प्रकरणानुरोधेन सङ्कोचाभावः स्वरविधौ यजुर्वेदविहितकर्मा-

विरोधः तथाऽत्रापीति ॥

इत्यङ्गावबद्धाधिकरणम् ॥ ३१ ॥

अथ क्रतुज्यायस्त्वाधिकरणम् ॥ ३२ ॥

सू ॥ भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५५ ॥

इह वैश्वानरविद्यायामुपासनमंशेन समस्तेन वेति संदिह्यते। तथा हि—तत्र द्युलोकसूर्यवाय्वाकाशोदकपृथिव्यो वैश्वानरस्य मूर्धचक्षुःप्राणमध्यशरीरमूत्रस्थानपादरूपा ध्यातव्या इति निरूपितम् । तेषामङ्गानामपि प्रत्येकमुपासनमभिहितम् 'अत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते' इति पृथक्पृथग्दिवादिपर्यायगतैर्वाक्यैः। एवं सत्युपास्तिशब्दस्य फलवचनस्य च प्रत्येकमुपलभ्यमानत्वादंशोपासनमुचितमिति पूर्वः पक्षः ॥

---

नुवादस्येव श्रुतिप्राबल्यान्न विरुध्यते। विद्याविशेषानुबन्धिनोरप्युद्धूलनत्रिपुण्ड्रयोस्सर्वविद्यासाधारण्यं, व्रीह्यनुबन्धिनोऽवहननस्य यवसाधारण्यमिवापेक्षाबलान्न विरुध्यत इति ॥

इत्यङ्गावबद्धाधिकरणम् ॥ ३१ ॥

अथ क्रतुज्यायस्त्वाधिकरणम् ॥ ३२ ॥

सू० ॥ भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५५ ॥ किंचिद्विद्यान्वितानामेव प्रणवचिन्तनादीनां विद्यांतरेष्वप्यन्वयवत्समस्तोपासनान्वितानामेव द्युसूर्यादीनां व्यस्तोपासनास्वप्यन्वय इति शङ्कया पूर्वपक्षोत्थानात्सङ्गतिः । व्यस्तोपासनेषु प्रत्येकमाख्यातं फलं च द्युसूर्यादिषु प्रत्येकं वैश्वानरत्वं च श्रूयते । व्यस्तोपासननिन्दापूर्वकं समस्तोपासनं च श्रूयते। तयोः समबलत्वे व्यस्तोपासनं च कार्यम् । न्यूनाधिकबलत्वे समस्तोपासनमेव कार्यमिति तदनवधारणात्संशयः । समस्तोपासनं सिद्धान्तिनोऽप्यभिमतं नोपपादनीयमिति, प्रत्येकमाख्यातश्रवणादिभिर्व्यस्तोपासनमुपपादयन्पूर्वपक्षयति—तथाहीति। अत्त्यन्नमिति। अन्नमत्तीत्यन्वयः। एवमुत्तरत्रापि। फलवचनस्य चेति चकारेण प्रत्येकं वैश्वानरत्वश्रवणं समुच्चीयते। अंशोपासनमिति। यथा समस्तस्य वैश्वानरत्वश्रवणात्तदुपासनतत्फलश्रवणाच्च समस्तोपासनमुचितम् । एवमवयवोपासनमपि[1] । उभयत्रापि वर्तमानापदेशे विधिकल्पनस्यार्थवादिकफलकल्पनस्य चाविशिष्टत्वेन यत्र विधिभक्तिरेवं कामशब्दो वा तत्र विधिरन्यत्रावयुत्यानुवादः समुदायानुवादो वेति कल्पनायां नियामकाभावात् । न च वैश्वानरात्मबुभुत्स्वौपमन्यवादिप्रश्नभूते स्वर्लोकादिपृथिव्यन्त-

---

नयमणिमालायाम्

अथ अङ्गावबद्धाधिकरणम् ॥ ३१ ॥

सू० ॥ अङ्गावबद्धास्तु न शाखासु प्रतिवेदम् ॥ ५३ ॥ मन्त्रादिवद्वाविरोधः ॥ ५४ ॥

भस्मोद्धूलत्रिपुण्ड्रप्रणवजपशिखारुद्रपाठादिमुक्तेर्व्यावर्त्यांगावतारप्रकरणपठिता एव विद्याः श्रयेत ।
मैवं मुक्त्यान्वयित्वं स्तुतिभिरधिगतं क्वापि सामायितस्येत्यंगीकार्योप'''यप्रकृतनियमनं सर्वविद्याङ्गभावः ॥२८०॥

इत्यङ्गावबद्धाधिकरणम् ॥ ३१ ॥

---

(१) 'एवं व्यस्तोपासनमपि' इति ख. पाठः ।

सिद्धान्ते तु—समस्तोपासनमेव मुख्यमित्युच्यते। तथा हि—तत्र त्रैलोक्यशरीरतयोपास्यस्य वैश्वानरात्मनः स्वर्लोकादिपृथिव्यन्तानां मूर्धादिपादान्तावयवत्वमभिधाय 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति' इति ब्रह्मानुभवः फलं चाभिहितम्। तत्र मूर्धाद्यवयवोपासनात् भूम्नः समस्तोपासनस्य ज्यायस्त्वं प्रामाणिकत्वम्, तत्रैव ब्रह्मानुभवफलाभिधानात्। तत्रावयवोपासनं फलकीर्तनं च क्रतुवदविवक्षितम्। 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इत्युक्त्वा 'यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति' इत्यादिनोच्यमानमष्टाकपालादिकं तत्फलं च यथा न विवक्षितं तद्वत्। तथा हि समस्तोपासनस्यैव ज्यैष्ठ्यं

---

त्रैलोक्यशरीरकवैश्वानरात्मनिरूपणपूर्वकसर्वलोकसर्वभूतसर्वात्मभोग्यब्रह्मानन्दानुभवरूपतदुपासनाफलप्रतिपादनपर्यन्तस्य कृत्स्नस्य सन्दर्भस्यैकवाक्यत्वावगमात्तत्संरक्षणीयव्यस्तोपासनतत्फलवचनानां पुत्रेष्टिविषयमहावाक्यान्तर्गताष्टाकपालतत्फलादिवचनवदर्थवादरूपत्वं कल्पनीयमिति वाच्यम्। भूमविद्यायां सत्यशब्दोक्तस्य ब्रह्मणः सर्वतोभूमत्वप्रतिपादनार्थं तदवधित्वेनोपन्यस्यमानेषु नामादिप्राणान्तेष्विव सर्वशरीरकस्य वैश्वानरस्य प्रतिपादनार्थं तदवयवत्वेनोपन्यस्यमानेषु स्वर्लोकादिषु प्रातिस्विकोपासनातत्फलविधानस्य महावाक्यैक्याविरोधित्वात्। न च भूमविद्यायां नामाद्युपासनानामश्रुता निन्दात्र व्यस्तोपासनानां श्रूयते। साचोदितानुदितहोमनिन्दान्यायेन प्रक्रान्तपरित्यागविषयतया योजयितुं न शक्यते। समस्तोपासनामविज्ञाय व्यस्तोपासनामेव कृतवतः प्राचीनशालादिति तन्निन्दाश्रवणादिति वाच्यम्। तथापि न हि निन्दान्यायेन योजयितुं शक्यत्वात्। न ह्यत्रोदितानुदितहोमयोरिव व्यस्तोपासनेषु प्रायश्चित्तश्रवणमस्ति येन प्रक्रान्तपरित्यागविषयतया योजनपर्यंतमपश्येत। निन्दया व्यस्तोपासनां निषेधोन्नयनबलेन 'नचतुस्त्रिंश'दिति ब्रूयादिति निषेधेनेव विध्युन्नयनमवर्जनीयम्। निषेधस्य रागप्राप्तविषयत्वाभवात्। तस्मात्समस्तोपासनवद्व्यस्तोपासनान्यपि नामाद्युपासनवद्विधेयान्येवेति भावः। ननु ज्यायस्त्वं प्रशस्यतरत्वं न तद्व्यस्तोपासनविधिप्रतिक्षेपकं किंतु तत्साधकमेव। तत्सद्भावे हि ब्रह्मदृष्टिविशिष्टैकैकावयवोपासनारूपादभ्युदयफलात्तस्मात्सर्वावयवविशिष्टब्रह्मोपासनस्य मोक्षफलस्य विषयविशेषेण फलविशेषेण च प्राशस्त्यमुपपद्यत इत्याशङ्क्य व्याचष्टे—प्रामाणिकत्वमिति। ज्यायस्त्वं प्राचीनत्वं। 'वृद्धस्य चे'ति सूत्रेण वृद्धशब्दस्यापि ज्यादेशविधानात्। तत्प्रामाणिकत्वपर्यवसायी। प्रामाणिकं हि स्वाभाविकत्वेन प्रायोऽनादिसिद्धं भवति। भ्रान्तिकल्पितं तु पूर्वपक्षिणोत्प्रेक्षितमद्यतनं भवेत्। क्रतुवदविवक्षितमिति। अत्र ब्रह्मानुभवफलाभिधानादिति हेतोरन्वयः। तथा च यस्मिञ्जात एतामिष्टिं निर्वपतीति वाक्येन वर्ण्यमाने द्वादशकपालद्रव्यकेष्टिफले पूतत्वादिसमुदाये पूतत्वादिरेकैक इव सकलविषयभोगकणिकामहासुधासमुदायमाणब्रह्मानन्दानुभवे 'अत्त्यन्नमित्यादिनोक्तोऽभ्युदयफलविशेषोन्तर्भवतीत्यवयुत्यानुवादसंभवान्न वाक्यभेदावहं व्यस्तोपासनानामपि विधानमाश्रयणीयमिति भावः। ननु महावाक्यैकत्वेऽपि नामाद्युपासनादिवद्व्यस्तोपासनानां विधानमुपपद्यते इत्याशङ्कानिराकरणार्थं 'तथाहि दर्शयति' इति सूत्रशेषं व्याचष्टे—तथा हीति। ज्यैष्ठ्यमिति। व्यस्तोपासनाभिरनर्थस्योद्घाटनेन तासां भ्रान्तिमूलत्वं दर्शयन्ती श्रुतिः समस्तो-